
ISBN : 978-81-87324-15-5

# न्यायशास्त्रार्थप्रकर्षः

देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य न्यायविभागीय-ग्रन्थमालायां प्रथमं कुसुमम्

( 2016-17 )



न्यायविभागः

राष्ट्रिय-संस्कृत-संस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः

राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )

श्री रघुनाथकीर्तिपरिसरः, देवप्रयागः

ISBN : 978-81-87324-15-5

# न्यायशास्त्रार्थप्रकर्षः

देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य न्यायविभागीय-ग्रन्थमालायां
प्रथमं कुसुमम्

( 2016-17 )

प्रधान-सम्पादकः
प्रो. के.बी. सुब्बरायुडुः
प्राचार्यः

सम्पादकः
डॉ. आर. बालमुरुगः
न्यायविभागाध्यक्षः

न्यायविभागः
राष्ट्रिय-संस्कृत-संस्थानम्
( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )
श्री रघुनाथकीर्तिपरिसरः, देवप्रयागः

प्रकाशक:
प्राचार्य:
**राष्ट्रिय-संस्कृत-संस्थानम्**
(मानितविश्वविद्यालय:)
श्री रघुनाथकीर्तिपरिसर:, देवप्रयाग:, पौडी-गढवाल:-249301 (उत्तराखण्ड:)
दूरभाषा - 01378-266028
ई मेल : srkcampus@gmail.com
वेबसाईट : www.srkcampus.org

© न्यायविभाग:, श्री रघुनाथकीर्तिपरिसर:, देवप्रयाग:

प्रकाशनसंवत्सर: - 2017

प्रथमसंस्करणम् : 200 प्रतय:

मूल्यम् : ₹ 150.00

ISBN : 978-81-87324-15-5

---

सह-वितरक:
**एपेक्स बुक्स पब्लिशर्स एवं डिस्ट्रीब्यूटर्स**
5/21-ए, विजय नगर, दिल्ली-110009
दूरभाष : 07503180700

---

अक्षरविन्यास: तथा संयोजनम्
**श्री ओम् प्रकाश:**


मुद्रक:
**डी.वी. प्रिंटर्स**
97-यू.बी., जवाहर नगर, दिल्ली-110007
मो.: 9818279798, 9990279798

प्रो. के.बी. सुब्बरायुडु:
अद्वैतवेदान्ताचार्यः, एम्.ए. (संस्कृतम्) विद्यावारिधिः
कुलसचिवचरः प्र. प्राचार्यश्च
राष्ट्रियसंस्कृतसंस्थानम्
श्रीरघुनाथ-कीर्ति-परिसरः
(मानितविश्वविद्यालयः)
भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनम्
देवप्रयागः-249301 (उत्तराखण्डः)

Prof. K.B. SUBBARAYUDU
Ad.Vedantacharya, M.A. (Sanskrit) Ph.D.
Ex-Registrar & Principal (I/c)
Rashtriya Sanskrit Sansthan
Shri Raghunath Kirti Campus
(Deemed University)
Under Ministry of Human Resource
Development, Govt. of India
Devprayag-249301 (Uttarakhand)

क्रमाङ्कः ..................................

दिनाङ्कः - ..........................



# शुभाशंसनम्

श्रीरघुनाथकीर्तिपरिसरस्य कीर्तिपताका बहुधा प्रसरत्यधुना। अस्मिन् शैक्षिक-भावस्योघाटनाय शिलान्यासोऽपि सुसम्पन्नः। एवमेव षड्विभागेषु द्विदिवसीय-विभागीयसंगोष्ठ्यः सुसम्पादिताः। न्यायविभागाध्यक्षेण डॉ. बालमुरुगन् महोदयेन सङ्गोष्ठी कृता। तत्रानेके विद्वांसो विविधप्रान्तस्थविश्वविद्यालयेभ्यः समागत्य स्वकीयशोपत्राणि पठितवन्तः, तानि शोधपत्राणि तथान्यान्यपि पत्राणि समीकृत्यैको ग्रन्थो "न्यायशास्त्रार्थप्रकर्षः" इति नाम्ना प्रकाशयितुमीहन्त इति महान् सन्तोषः। अधुनातने समये न्यायशास्त्रस्य प्रचारः प्रसारश्च शनैः शनैः लुप्तप्रायोऽस्ति। न्यायशास्त्रन्तु सर्वशास्त्रोपकारकमित्यपि सर्वे जानन्ति। उक्तं च ''काणादं पार्णनीयञ्च सर्वशास्त्रोपकारकम् इति। न केवलं शास्त्रान्तराध्ययनाय तस्य शास्त्रस्योपयोगः अपितु व्यवहारकाले न्यायलयेषु अपराधनिर्धारणाय तर्कस्य महानुपयोगो विद्यते। अतोऽवश्यमस्य न्यायशास्त्रस्य पाठ्यंशाः Law college मध्येऽपि पाठनीयाः। अस्मिन् विषये परिसरस्यास्य न्यायाविभागाध्यक्षेण डॉ. बालमुरुगन्महोदयेन सङ्गोष्ठ्यां चर्चा विहिता। तादृशचर्यायाः शोधपत्राणां च संपादनं कृत्वा "न्यायशास्त्रार्थप्रकर्षः"

इति यो ग्रन्थः प्रकाश्यमानः विद्यते सः विद्यार्थिनां विदुषाञ्च ज्ञानवर्धनाय बहूपकरिष्यतीत्यत्र नास्ति सन्देहः। एतादृशान् ग्रन्थानन्यानपि डॉ. बालमुरुगन् आध्यक्ष्येण श्रीरघुनाथकीर्तिपरिसरस्य न्यायविभागः प्रकाशयतु। तदर्थं सामर्थ्यं प्रददात्विति भगवतीं भागीरथीं भगवन्तं श्रीरघुनाथञ्च संप्रार्थये।

इत्थम्
परिसरप्राचार्यः

**के.वि.सुब्बरायुडुः**

# सम्पादकीयम्

राष्ट्रियसंस्कृतसंस्थानस्य परिवारसदस्यत्वेन इदमिदानीं परिणतस्य श्रीरघुनाथ-कीर्तिपरिसरस्य न्यायविभागपक्षतः आदिमे हायने एव विविधवावदूकुशलानां सुलेखम-करन्दैः सुशोभितं पुष्पोत्तमं विकसतीति विचिन्त्य अनिर्वाच्यं मोदमवाप्नोमि। **न्यायशास्त्रार्थप्रकर्षः** इत्यन्वर्थाख्याङ्किते नैकशोधनिबन्धसङ्कलनात्मके ग्रन्थेऽस्मिन् नव्यन्याये प्रथितिवादविशारदानां श्रीराजारामशुक्लवर्याणां मीमांसकसम्मतजाति-शक्तिवादविमर्शः इति प्रबन्धः आद्यः वर्तते यश्च न केवलं छात्राणां प्रत्युत शास्त्रान्तर- विदुषामपि न्यायनयाकलने उपकारकः वर्तते। न्यायविभागेन २०१७ जनवरीमासस्य ३०-३१ दिनाङ्कयोः **न्यायशास्त्रस्य शास्त्रान्तरेषु प्रभावः** इति शीर्षके समायोजित- राष्ट्रियसङ्गोष्ठ्याः समुद्घाटकानां तथा कर्कशशास्त्रे छात्राणां सरलप्रवेशोद्देश्येन **न्यायतन्त्रे प्रमाणविचारः** इति शीर्षके परिकल्पिते विशिष्टव्याख्याने विशिष्टवक्तृत्वेनोपस्थितानां उत्तराखण्डसंस्कृतविश्वविद्यालयकुलपतिमहोदयानां प्रो. पीयूषकान्तदीक्षितवर्याणां अनुमानप्रमाणविषये संस्कृते विवरणसंवलिताङ्गलभाषानिबन्धो-ऽपि तथैव वर्तते। एवं तत्सङ्गोष्ठ्याः समापनसत्रे मुख्यातिथिस्थानमलङ्कृत्य सर्वजनावबोधनसौकर्याय राष्ट्रभाषायां "**आयुर्वेदे न्यायशास्त्रप्रभावः**" इति शीर्षके श्रीमद्विजयपालशास्त्रिभिः अतिगभीरं विशिष्टञ्च भाषणं विहितमासीत्। तेभ्यः दयया प्राप्तौ तद्भाषणस्य फलस्वरूपौ जनसमान्योपकारकधिया हिन्दीभाषायामेव विरचितौ प्रबन्धौ तथैव प्रकाश्येते। मन्ये आभ्यां निबन्धविशेषाभ्यां नितरां बहूनां जनानां महानुपकारकः भविष्यतीति। इत्थमेव ग्रन्थे देशे नानाप्रान्ते विराजमानानां युवनैयायिकानां शोभावर्धकाः प्रबन्धविशेषाः विलसन्ति। यथा श्रीगणेश्वरझामहोदयस्य न्यायसङ्गोष्ठ्यां सन्निधाय विशिष्टविचार- मुपस्थापितवतः व्याकरणे संशयपक्षताविचारः, श्रीसन्दीपशर्मणः वेदान्तपरिभाषायां न्यायप्रभावः, श्रीहरिशर्मणः बह्मानन्दीये पक्षतावच्छेदकविचारः, श्रीसूर्यनारायणशर्मणः विस्तृतः प्रमालक्षणविचारः, श्रीजगन्नाथशर्मणः संख्याविचारः, श्रीनिवासशर्मणः धर्मितावच्छेदकप्रत्यासत्तिविचारः एवं श्रीतुलसीकुमारशर्मणः संशयविचार इति निबन्धाः अत्यन्तं रमणीयाः मुक्तकण्ठेन प्रंशसार्हाश्च वर्तन्ते। एवं स्थानीयविदुषोः सङ्गोष्ठ्यां पत्रवाचकयोः श्रीओम्शर्मा-श्रीसुरेशशर्मणोः प्रबन्धावपि नितरामभिनन्दनीयौ वर्तेते। पुस्तकस्यास्य निर्माणाय

उपकृतवद्भ्यः एतेभ्यः विद्वद्भ्यः समेभ्यः धन्यवादान् प्रकाशयामि। परिसरप्राचार्येभ्यः समग्रकार्यनिवर्हने कुशलेभ्यः के.बी. सुब्बरायुडु महोदयेभ्यः पुस्तकप्रकाशनाय सर्वविध सौकर्यं परिकल्पितवद्भ्यः कार्तज्ञ्यानि प्रकटयामि। पुस्तकस्थकतिपयप्रबन्धानुचितरूपेण समुट्टङ्क्य सुव्यवस्थितरूपेण ग्रन्थप्रकाशने सहायकाय शान्ताय श्रीओम्प्रकाशाय अभिनन्दनानि प्रकाशयामि। मुद्रकः D.V. Printers कृते धन्यवादं वितीर्य शास्त्रप्रयञ्चे ग्रन्थोऽयं सुयोग्यं स्थानमाप्नोत्विति परमेश्वरं संप्रार्थ्य विदुषां परिशीलनाय ग्रन्थमिमं समर्प्य विरमामि।

॥ सर्वं साम्बशिवार्पणमस्तु ॥

इत्थं सुधीजनविधेयः
**डॉ. आर. बालमुरुगः**
संपादकः तथा न्यायविभागाध्यक्षः

# विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| १. | शुभाशंसनम् | | *iii* |
| २. | संपादकीयम् | | *v* |
| ३. | भट्टाभिमतजातिशक्तिवादस्य जगदीशदिशा विमर्शः | –प्रो. राजारामशुक्लः | ०१ |
| ४. | अद्वैतसिद्धौ न्यायतन्त्रप्रभावः | –डॉ. आर्. बालमुरुगः | ०८ |
| ५. | आयुर्वेद में न्यायशास्त्रीय सिद्धान्त | –प्रो.विजयपालशास्त्री | १५ |
| ६. | Inference | –Prof. Piyushkant Dixit | २९ |
| ७. | अवयवानवयवत्वसाध्यकानुमितौ संशयपक्षताविचारः | –श्रीगणेश्वरनाथः झा | ४४ |
| ८. | न्यायशास्त्रस्य वेदान्तशास्त्रे प्रभावः | –श्रीसंदीपशर्मा | ५१ |
| ९. | लघुचन्द्रिकायां पक्षतावच्छेदकविचारः | –श्रीहरिशिवरामधायगुडे | ५६ |
| १०. | प्रमालक्षणविचारः | –जे. सूर्यनारायणः | ६३ |
| ११. | संख्यापदार्थविमर्शः | –एन. के. जगन्नाथः | ७१ |
| १२. | धर्मितावच्छेदकप्रत्यासत्तिविचारः | –जे. श्रीनिवासः | ७८ |
| १३. | सिद्धान्तरत्नाकरकौमुदीमूलार्थ-विद्योतिनीदृष्ट्या हेतुकरणपदार्थविमर्शः | –श्रीओम्शर्मा | ८१ |
| १४. | न्यायोक्तकालोपाधीनां ज्योतिष्शास्त्रीयविवेचनम् | –डॉ. सुरेशशर्मा | ८८ |
| १५. | न्यायदर्शने संशयपदार्थविचारः– | –डॉ. तुलसीकुमारजोशी | ९२ |
| १६. | लवण व शर्करा के अतिसेवन से हानियाँ | –प्रो. विजयपालशास्त्री | ९६ |


✦✦✦




राष्ट्रियसङ्गोष्ठ्याः शुभारम्भः




मङ्गलमाचरन्तः छात्राः




मुख्यातिथीनां सभाजनम्




स्वागतं वितरति न्यायविभागाध्यक्षः डॉ. आर्. बालमुरुगः




विशिष्टव्याख्यानेन छात्रानुद्बोधयन्ति प्रो. पीयूषकान्तदीक्षितवर्याः




आध्यक्ष्यभाषणं निर्वहन्तः प्राचार्यवर्याः के.बी. सुब्बारायुडुः

# भाट्टाभिमतजातिशक्तिवादस्य जगदीशदिशा विमर्शः

**प्रो.राजारामशुक्लः**
आचार्यः, वैदिकदर्शनविभागः
काशीहिन्दूविश्वविद्यालयः, वाराणसी

परप्रतिपत्त्यर्थं शब्दस्य नियमत उपादानदर्शनात् शब्दप्रयोगपरप्रतिपत्त्योः कार्यकारणभावः सिद्ध्यति। अहैतुकी कार्यस्योत्पत्तिः न कुत्रापि दृष्टा, अन्यथा धूमार्थं वह्नेः तृप्त्यर्थं भोजनस्य च नियमत उपादानं न स्यात्। तस्मात् शब्दप्रयोग एव परप्रतिपत्तिहेतुर्वक्तव्यः। यत्र तु पुनः चेष्टालिप्यादिभिः प्रतिपत्तिस्तत्रापि तादृशचेष्टाद्यनुमितशब्दैरेव प्रतिपत्तिः, अतः शाब्दी एव सा स्वीक्रियते, अन्यथा विलक्षणप्रमितिकरणत्वात् चेष्टालिप्यादीनामपि प्रमाणान्तरत्वं स्यात्। इन्द्रियसन्निकर्षादिना जायमाना प्रतीतिस्तु स्वस्यैव न तु परप्रतिपत्तिः सा। अनुमानेनापि यत्र परार्थानुमितिस्तत्र शब्दप्रयोगः अपेक्ष्यत एव। किन्तु तत्र शब्दाः साध्यहेत्वाद्युपस्थितावेवोपयुज्यन्ते न तु पक्षे साध्यप्रमितौ। तस्मात् साकाङ्क्षशब्दैर्जायमानस्य बोधस्य प्रत्यक्षानुमितिविलक्षणत्वेन प्रमान्तरत्वमेव–

**साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः।**
**सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा[१]॥**

आकाङ्क्षादिमद्भिः कतिपयशब्दैः मिलित्वा वाक्यं, कतिपयवाक्यैश्च भाषा निर्मीयते। समानार्थबोधका अपि शब्दा आनुपूर्व्या भिन्नाः सन्तः भाषायां वैभिन्ये कारणानि भवन्ति। अत एव विवक्षितार्थाभेदेऽपि भाषा मिथो भिद्यन्ते। समानार्थकानामपि शब्दानाम् आनुपूर्व्यां भेदस्तु देशकालादिभेदमूलकः। लिङ्गवर्णादिव्यवस्थामूलकोऽपि भाषाभेदो दृश्यते।

भाषा या काऽपि भवतु तत्र अर्थबोधनसमर्थानां पदानां सङ्ख्या परिमिता एव भवति, किन्तु तैः पदैः बोध्यमानानामर्थानां भावानां च संङ्ख्या अपरिमिताऽस्ति, तत्र च क्रमशो वृद्धिरपि सम्भाव्यते। तेन तेषु पदेषु अर्थबोधनस्य भाराधिक्यं

जायमानमस्ति। फलतः यस्यां भाषायां पदैः वाक्यार्थबोधोत्पत्तौ काचित् शास्त्रीया व्यवस्था निर्मिताऽस्ति तत्र तु कोऽपि क्लेशो न भवति, किन्तु यत्र तथा नास्ति तत्र अव्यभिचारि-स्पष्टता न तिष्ठति।

अस्माकं शास्त्रकारैः पदैरर्थप्रत्यायनस्य काचिदव्यभिचारिणी प्रक्रिया प्रदर्शिता या शाब्दबोधप्रक्रियेति नाम्ना व्यपदिश्यते। शब्दादारभ्य शाब्दबोधपर्यन्तं तिस्रः कोटयो भवन्ति। पदज्ञानं, पदार्थज्ञानं वाक्यार्थज्ञानञ्चेति। अत्र अन्विताभिधानवाद-अभिहितान्वयवादादयोऽनेके वादाः सन्ति, किन्तु पदानां पदार्थबोधनसामर्थ्यं न केनापि अपलपितुं शक्यम्। सर्वजनानुभवसिद्धो हि गामानयेत्यादिवाक्याद् गवानयनादिविषयकबोधः। न हि गोपदात् कश्चिदश्वं प्रत्येति। एतत्किमर्थं भवतीति चेत्? गोपदे गोरूपार्थबोधजननसामर्थ्यविशेषस्य सत्त्वात्। तदेव हि सामर्थ्यं शक्तिपदेनोच्यते। गोपदेन पिण्डविशेषस्य बोधे न कश्चिद् विप्रतिपद्यते। विप्रतिपत्तिस्तु दार्शनिकानां पदस्य शक्तिविषये। पदेन पिण्डमात्रं बोध्यते, तद्गता जातिः तदुभयं वेति त्रीणि मतानि समुपलभ्यन्ते। इमानि त्रीण्यपि मतानि आचार्यभर्तृहरिणा प्रदर्शितानि सन्ति -

**पदार्थानामपोद्धारे जातिर्वा द्रव्यमेव वा।**
**पदार्थौ सर्वशब्दानां नित्यावेवोपवर्णितौ[२]।। इति।**

अत्र द्रव्यपदोत्तरैवकारस्य प्रथम- 'वा'शब्दमहिम्ना जातिपदेनाप्यन्वये जातिरेव पदार्थः इति मतं प्राप्नोति। अन्ययोगव्यवच्छेदार्थकैवकारेण द्रव्यस्य पदार्थत्वं व्यवच्छिद्यते। द्रव्यस्य पदार्थत्वव्यवच्छेदे जातिविशिष्टस्य तस्य पदार्थत्वं सुतरां व्यवच्छिद्यते। तेन द्रव्यमात्रशक्तिवादिमतापेक्षया जातिविशिष्टद्रव्यशक्तिवादिमतापेक्षया च विलक्षणं मतं प्राप्नोति। द्रव्यमेव इत्यनेन द्रव्यमात्रशक्तिवादिमतं प्राप्नोति। अत्राप्येवकारेण जातेः तद्विशिष्टस्य द्रव्यस्य च शक्यत्वं व्यवच्छिद्यते। न च विशिष्टद्रव्यस्य द्रव्यानतिरेकात् जातिविशिष्टद्रव्यस्य शक्यत्वे बाधकाभाव इति वाच्यं, विशिष्टस्य शक्यत्वे विशेषणीभूताया जातेरपि शक्यत्वस्यावश्यकतया तदभावे विशिष्टस्यापि शक्यत्वासम्भवात्। विशिष्टं शुद्धान्नातिरिच्यत इति प्रवादस्तु विशिष्टशुद्धयोः स्वरूपतोऽभेदं वदति न तु विशिष्टत्वावच्छिन्नस्य शुद्धेनाभेदमपि।

अन्यथा विशेषणानां व्यावर्तकत्वं न स्यात्। किञ्च विशिष्टशुद्धयोः ताद्रूप्येणाप्येकत्वे शुद्धस्य विशिष्टान्तरादप्यभेदे तदभिन्नाभिन्नस्य तदभिन्नत्वाद् विशिष्टयोरप्यैक्यापत्तिः स्यात्। नीलघटपीतघटयोः घटत्वेनाभेदेऽप्यनुभूयमानो भेदो विशेषणभेदनिमित्तक एव। तथा च द्रव्यमेवेत्यनेन द्रव्यमात्रशक्यत्वं पदानामिति मतं

निर्दिष्टं भवति। द्वितीय-'वा'कारः जातिद्रव्ययोः समुच्चयं बोधयन् जातिद्रव्ययोः मिलितयोः शक्यत्ववादि तृतीयं मतं सूचयति। उत्तरार्धे 'पदार्थौ' इत्यस्य पदस्य अर्थौ इति नार्थः, किन्तु 'अर्थौ' इत्येवार्थः, शेषांशस्य सर्वशब्दानामित्यनेनैव लब्धत्वात्। तथा च 'पदार्थौ सर्वशब्दानाम्' इत्यस्य 'सर्वशब्दनामर्थौ' इत्यत्र तात्पर्यं, विशिष्टवाचक-पदानां सति विशेषणवाचकपदान्तरसमवधाने विशेष्यमात्रपरत्वमिति नियमादिति। न च मतभेदेन त्रयाणां पदार्थत्वे पदार्थौ इति द्विवचनमसङ्गतमिति वाच्यं, वस्तूनां द्वैविध्याद्द्विववचनोपपत्तेः। नित्यावेवोपवर्णितौ इत्यनेन पदार्थयोः नित्यत्वमुक्तं भवति। तत्र जातेः नित्यत्वं नैयायिकनये प्रसिद्धम्। द्रव्यस्यापि कस्यचित् आत्मादेः स्वरूपत एव नित्यत्वं, स्वरूपतोऽनित्यस्य घटादेरपि तदुपादानीभूतपरमाण्वात्मना नित्यत्वम्। यत्तु प्रवाहानादितया घटादेर्नित्यत्वमिति, तन्न, प्रवाहानादेरपि अनन्तत्वानभ्युपगमात्, तदभावे च नित्यत्वासम्भवात्। इत्थं मतत्रयमनया कारिकया सूचितं भवति।

तत्राद्यं गवादिपदानां गोत्वजातावेव शक्तिर्न तु गोव्यक्ताविति मतम्। **शक्तिमत् पदं रूढं संज्ञेत्यादिनामभिर्व्यपदिश्यते**[३] । तेन शक्त्या प्रतिपद्यमानोऽर्थः शक्य इत्युच्यते। स एव अत्र कारिकायां पदार्थ इत्यनेन विवक्षितः, सामान्यतः पदार्थत्वस्य लक्ष्यादिसाधारण्येन जातिरेव पदार्थो न व्यक्तिरित्यसङ्गत्यापत्तेः, जातिशक्तिवादिनाऽपि व्यक्तौ लक्षणायाः स्वीकारात्। **जात्याकृतिव्यक्तयस्तु पदार्थः**[४] इत्यादावप्ययमेवार्थः। **सा च संज्ञा नैमित्तिकी, पारिभाषिकी औपाधिकी इति भेदेन त्रिविधा**[५]। जात्यवच्छिन्नसङ्केतवती संज्ञा नैमित्तिकी संज्ञा **नैयायिकैरभिहिता**[६]। यथा गवादिसंज्ञा। इमामेवाधिकृत्य आचार्यभर्तृहरिणा विचारः क्रियत इति प्रतीयते।

जातिशक्तिवादिषु प्रमुखा मीमांसका जातिमात्रसङ्केतवत्त्वं पदानां मन्यन्ते। तेष्वपिप्रधानाः भाट्टाः प्राभाकराश्च। अत्र निबन्धे भाट्टानामभिप्रायमधिकृत्य जगदीशतर्कालङ्कारैः कृतो विमर्शः संक्षेपत उपस्थाप्यते। तत्र भाट्टानां मते गोपदं गोत्वे शक्तमिति गोत्वादिशक्तत्वेन पदज्ञानं गोत्वान्वयबुद्धिं प्रत्येव हेतुरिति गामानयेत्यादिवाक्यात् आनयनं गोत्वकर्मताकमित्येव प्राथमिको बोधः। गोत्वादौ साक्षात्सम्बन्धेन आनयनादेरन्वयासम्भवेऽपि स्वाश्रयवृत्तित्वादिपरम्परासम्बन्धेनान्वयः सम्भवत्येव। गामानयेत्यादिवाक्यात् सर्वानुभवसिद्धः गवादिकर्मताकान्वयबोधस्तु आक्षेपलभ्यः उत्तरकालिकः। कर्मत्वस्य स्वाश्रयवृत्तित्वसम्बन्धेन गोत्ववृत्तित्वं साक्षात्सम्बन्धेन गोवृत्तित्वं विनाऽनुपपन्नमित्यनुपपत्तिप्रतिसन्धानात् कर्मत्वस्य गोवृत्तित्वमाक्षिप्यते। यत् येन विनाऽनुपपन्नं तत् तेनाक्षिप्यत इति। तथा च गोत्वादिकर्मताकत्वेनानयनान्वयबोधोत्तरं गवादिकर्मताकत्वेनान्वयबोधो भवति। कर्मत्वं साक्षात्सम्बन्धेन गोवृत्ति स्वाश्रयवृत्तित्वसम्बन्धेन गोत्ववृत्तित्वादित्याद्यनुमानमप्यत्रोह्यम्।

ननु गोत्वान्वयबुद्धिं प्रति वस्तुतो गोत्वशक्तत्वज्ञानस्य (गोत्वस्योल्लेखमकृत्वा) हेतुत्वाङ्गीकारे यत्र गोपदं जातौ शक्तमिति गोत्वशक्तत्वज्ञानं तत्रापि पूर्वोक्तरीत्या शुद्धगोत्वान्वयबुद्ध्यापत्तिः, जातित्वेन गोत्वावगाहने निरुक्तज्ञानस्यापि वस्तुतो गोत्व-शक्तत्वज्ञानरूपत्वात्। यदि च गोत्वान्वयबुद्धिं प्रति गोत्वत्वाद्यवच्छिन्नशक्तत्वज्ञानं हेतुः, उक्तज्ञानञ्च जातित्वावच्छिन्नशक्तत्वज्ञानमिति नोक्तदोष इत्युच्यते तदा गौरवं, तदपेक्षया गोत्वावच्छिन्नशक्तत्वज्ञानस्य हेतुतायामेव लाघवात्। तथाहि व्यक्तीनामा-नन्त्यादेव तत्र शक्तिमुपेक्ष्य जातिशक्तिवादः समर्थ्यते। तन्मतेऽपि यदि गवेतरासमवेतत्वे सति सकलगोसमवेतत्वरूपं सकलगोव्यक्तिघटितं गोत्वत्वं प्रवेश्यते तदा क्व लाघवमिति चेत्?

न, गोपदं गोत्वशक्तमिति गोत्वशक्तत्वज्ञानस्य हेतुतायामुक्तापत्त्यभावात्। अत्र गोत्वजातेरुल्लिख्यमानत्वेऽपि तस्याः स्वरूपतो भानसम्भवात्। तथा च तादृशज्ञाने शुद्धगोत्वस्य विषयितासम्बन्धेन शक्त्यंशे प्रकारत्वसम्भवेन गोत्वत्वादेरप्रवेशात् लाघवानपायात्। न च जातेः निरवच्छिन्नप्रकारत्वं समवायसम्बन्धेनैव दृष्टम्। समवायान्यसम्बन्धेन जातेः प्रकारत्वे तु किञ्चिद्धर्मावच्छिन्नत्वनियमात्, उक्तज्ञाने विषयितया निरवच्छिन्नगोत्वप्रकारकत्वं न सम्भवतीति वाच्यं, तादृशनियमे मानाभावात्। किञ्च यत्र अयं गौरिति व्यवसायोत्तरं गोत्वेनेमं जानामीत्यनुव्यवसायः, तत्रानुव्यवसाये शुद्धस्यैव गोत्वस्य विषयितया प्रकारत्वम्, व्यवसाये शुद्धस्यैव गोत्वस्य भानात् गोत्वत्वस्य तत्रानुपस्थितत्वात् अनुव्यवसाये तस्य भानं न सम्भवति। आत्म-ज्ञानभिन्नस्य व्यवसायविषयातिरिक्तस्य कस्यापि अनुव्यवसाये विषयत्वं न सम्भवति। तथाचोक्तनियमस्योक्तस्थले व्यभिचारः।

न च समावायान्यसम्बन्धावच्छिन्नाया अपि जातिनिष्ठप्रकारतायाः सावच्छिन्नत्वनियमानङ्गीकारे कालो गौः इत्यादि ज्ञानस्यापि प्रमात्वापत्तिः, तस्य कालिकसम्बन्धेन गोत्ववति काले कालिकसम्बन्धेन गोत्वप्रकारकत्वात्। उक्तनियमाङ्गीकारे चैतज्ज्ञानस्य स्वरूपतो गोत्वप्रकारकत्वेन (गोत्वजातेरनुल्लिख्य-मानत्वात्) तत्प्रकारतायाः किञ्चिद्धर्मावच्छिन्नत्वाभावेन प्रमात्वस्यासम्भवात्, समवायेन गोत्वस्य स्वरूपतः प्रकारत्वसम्भवेऽपि तेन सम्बन्धेन कालस्य गोत्ववत्त्वाभावात् इति वाच्यं, कालिकसम्बन्धावच्छिन्नगोत्वनिष्ठप्रकारतायाः गोत्वत्वावच्छिन्नत्वे एव तच्छालिज्ञानस्य कालो गोत्ववानित्याकारकस्यैव प्रमात्वस्यानुभविकत्वेन स्वरूपतो गोत्वप्रकारकस्य कालो गौरित्यादिज्ञानस्य प्रमात्वस्यापादयितुमशक्यत्वात्, कालः कालिकेन गोत्ववानिति ज्ञानप्रामाण्यस्य चेष्टत्वात्।

वस्तुतस्तु कालो गौरित्यादिशाब्दबुद्धेरिव तादृशप्रत्यक्षस्यापि अभेदसम्बन्धावच्छिन्नप्रकारकत्वस्यानुभविकतयोक्तरीत्या प्रमात्वापादनस्याशक्यत्वेनोक्तनियमानङ्गीकारे न कश्चिद्दोष इति भाट्टनामाशयसारः।

एतन्निराकरणक्रमे तर्कालङ्काराः एवमभिप्रयन्ति- गामानयेत्यादौ गवादिकर्मकताकत्वेनानयनादेरनुभूयमानो बोधः उत्तरकालिक आक्षेपलभ्य इति यदुक्तं, तन्न युक्तं, यतो हि, आक्षेपो नाम अनुमानमर्थापत्तिर्वा। किन्तु निरुक्तवाक्यश्रवणानन्तरं तद्घटिततत्तत्पदशक्तिज्ञानवतः पुरुषस्य व्याप्तिज्ञानविलम्बेन गवादिकर्मताकबोधविलम्बस्याननुभूयमानतया तस्याक्षेपलभ्यत्वस्य वक्तुमशक्यत्वात्। किञ्च शुद्धगोत्वस्य गोपदवाच्यत्वे तत्रैवानयनादेरन्वयः स्यात्, तस्य चानुभवेनाविषयीकरणात्, आनयनकर्मतायाः शुद्धगोत्वे वस्तुतो बाधितत्वेन तदसम्भवाच्च। अन्वयितावच्छेदकावच्छेदेन पदार्थान्तरान्वयस्यौत्सर्गिकत्वेन गोत्वत्वाद्यनुपस्थितिदशायां गोत्वे आनयनान्वयबोधो न सम्भवतीति तदुपस्थितिरावश्यिकी। तच्च गवेतरासमवेतत्वे सति सकलगोसमवेतत्वरूपं सकलगोघटितमिति लाघवानवकाशः।

स्वाश्रयवृत्तित्वरूपपरम्परासम्बन्धेनानयनक्रियाया गोत्वे दर्शनेन तस्याः स्वाश्रयत्वरूपसाक्षात्सम्बन्धेन गवि अनुमाने तर्कालङ्कारैः **शब्दशक्तिप्रकाशिकायां** व्यभिचारदोषः **उद्भावितः**[७]। तदव्याख्याकाराभ्यां **कृष्णकान्तरामभद्राभ्यां** तत्र स्वरूपासिद्धिरपि **योजिता**[८]। तथाहि तद्रीत्या 'गौः साक्षात्सम्बन्धेन आनयनक्रियावान् परम्परासम्बन्धेनानयनक्रियावत्त्वात्' इत्यनुमानं फलितम्। तत्र व्यभिचारस्वरूपासिद्धी स्फुटे एव। किन्तु 'आनयनं साक्षात्सम्बन्धेन गोवृत्तिपरम्परया गोत्ववृत्तित्वात्' इत्यनुमाने तु नोक्तदोषावकाशः इष्टसिद्धिश्च, आनयने गोवृत्तित्वे सिद्धे गोरानयनवत्त्वं सुतरां सिद्धमिति तु चिन्तनीयमेव। किन्तु गवि आनयनक्रियायाः सिषाधयिषितत्वे गोरेव पक्षत्वं युक्तमित्यभिप्रायेण तर्कालङ्कारैः तथाभिहितम् इति प्रतीयते।

किञ्च गामानयेत्यादितः गोविषयको गोत्वविषयकश्चैक एव बोधोऽनुभवसिद्धः। तद्यदि गोत्वज्ञानं शाब्दं गोभानञ्चार्थापत्तिरूपं तदा एकस्मिन्नेव ज्ञाने शाब्दत्वार्थापत्तित्वरूपविरुद्धधर्मद्वयसमावेशापत्तिः, शब्दानुपपत्त्योर्विजातीयज्ञानकरणत्वेन ताभ्यां सम्भूयैकज्ञानस्य जनयितुमशक्यत्वात्। न च तत्र क्रमेण ज्ञानद्वयोत्पत्तिः, अनुभवविरोधात्। अत एवानुभवविरुद्धं भाट्टानां गोबोधस्योत्तरकालिकतापक्षमुपेक्ष्य अनुपपत्तिसहकृतेन शब्देनैवौपादानिको गोव्यक्तिबोधः **श्रीकरेण समर्थितः**[९]। किन्तु सोऽपि पक्षो न युक्तिसहः, मिथो विरुद्धधर्मद्वयावच्छिन्नस्यैकस्य बोधस्यासम्भवात्[१०]।

व्यक्तेराक्षेपलभ्यत्वे तद्बोधस्य अनुभूयमानशाब्दत्वानुपपत्तिः, व्यक्तेः प्राधान्यानुभवविरोधश्चेति आक्षेपपक्षं परित्यज्य व्यक्तेर्लाक्षणिकत्वं, लाक्षणिकत्वे च तस्याः प्राधान्यं तद्बोधस्य शाब्दत्वञ्चेति भाट्टैकदेशिनो **मण्डनमिश्रपादा** आहुः। तेषामयमाशयः। पदानां जातौ शक्तिः, व्यक्तीनामनन्तत्वात् अन्यलभ्यत्वाच्च तत्र शक्त्यसम्भवात्। गामानयेत्यादितो जायमानः बोधः गङ्गायां घोष इत्यादित इव लाक्षणिकः, गोत्वशक्तस्य गोपदस्य गोत्वविशिष्टगोलक्षकत्वाभ्युपगमात्। न च गौर्गच्छति, गामानयेत्यादौ शक्यगोत्वे गमनादिक्रियान्वयानुपपत्तिरूपस्य लक्षणाबीजस्य सत्त्वेन लक्षणाया युक्तत्वेऽपि गां पश्यतीत्यादौ तदभावेन कथं लक्षणेति वाच्यं, काकेभ्यो दधि रक्ष्यतामित्याद्यनुरोधेन तात्पर्यानुपपत्तेर्लक्षणाबीजत्वात् तस्य चात्रापि सत्त्वात्। तदुक्तं तैः-

**जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति।**
**नित्यत्वात् लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे। इति।**

अत्र अस्तित्वनास्तित्वपदे उत्पादविनाशपरे। तथा च गौर्जायते, गौर्नश्यतीत्यादौ उत्पादविनाशयोः गोपदशक्यभूतायां नित्यायां गोत्वादिजातावन्वयासम्भवेन गोपदलक्ष्यभूताया गोव्यक्तेस्तयोर्विशेषणत्वं वाच्यमिति तात्पर्यम्।

नैतदपि युक्तं, तथाहि शुद्धगोत्वस्य शक्यत्वे एव तत्सम्बन्धिनि गवादौ लक्षणा वक्तुं शक्यते, शक्यसम्बन्धस्य लक्षणात्वात्, गोपदेन गोव्यक्त्यविषयक-गोत्वविषयकबोधस्य क्वाप्यदर्शनेन गोत्वस्य शक्यत्वासम्भवात्। न च गोभिन्नो महिषः इत्यादौ गोपदेन शक्त्योपस्थितस्य गोत्वस्य स्वावच्छिन्नप्रतियोगिताकत्व-सम्बन्धेन भिन्नपदार्थैकदेशे भेदेऽन्वय इति तत्र गोविनाकृते गोत्वे गोपदस्य मुख्यप्रयोगदर्शनेन तस्य शक्यत्वं सम्भवति, तथाच गामानयेत्यादौ तत्सम्बन्धात् गवादेर्लक्ष्यत्वं सुवचमिति वाच्यं, तत्रापि शक्यस्य गवादेरेव स्वनिष्ठगोत्वावच्छिन्न-प्रतियोगिताकत्वसम्बन्धेन भेदेऽन्वयस्वीकारेणापि निर्वाहात् गोत्वे शक्त्यङ्गीकारे मानाभावात्। न चौतत्पक्षे सम्बन्धशरीरे गौरवमिति वाच्यम्, अनन्तानां गामानयेत्यादि-वाक्यानाममुख्यार्थकत्वापत्तेरेतादृशगौरवस्याकिञ्चित्करत्वात्।

अत्र तर्कालङ्कारैः युगपद्वृत्तिद्वयापत्तिरपि उद्भाविता, एकत्रैव गोत्वस्य शक्त्या गोश्च लक्षणया बोधात् । किन्त्वेतद् विचारणीयम्। गोपदेन गोत्वविशिष्टत्वेनैव गोव्यक्तिर्लक्ष्यते, तेनैव रूपेण शक्यसम्बन्धस्य तत्र ग्रहात्। तथा च शाब्दबोधे गोत्वस्य न शक्त्या भानं किन्तु लक्ष्यान्तर्गततयैव। यत्र येन रूपेण शक्यसम्बन्धो गृहीतस्तस्य तेनैव रूपेण पदार्थोपस्थितौ शाब्दबोधे च भानाङ्गीकारात्। नहि लक्ष्यार्थ-

घटकतया शक्यार्थोपस्थितावपि वृत्तिद्वययौगपद्यमङ्गीक्रियते। अन्यथा तीरे गङ्गातीरत्वेन शक्यसम्बन्धे गृहीते गङ्गापदात् तेन रूपेण पदार्थोपस्थितौ गङ्गायां घोषः इत्यादावपि तदापत्तिः स्यात्। किन्तु एकस्मिन्नेव बोधे शक्यार्थस्य लक्ष्यार्थस्य च तत्पदात् स्वातन्त्र्येण यत्र भानं तत्रैव। तत्रापि एकधर्मावच्छिन्नवृत्तिद्वयोपस्थाप्यार्थान्वयबोध विषय एव तादृशनिषेधः, इतरथा गङ्गायां मीनघोषौ इत्यादावपि तत्प्रसक्त्यापत्तेः।

किञ्च घटत्वेनेमं जानामीत्यनुव्यवसायानुरोधेन शुद्धाया अपि जातेः समवाय-सम्बन्धेन प्रकारत्वस्यानुव्यवसाये स्वीकारावश्यकत्वेऽपि शाब्दबोधे तस्याः प्रकारतायाः समवायसम्बन्धावच्छिन्नत्वनियमः। अत एव अयं घटः इत्यादिज्ञानानां समवायेनैव प्रमात्वमिति सर्वजनसिद्धम्, अन्यथा शुद्धस्य घटत्वादेः समवायेनाप्रकारत्वे समवायेन घटत्वप्रकारकत्वाभावेन तस्याः समवायेन प्रमात्वं न स्यात्। तथा च प्रकृते गोभिन्नो महिषः इत्यादौ शुद्धस्य गोत्वस्य स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनान्वयो न सम्भवति। तस्मात् गोत्वविशिष्टो गौरेव गोपदवाच्यो न तु गोत्वमात्रमिति दिक्।।

## सन्दर्भाः


१. शब्दशक्तिप्रकाशिका, का. सं ३
२. वाक्यपदीयम्, ३/२
३. शब्दशक्तिप्रकाशिका, का-१७
४. न्यायसूत्रम्- २/२/६५
५. शब्दशक्तिप्रकाशिका, का-१७
६. शब्दशक्तिप्रकाशिका, का-१९
७. तदेव
८. तदेव पृ. सं.- ८५, ८६
९. तदेवपृ. सं. ८६
१०. तदेव
११. तदेव पृ.सं. ८९


✦✦✦

# अद्वैतसिद्धौ न्यायतन्त्रप्रभावः

–डॉ. आर्. बालमुरुगः
न्यायविभागाध्यक्षः, श्रीरघुनाथकीर्तिपरिसरः

अथ पुरुषार्थेषु अभ्यर्हितस्य निःश्रेयसस्य प्राप्त्युपायविधाने दत्तचित्तेषु दर्शनेषु मध्ये निरतिशयं स्थानं बिभर्ति वेदान्तदर्शनम्। सुप्रथितं वर्तते इदं यत्तस्मिन्नद्वैतवेदान्तदर्शने द्वैतिनां कुदूषणपेषणार्थं निर्विचिकित्सितरूपेण वेदान्तसिद्धान्तस्थापनाय च श्रीमधुसूदनसरस्वतीस्वामिपादैः प्रणीतं ग्रन्थरत्नमद्वैतसिद्धिः विद्वद्भिः महता गौरवेण समाद्रियते इति। न्यायशास्त्रीययुक्तिभूयिष्ठादस्माद् ग्रन्थात् कतिपयविचारसन्दर्भाणां विमर्शाधारेण न्यायतन्त्रस्य अद्वैतसिद्धौ प्रभावः इति शीर्षके शोधप्रबन्धं प्रणेतुं प्रयते।

प्रथमविप्रतिपत्तौ पक्षविशेषणविचारः – श्रुतिबलेन प्रपञ्चः मिथ्येति अद्वैतिनः व्यवस्थापयितुं प्रवर्तन्ते। प्रपञ्चः न मिथ्येति द्वैतिनः प्रत्यवतिष्ठन्ते। एवं विवादे प्राप्ते मतद्वयाभिप्रायबोधनायाद्वैतसिद्धावेवं विप्रतिपत्तिः प्रदर्शिता – **"तत्र मिथ्यात्वे विप्रतिपत्तिः ब्रह्मप्रमातिरिक्ताबाध्यत्वेसति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगि न वा"**[१] इति। मिथ्यात्वशब्दस्यार्थः भवति प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्, तच्च विप्रतिपत्तौ विधिकोटिरद्वैतिनां नेति तादृशप्रतियोगित्वाभावः निषेधकोटिः द्वैतिनां च वर्तते। ब्रह्मप्रमातिरिक्ताबाध्ये सत्त्वेन प्रतीत्यर्हे ब्रह्मणि मिथ्यात्वन्नास्तीति बाधवारणाय चिद्भिन्नत्वं पक्षे विशेषणमुपात्तं वर्तते। तथासति ब्रह्मणि चिद्भिन्नत्वाभावान्न बाधः। एवं चिद्भिन्ने तादृशाबाध्ये तुच्छे (शशविषाणादिकं यदलीकं तत्तुच्छमिति व्यपदिश्यते) मिथ्यात्वाभावेन प्रसक्तबाधवारणाय सत्त्वेन प्रतीत्यर्हत्वं विशेषणम्। सत्त्वेप्रकारकप्रतीतिविशेष्यत्वयोग्यत्वं तस्यार्थः। तुच्छे तदभावान्न दोषः।

चरमस्य ब्रह्मप्रमातिरिक्ताबाध्यत्वविशेषणस्य सार्थक्यविचारे सिद्धिकारैरेवं प्रतिपादितं यदत्र पक्षतावच्छेदकसामानाधिकरण्येन साध्यसाधनमभिप्रेतमुत पक्षतावच्छेदकावच्छेदेन। यदि प्रथमः पक्षः तदा पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तादृशसिद्धेः विरोधित्वमभ्युपगच्छतां मते सत्त्वेन प्रतीत्यर्हे चिद्भिन्ने शुक्तिरूप्ये मिथ्यात्वं मतद्वये सिद्धमिति सिद्धसाधनापत्तिः। शुक्तौ प्रतिभासमानरजतस्यापि पक्षतावच्छेदकाक्रान्ततया शुक्तिरूप्यं मिथ्येति निर्णयः अद्वैतिनां मिथ्यात्वानुमितौ

प्रतिबन्धकः इत्यतः नानुमितिस्संभवतीति भावः। अतः ब्रह्मप्रमातिरिक्ताबाध्यत्व-विशेषणमुपादेयं, शुक्तिरूप्यस्य ब्रह्मप्रमातिरिक्ताधिष्ठानतत्वसाक्षात्कारेण नेदं रजतं, इयं शक्तिरित्याकारकेण बाध्यत्वेन न शुक्तिरूप्यं पक्षकोटिप्रविष्टमिदानीमिति न सिद्धसाधनं प्रसज्यते।

इदमत्रावश्यं वाच्यं यदनुमितिः द्विधा वर्तते। पक्षतावच्छेदकसामानाधिकरण्येन साध्यावगाहिनी प्रथमा, तदवच्छेदकावच्छेदेन साध्यावगाहिनी द्वितीया। प्रथमा पक्षता-वच्छेदकसाध्ययोः सामानाधिकरण्यमात्रमवगाहते। अपरा पक्षतावच्छेदकव्यापकत्वं साध्येऽवगाहते। तच्च व्यापकत्वं न प्रकारतयानुमितौ भासते, किन्तु साध्यसंसर्ग-घटकतया। यथा पर्वतो वह्निमानित्यत्र पर्वतत्वव्यापकवह्निप्रतियोगिकसंयोगसंबन्धेन वह्निमान् पर्वतः इत्याकारिकानुमितिः द्वितीया भवति। अनुमितिवत् साध्यनिश्चयोपि द्विविधः भवति। प्रथमानुमितिं प्रति द्विविधसाध्यनिश्चयः प्रतिबन्धकः, द्वितीयानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यनिश्चयः एव प्रतिबन्धकः इत्यादिकं तत्वचिन्तामणौ पक्षताप्रकरणपर्यालोचनयावगन्तव्यम्।

परन्तु न कुत्रापि वेदान्तग्रन्थे अनुमितेः द्वैविध्यं प्रतिपादितं वर्तते। एवं स्थिते सिद्धिकाराणामित्थं लेखनं - **"अत्र च पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वात् पक्षैकदेशे साध्यसिद्धावपि सिद्धसाधनतेति मते शुक्तिरूप्ये सिद्धसाधनवारणाय ब्रह्मज्ञानेतराबाध्यत्वं पक्षविशेषणम्"**[२] इति न्यायशास्त्राध्ययनसंस्कारप्रभावेण सञ्जातिमिति सुस्पष्टं ज्ञायते। **"पक्षैदेशे साध्य-सिद्धावपि सिद्धसाधनतेति मते"** इति सिद्धिग्रन्थेन पक्षतावच्छेदकसामानाधिकरण्येन साध्यनिश्चयः तादृशानुमितिं प्रति प्रतिबन्धकः न भवतीति केषाञ्चिदभिप्रायः वर्तते इति अवगम्यते। यद्यपि उक्तसिद्धिग्रन्थेन तेषामभिप्रायः न स्फुटः तथापि पक्षता-प्रकरणपरामर्शेन मतविशेषस्य भावः स्पष्टः भवति। तथाहि पक्षतावच्छेदकसामाना-धिकरण्येन यस्मिन् धर्मिणि साध्यनिर्णयः वर्तते तत्रैव तादृशानुमितिः न भवितुमर्हति धर्म्यन्तरे तादृशानुमितिः निराबाधैव। विशेष्यतासंबन्धेन पक्षतावच्छेदकसामानाधिकरण्येन साध्यवत्तानिश्चयः विशेष्यतासंबन्धेन तादृशानुमितिं प्रति विरोधीति विषयनिष्ठप्रत्यासत्त्या वा प्रतिबध्यप्रतिबन्धकभावोऽभ्युपगम्यते। विशेष्यतासंबन्धेन यस्मिन् धर्मिविशेषे तादृशसाध्यनिर्णयः न वर्तते तत्र सुतरामनुमितिः जायते इति प्राचीननैयायिकैकदेशिनां मतं वर्तते।

मतमिदमनुसृत्य प्रतिबध्यप्रतिबन्धकभावे सङ्कोचः प्रादर्शि दीधितिकारैः पक्षतायाम्। यथा- **"यदि च पर्वतत्वसामानाधिकरण्येन एकत्र साध्यसिद्धावपि**

**विनाऽनुमित्सां अन्यत्र तादृशानुमितिः आनुभविकी तदा धर्मिविशेषोऽपि निवेश्यः नान्यथा**''[३] इति। पर्वतत्वेति कथनं प्रकृताभिप्रायेण। पक्षतावच्छेदकसामानाधिकरण्येनेति तस्यार्थः। पक्षतावच्छेदकसामानाधिकरण्येन तद्धर्मिविशेष्यकानुमितिं प्रति तादृशतद्धर्मि-विशेष्यकसाध्यनिर्णयः प्रतिबन्धकः इत्येवं धर्मिभेदेन प्रतिबन्धकता कल्पनीयेति तदर्थः।

एवञ्च सत्त्वेन प्रतीत्यर्हत्वविशिष्टचिद्भिन्नत्वसामानाधिकरण्येन शुक्तिरूप्ये मिथ्यात्वनिश्चयः तेन रूपेण घटादौ मिथ्यात्वानुमितिविरोधी न भवतीति स्वीकर्तृपक्षे ब्रह्मप्रमातिरिक्ताबाध्यत्वविशेषणं पक्षे न प्रवेश्यमिति भावः। न्यायशास्त्रीयसिद्धान्ता-नवलम्ब्य प्रकृतप्रसङ्गे पक्षविशेषणविचारः प्रवर्तते इत्यवधेयम्।

मिथ्यात्वानुमाने संदिग्धानैकान्तिकत्वनिराकरणे न्यायशास्त्रोपष्टम्भकताएतदनु सिद्धिकाराः प्रत्येकं वा विप्रतिपतिः इति ग्रन्थेन आकाशादिपक्षकविप्रतिपत्तीः प्रदर्श्य घटादौ संदिग्धानैकान्तिकत्वमाशङ्क्य तन्निराकरणाय संदिग्धानैकान्तिकत्वस्वरूपं निधार्य च नैयायिकानामेव सिद्धान्तमुपष्टम्भकतया स्वीयनिर्धारणे प्रादर्शयन्। तथाहि **"प्रत्येकं वा विप्रतिपत्तिः। वियत् मिथ्या न वा, पृथिवी मिथ्या न वेति। एवं वियदादेः प्रत्येकं पक्षत्वेऽपि न घटादौ संदिग्धानैकान्तिकता, पक्षसमत्वाद् घटादेः**''[४] इति।

अयं भावः – आकाशादिपक्षकमिथ्यात्वानुमाने घटे संदिग्धानैकान्तिकत्वस्या-वकाशः वर्तते इति भाति। संदिग्धानैकान्तिकत्वञ्च व्यभिचारसंशयः एव। व्यभिचार-संशयः व्याप्तिग्रहप्रतिबन्धनद्वारानुमितौ (परंपरया) विरोधी भवति। यथा धूमाभाववति वह्निः वर्तते न वेति संशयः वह्नौ धूमव्याप्तिनिर्णयप्रतिबन्धकः तथा प्रकृते मिथ्यात्वा-भाववति घटादौ दृश्यत्वमस्ति न वेति संशयः दृश्यत्वे मिथ्यात्वव्याप्तिग्रहप्रतिबन्धकः वाच्यः, तादृशः संशयः न प्रकृते वर्तते। दृश्ये घटेऽपि आकाशादितुल्यतया मिथ्यात्वसंशयः एव वर्तते। अतः अत्र व्याप्तिग्रहविरोधित्वेनाभिमतसंशयस्याकारः इत्थं वाच्यः दृश्यः घटः मिथ्यात्वाभाववान् नवा इति। निश्चितहेतुमति साध्यसंशयः अर्थात् साध्यप्रकारकसंशयविशेष्यीभूतधर्मिणि हेतोः वृत्तित्वनिश्चयः व्याप्तिग्रहप्रतिबन्धकः एव न भवति। पक्षे इवान्यत्रापि साध्यसंशयः अनुमितौ अनुकूलः एव न प्रतिकूलः भवति। अतः साध्यभावनिश्चयविशेष्ये धर्मिणि हेतोः वृत्तित्वसंशयः एव व्याप्तिग्रहविरोधित्वाद् व्यभिचारसंशयः भवति न पूर्वोक्तविपरीतः। इदमेव व्यभिचारसंशयस्य स्वरूपमित्यत्र प्राचीनतार्किकाणां मतं प्रमाणतयोपन्यस्तं वर्तते सिद्धिकारैः प्रकृतसन्दर्भे।

यथा **"अत एवोक्तं साध्याभावनिश्चयवति हेतुसंदेहे एव संदिग्धानैकान्तिकते"**[५] इति।

यद्यपि नव्यतार्किकैः साध्याभावनिश्चयवति धर्मिणि हेतोः वृत्तित्वसंशयः इव साध्यवत्तया संदिग्धे धर्मिणि हेतोः वृत्तित्वनिश्चयः अपि व्यभिचारसंशयः इत्यभ्युपगम्यते। तथाहि शक्तिरतिरिक्तः पदार्थः इति स्वीकर्तृभट्टमीमांसकमतनिराकरणाय शक्तिसाधकानुमानानि अनूद्य दूषितानि मणिकारैः। यथा वह्निः अद्विष्ठातीन्द्रियधर्मसमवायी दाहजनकत्वादित्यनुमाने हेतुरप्रयोजकः इति दूषणमभिहितम्। पक्षे हेतुरस्तु साध्यं मास्त्वित्याक्षेपः एव अप्रयोजकः हेतुरित्यस्यार्थः। प्रतिवादिनोद्भाविताक्षेपेण व्यभिचारसंशयः जायते। तस्य प्रागुक्तदिशानुमितिविरोधित्वं वाच्यम्। परन्तु वह्नौ पक्षे दाहजनकत्वरूपहेतुः निर्णीतः, साध्यमेव संदिग्धं वर्तते। तथाहि अद्विष्ठः (एकमात्रवृत्तिः) अतीन्द्रियः यः धर्मः शक्त्याख्यः, तत्समवायित्वं साध्यम्, तच्च न्यायमते वह्नौ नास्तीति मध्यस्थस्य (मीमांसकन्यायमतद्वयाकलनेन) वह्नौ साध्यसंशयः एव वर्तते। एवञ्च प्रकृते व्याप्तिग्रहविरोधित्वेन शक्तिसाधकानुमितिविघटकत्वेनोद्भावितव्यभिचारसंशयः न पूर्वोक्तादिशा साध्याभावनिश्चयवति हेतुसंशयः वर्तते, तद्विपरीतं साध्यवत्तया संदिग्धे वह्नौ हेतुनिर्णयः एव। अस्य व्यभिचारसंशयस्य व्याप्तिग्रहविरोधितयोपन्यासवत् मिथ्यात्वानुमाने कुतः घटादौ व्यभिचारसंशयः न विरोधित्वेन प्रयोक्तुं शक्यः इति शङ्का जायते। तथापि उभयोः अनुमानयोः अस्ति कश्चिद् विवेकः।

तथाहि यस्मिन्ननुमाने हेतुः व्याप्तिग्राहकतर्कसंवलितः वर्तते तत्र पूर्वोक्तः व्यभिचारसंशयः एव (निश्चितसाध्याभाववति हेतुसंशयः) एवानुमानविघटकः भवतीति स एव प्रतिवादिनोद्भावयितुं योग्यः। यत्र हेतुः न तथा (तादृशतर्कशून्यः) तत्र द्विविधव्यभिचारसंशयः अपि अनुमानविघटकः। एवं प्रतिवादिनापि यथाकामं द्विविधव्यभिचारसंशययोर्मध्ये एकः प्रयोक्तुं शक्यते।

प्रकृते मिथ्यात्वानुमाने दृश्यत्वादौ मिथ्यात्वव्याप्तिग्राहकतर्काणां सिद्धिकारैः वक्ष्यमाणत्वादत्र प्रथमः व्यभिचारसंशयः एव प्रयोक्तव्यः नान्यविधः इति द्वितीयस्य व्यभिचारसंशयत्वन्नास्तीति निराकरणं युज्यते। मीमांसकानां शक्तिसाधकहेतुः तादृशतर्कशून्यः इत्यतः मणिकारैः यथाकामं साध्यवत्तया संदिग्धे हेतुनिश्चयरूपः द्वितीयः व्यभिचारसंशयः उद्भावितः इत्यवगन्तव्यम्। तथा च सिद्धिकाराणां प्रकृतप्रसङ्गे व्यभिचारशङ्कानिराकरणाय न्यायतन्त्रसिद्धान्ताः महदुपकारकाः वर्तन्ते इति अवधेयम्।

श्रीगदाधरभट्टाचार्ययुक्त्या द्वितीयचतुर्थमिथ्यात्वयोः ऐक्यापत्तिनिराकरणम्-प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वमिति मिथ्यात्वस्य द्वितीयं स्वरूपमुक्तं वर्तते सिद्धिकारैः यद्द्वितीयमिथ्यात्वमिति नाम्ना प्रसिद्धम्। तस्य द्वितीयमिथ्यात्वस्य सिद्ध-साधनादिदोषवारणाय केचन परिष्कारा: विधेयाः भवन्ति येन तस्य स्वरूपं स्वात्यन्ता-भावाधिकरणे एव प्रतीयमानत्वमिति सिद्धिकारप्रोक्तचतुर्थमिथ्यात्वेन समानं संपद्यते। नचेष्टापत्तिः। भिन्नतयोपन्यस्तयोः मिथ्यात्वयोः परिष्कारः तथा विधेयः येन तयोः भेदः संरक्षितो भवेत्। द्वितीयचतुर्थमिथ्यात्वयोः भेवव्यवस्थापनाय श्रीमद्भिः विट्ठलेशोपाध्यायैः तादृशः उपायः अवलम्बितः यः उपायः श्रीगदाधरभट्टाचार्यैः पञ्चलक्षण्यां चतुर्थलक्षणे सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वरूपे संवर्णितः वर्तते। तं विचारसन्दर्भं समासेनात्र सङ्कलयामि।

प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं द्वितीयमिथ्यात्वम्। तस्यार्थः इत्थं वर्णितः ब्रह्मानन्दस्वामिपादैः **"प्रतिपन्नः स्वप्रकारकधीविशेष्यः यः उपाधिः अधिकरणं, तन्निष्ठो यस्त्रैकालिकनिषेधोऽत्यन्ताभावः, तत्प्रतियोगित्वमिति"**[६]। स्वपदेन मिथ्यात्वाश्रयः गृह्यते। शुक्तौ प्रतिभासमाने रजते लक्षणसमन्वयः इत्थं-स्वप्रकारिका धीः इदं रजतमिति तादात्म्येन रजतप्रकारिका प्रतीतिः, तद्विशेष्यः इदत्वेन भासमाना शुक्तिः, तन्निष्ठः अत्यन्ताभावः नेदं रजतमिति प्रतीतिसिद्ध-रजतसामान्याभावः, तत्प्रतियोगित्वं शुक्तिरूप्येऽस्तीति।

एवमपि वेदान्तिनः अवयवावयविनोः तादात्म्यं संबन्धः इति स्वीकुर्वन्ति इति तादाम्त्येन श्यामघटाश्रये कपाले संयोगेन घटो नास्तीति तादात्म्येन रक्तघटो नास्तीति च प्रतीत्या संयोगेन घटाभावप्रतियोगित्वं तादात्म्येन रक्तघटाभावप्रतियोगित्वञ्चादाय सिद्धसाधनापतिः। अतः स्वप्रकारकधीविशेष्य इत्यादेः यद्धर्मावच्छिन्नयत्संबन्धावच्छिन्न-प्रकारतानिरूपितविशेष्यतासमानाधिकरणात्यन्ताभावीयतद्धर्मावच्छिन्नतत्संबन्धावच्छिन्न-प्रतियोगित्वमिति परिष्कारः कर्तव्यः। एवं शुक्तौ रजतनिषेधस्य इयं शुक्तिः नेदं रजतमिति प्रतीतिसिद्धस्य रजतत्वावच्छिन्नतादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकस्य (तादात्म्येन रजतसामान्याभावस्य) प्रतियोगित्वं रजतसामान्ये एव वर्तते इति व्यावहारिकरजतेऽपि निष्कर्षितं मिथ्यात्वं सिद्धमिति सिद्धसाधनापत्तिः। अतः प्रतिपन्नोपाधौ सर्वत्र यः त्रैकालिकनिषेधः तत्प्रतियोगित्वमिति वक्तव्यम्। तथासति स्वप्रकारकधीविशेष्यसर्वान्तर्गतः व्यावहारिकरजतस्याधिष्ठानं रजतावयवोपि भवति। तत्र तादात्म्येन रजतसामान्याभावस्यासिद्धतया न दोषः।

एवं द्वैतिभिरपि घटादेरधिकरणे घटस्योत्पत्तेः पूर्वं तन्नाशानन्तरञ्च घटात्यन्ताभावस्य स्वीकारात्तदादाय (अर्थात् सामयिकात्यन्ताभावमादाय) सिद्धसाधनवारणाय त्रैकालिनिषेधः इत्युक्तम्। घटवति विद्यमानघटात्यन्ताभावः पराभ्युपगतः न त्रैकालिकः इति दोषः। एवञ्च सर्वत्रशब्दस्य व्यापकत्वार्थकतया द्वितीयमिथ्यात्वस्य स्वरूपमेवं संपन्नम्यद्धर्मावच्छिन्नयत्संबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यताव्यापकात्यन्ताभावीयतद्धर्मावच्छिन्नतत्संबन्धावच्छिन्नप्रतियोगित्वमिति।

चतुर्थमिथ्यात्वम्-स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं चतुर्थं मिथ्यात्वं भवति। अस्य द्वितीयवैलक्षण्यायैवमर्थः वर्णितः सिद्धिकारैः - **"तच्च स्वात्यन्ताभावाधिकरणे एव प्रतीयमानत्वम्। अतः पूर्ववैलक्षण्यम्"**[७] इति। मिथ्यात्वघटकैवकारः नान्ययोगव्यवच्छेदसमर्पकः। तथासति स्वात्यन्ताभावाधिकरणे प्रतीयमानत्वे सति स्वात्यन्ताभावाधिकरणान्यस्मिन्नप्रतीयमानत्वमिति पर्यवस्यति। मिथ्यात्वघटकस्वात्यन्ताभावः यदि स्वाश्रये वर्तते सुतरां स्वानाश्रये वर्तते इति तस्य केवलान्वयितया स्वात्यन्ताभावाधिकरणान्यः अप्रसिद्धः इति पर्यालोच्य प्रकृते एवकारः अशेषार्थकः अशेषत्वञ्च व्यापकत्वमित्याहुः श्रीब्रह्मानन्दस्वामिपादाः। यथा **"एवकारः अशेषार्थकः अशेषत्वं च व्यापकत्वम्"**[८] इति। असति बाधके उद्देश्यविधेयभावस्थले उद्देश्यतावच्छेदकव्यापकत्वं विधेये भासते इति व्युत्पत्तिः। तथा च स्वाश्रयस्य स्वाश्रयत्वेन प्रतीयमानार्थकतया स्वप्रकारकधीविशेष्यताव्यापकात्यन्ताभावप्रतियोगित्वं चतुर्थमिथ्यात्वं भवति। अत्रापि पूर्वोक्तपरिष्काराणां योजनया द्वितीयचतुर्थमिथ्यात्वयोः स्वरूपमभिन्नं जातमिति कथमनयोः वैलक्षण्यं व्यवस्थाप्यमिति शङ्कायां श्रीगदाधरभट्टाचार्यैः साकल्यघटितलक्षणे प्रदर्शितं रीतिमवलम्ब्य द्वयोः वैलक्षण्यं प्रतिपाद्यते।

तथाहि सकलसाध्याभावन्निष्ठाभावप्रतियोगित्वमिति पञ्चलक्षण्यां मणिकारैरनूदितं चतुर्थलक्षणं भवति यत्साकल्यघटितलक्षणमिति नाम्ना प्रथितम्। अस्मिन् लक्षणे साध्ये तदभाववति च साकल्यं विशेषणं भवति। अस्य लक्षणस्य स्वयं भट्टाचार्याः दीधितिकारमतानुसारेण सकलानि यानि साध्यानि तदभावाधिकरणं यद्यद् भवति, तत्तन्निष्ठाभावप्रतियोगित्वमिति परिष्कारं प्रादर्शयन्। तदनु सकलशब्दस्य व्यापकत्वे तात्पर्यं मन्वानानां श्रीमथुरानाथतर्कवागीशवर्याणां मतमनूद्य विमृष्टवन्तः। यथा

**"एतेन सकलशब्दस्य व्यापकत्वार्थकतया साध्याभावव्यापकीभूताभाव प्रतियोगित्वमेव एतल्लक्षणनिष्कृष्टार्थः"**[९] इति।

ततः इदमवगन्तव्यं यत्यद्यपि सकलशब्दस्य व्यापकत्वे शक्तिः प्रथिता तथापि प्रातिस्विकरूपेण यावद्व्यक्तिबोधनेपि सामर्थ्यमस्तीति। तथा प्रकृतेऽपि द्वितीयमिथ्यात्वे

श्रूयमाणेन सकलशब्दसमानार्थकसर्वत्र शब्देनापि प्रातिस्विकरूपेण यावदधिकरण-व्यक्तयः बोध्यन्ते। अत्र द्वितीयमिथ्यात्वे सर्वत्रशब्देन प्रातिस्विकरूपेण यावद्व्यक्तिबोधने एव भट्टाचार्याणां रीतिः अवलम्बितेति मया विवक्षितम्। एवञ्च स्वप्रकारकधी-विशेष्यत्वाधिकरणं यद्यद्, तत्तन्निष्ठाभावप्रतियोगित्वं द्वितीयं मिथ्यात्वं भवति। चतुर्थ-मिथ्यात्वम् एवकारबलेन व्यापकत्वघटितमिति व्यापकत्वघटकतयाऽधिकरणत्वरूप-सामान्यरूपेण स्वाश्रयव्यक्तयः प्रविष्टाः। तथा च स्वप्रकारकधीविशेष्यता-व्यापकात्यन्ताभावप्रतियोगित्वं चतुर्थं मिथ्यात्वं भवतीति द्वितीयचतुर्थमिथ्यात्वयोः वैलक्षण्यं वर्तते इति सर्वमनवद्यम्। उक्तञ्च विट्ठलेशोपाध्यायैः **"यद्यपि इदानीमुभयत्र विशेष्यविशेषणभावसाम्यं, तथापि पूर्वत्र यावत्पदेन प्रातिस्विकरूपेण तत्तद्-व्यक्तयो विवक्षिताः। अत्र तु व्यापकत्वमिति न पौनरुक्त्यं, स्पष्टा चेयं रीतिः साकल्यलक्षणे गादाधर्याम्"**[१०] इति।

**निगमनम्**-इत्थं स्थालीपुलाकन्यायेन कतिपयसन्दर्भाः अद्वैतसिद्धौ परामृष्टाः यत्र न्यायशास्त्रीयप्रणालिं सिद्धान्तञ्च स्वीकृत्य निष्कर्षः सिद्धिकारादिभिः समु-पस्थाप्यते। तेनेदं निगमनं प्राप्यते यदद्वैतसिद्धौ सुयोग्यः प्रभावः नव्यप्राच्यन्यायशास्त्रस्य वर्तते इति।।

## सन्दर्भग्रन्थसूची


१. अद्वैतसिद्धिः - पुटसंख्या- २०

२. अद्वैतसिद्धिः - पु. - २३,२५

३. अनुमानगादाधरी-पक्षताप्रकरणम्-पु.-१११२

४. अद्वैतसिद्धिः - पु. -२७,२८

५. अद्वैतसिद्धिः - पु. - २९

६. अद्वैतसिद्धिः - पु. ९४

७. अद्वैतसिद्धिः - पु. - १८२,१८३

८. अद्वैतसिद्धिः - पु. - १८२

९. पञ्चलक्षणी - चतुर्थलक्षणम्

१०. अद्वैतसिद्धिः - पु. - १८३


✦✦✦

# आयुर्वेद में न्यायशास्त्रीय सिद्धान्त

**प्रो. विजयपालशास्त्री**
(आचार्य, साहित्यविभाग) राष्ट्रियसंस्कृतसंस्थानम्
वेदव्यास-परिसर, बलाहर, कांगड़ा (हि.प्र.)

न्याय-वैशेषिक समान तन्त्र के रूप में विख्यात हैं। इनके मूल सिद्धान्तों का आयुर्वेद में पद-पद पर प्रयोग मिलता है। औषधीय द्रव्यों, उनके गुणों एवं कर्म पर ही आयुर्वेद का सारा चिकित्सा तन्त्र आधारित है। 'सामान्य' और 'विशेष' के आधार पर ही चिकित्सा का क्रम प्रवृत्त होता है। चरकसंहिता के आरम्भ में ही मूल विषय-प्रतिपादन की दृष्टि से सामान्य-विशेष के आधार पर चिकित्सा का विशिष्ट सूत्र इस प्रकार प्रस्तुत किया गया है-

**सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम्।**
**ह्रासहेतुर्विशेषश्च प्रवृत्तिरुभयस्य तु।।**

(चरकसंहिता, सूत्रस्थानम्- १.४४)

अर्थात् 'सामान्य' सदा ही सभी पदार्थों की वृद्धि का कारण होता है और 'विशेष' ह्रास का हेतु होता है। दोनों की ही प्रवृत्ति दिखाई देती है। 'भवन्तीति भावाः, द्रव्यगुणकर्माणीत्यर्थः' (चक्रपाणिदत्तः)। अर्थात् सामान्य सभी भावों अर्थात् द्रव्यों, गुणों व कर्मों की वृद्धि का कारण होता है और विशेष इनके ह्रास का कारण होता है। दोनों की प्रवृत्ति शरीर में भी देखी जाती है। शरीर के दोषों धातुओं एवं मलों के विषय में भी यह सूत्र लागू होता है।

वात का गुण रूक्ष व शीतल होता है। यदि कोई व्यक्ति रूक्ष व शीतल गुण वाले पदार्थों का अधिक मात्रा में सेवन करता है तो वातदोष बढकर नाना वातजन्य विकारों को प्रकट कर देता है। जैसे जोड़ों में दर्द, शरीर में रूक्षता आदि। यदि कोई व्यक्ति वात के पूर्वोक्त रूक्ष एवं शीत गुण के विरुद्ध गुणों वाले आहार-द्रव्यों का सेवन करता है तो वात का शमन होता है और वातजन्य विकार शान्त हो जाते हैं। यदि किसी व्यक्ति के शरीर में या अङ्गसन्धियों में पीड़ा होती है तो उसे तैल का अभ्यङ्ग (मालिश) करना चाहिए। तैल में स्निग्धता एवं

उष्णता का गुण होता है। जो वात के रूक्ष एवं शीत गुण का विरोधी है। अत: 'विशेष' का प्रयोग होने पर उनका ह्रास होने लगता है। इस प्रकार शरीर में होने वाली पीड़ा का निवारण हो जाता है। शीतकाल में समान गुण वाले वात की अधिक वृद्धि होने से जोड़ों का दर्द प्रायः अधिक होता है। अतः आयुर्वेद में शीतकाल में तैलाभ्यङ्ग का विशेष रूप से विधान किया गया है। सरसों या तिल का तैल लें और इससे अभ्यङ्ग करें, तदुपरान्त व्यायाम करें। तत्पश्चात् उष्ण जल द्वारा अच्छी प्रकार से शरीर की सिकाई करते हुए स्नान करें। इससे वात का शमन और सन्धिशूल आदि वातविकारों का निवारण हो जाता है। शरीर हल्का व स्फूर्तिमान् हो जाता है। इसका कारण यही है कि तैल का स्निग्ध एवं उष्ण गुण वात के रूक्ष एवं शीत गुण को शान्त कर देता है। कहा भी है-

**न तैलसदृशः स्नेहो मारुतस्य निवर्हणे।**
**नैव तैलञ्च वातश्च चिरं गात्रेषु तिष्ठतः।।**

(योगशतवैद्यवल्लभा-९४, पृ. ३६९)

अर्थात् तैल के समान कोई अन्य स्नेह नहीं है, जो वात का शमन करता हो। अभ्यङ्ग द्वारा अङ्गों में तैल के रमने के बाद वात-विकार बहुत देर तक नहीं ठहर सकता है। इसी विषय में एक अन्य श्लोक काशिका में **पद्दन्नोमास्०** (६.१.६३) सूत्रवृत्ति में उद्धृत है, जो मूलतः सुश्रुतसंहिता का है-

**व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च।**
**व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः।।**

(सुश्रुतसंहिता, चिकित्सास्थान- २४.४२)

अर्थात् जो व्यक्ति व्यायाम से शरीर को थका देता है और पैरों पर विशेष रूप से मालिश करता है, उसके पास रोग इसी प्रकार नहीं फटकते जिस प्रकार गरुड़ के पास सर्प। इस रीति से सामान्य-विशेष के आधार पर आयुर्वेद में चिकित्सा की प्रक्रिया सम्पन्न होती है।

पित्तजन्य रोगों के विषय में भी इसी सूत्र से चिकित्सा की जाती है। पित्त का गुण उष्ण व तीक्ष्ण होता है। उष्ण व तीक्ष्ण पदार्थों के अधिक सेवन से उदर में अम्लता (एसिड), खट्टी डकार आना, जलन, अल्सर आदि विकार होते हैं। जो व्यक्ति उक्त पदार्थों के अतिसेवन का परित्याग कर शीतल व मधुर पदार्थों का सेवन करता है, उसके पूर्वोक्त विकार शान्त हो जाते हैं। इस सूत्र के आधार पर व्यक्ति अपनी चिकित्सा स्वयं भी कर सकता है। वह स्वयं यह भी अनुभव कर

सकता है कि जलन, अल्सर आदि विकार तब अधिक बढ़ जाते हैं, जब वह उष्ण व तीक्ष्ण गुण वाले पदार्थों का अधिक मात्रा में सेवन होता है। क्योंकि 'सामान्य' उनकी वृद्धि का कारण हो जाता है। ऐसी स्थिति में उसे 'विशेष' का प्रयोग करना चाहिए। अर्थात् पित्त के गुणों के विपरीत शीतल व मधुर गुण वाले पदार्थों का सेवन करना चाहिए। जैसे कि उबालकर शीतल किए दुग्ध का सेवन। दुग्ध का गुण स्निग्ध, शीतल व मधुर है। जो व्यक्ति दिन में दो बार उचित अन्तराल पर उक्त प्रकार के दुग्ध का पान करता है, उसके पूर्वोक्त पित्तजन्य विकार शान्त हो जाते हैं। इसी प्रकार अम्लता का विरोधी तिक्त (कड़वा) रस है। जो अम्लता के प्रति 'विशेष' रूप में विद्यमान होता है। जिन व्यक्तियों को भयंकर अम्लता, एसिड एवं अल्सर का कष्ट है, वे यदि तिक्त (कड़वा) रस का सेवन करें तो यह विकार शीघ्र शान्त हो जाता है। मान लिजिए आपके कण्ठ को जलाने वाली अति खट्टी डकारें आती हैं। खाए गए भोजन के विदग्ध होने से तेजाब जैसा अम्ल बन जाता है, तो आप एक मुट्ठी भर नीम के कच्चे पत्ते लें और उन्हें चबाकर ऊपर से एक गिलास शीतल जल पी लें। आप इसका चमत्कारी प्रभाव तत्काल ही देखेंगे कि अम्लता तुरन्त कम हो गयी है और जलन शान्त हो गयी है। इस प्रकार कुछ दिन तक करने से अम्लता एवं अम्लपित्त रोग शान्त हो जाता है, परन्तु साथ में पथ्य रखना आवश्यक है। क्योंकि पथ्य होने पर ही सामान्य-विशेष का सूत्र ठीक से काम करता है। कहा भी है-

**पथ्ये सति गदार्त्तस्य किमौषधनिषवणैः।**
**पथ्येऽसति गदार्त्तस्य किमौषधनिषवणैः।।**

(माधवचिकित्सा- १.२२)

अर्थात् जो रोगकारक दोष है, उसके सामान्य (समानता वाले) द्रव्य, गुण कर्मों के परित्याग और उसके विपरीत द्रव्य-गुण-कर्मों के सेवन से रोग स्वयं ही शान्त हो जाता है। ऐसा करने वाले व्यक्ति को विशिष्ट औषध-सेवन की आवश्यकता नहीं रहती। जो व्यक्ति औषध-सेवन तो करता है, परन्तु जिस दोष के बढ़ने से रोग हुआ है, उसके सामान्य (समान गुणों वाले) आहार-विहार को नहीं छोड़ता है तो उसका 'विशेष' रूप औषध कारगर नहीं हो पाता है। अतः सामान्य-विशेष सूत्र के अनुसार अपथ्य का परित्याग और पथ्य का सेवन रोग-निवारण के लिए बहुत ही महत्त्वपूर्ण माना गया है। इस तथ्य को गौरव प्रदान करते हुए आचार्यों ने यहाँ तक कह दिया है-

**विनापि भेषजैर्व्याधिः पथ्यादेव निवर्तते।**
**न तु पथ्यविहीनस्य भेषजानां शतैरपि।।**

(माधवचिकित्सा- १.२१)

अर्थात् औषध के बिना ही केवल पथ्याहार से रोग दूर हो जाता है, परन्तु जो व्यक्ति पथ्य नहीं करता, उसका रोग सैंकड़ों औषधों से भी दूर नहीं हो सकता है। इस प्रकार सामान्य-विशेष पर आधारित पथ्याहार को आयुर्वेदाचार्यों ने सबसे बड़ा भैषज्य माना है। काश्यपसंहिता में कहा गया है-

**न चाहारसमं किञ्चिद् भैषज्यमुपलभ्यते।**
**शक्यतेऽप्यन्नमात्रेण नरः कर्त्तु निरामयः।।**
**भेषजेनोपपन्नोऽपि निराहारो न शक्यते।**
**तस्माद् भिषग्भिराहारो महाभैषज्यमुच्यते।।**

(काश्यपसंहिता, खिलस्थान- ४.५-६)

अर्थात् आहार के समान अन्य कोई औषध नहीं है। उचित एवं पथ्य आहार से ही व्यक्ति को स्वस्थ किया जा सकता है, उसके रोगों को दूर किया जा सकता है। औषध-सेवन करते हुए भी व्यक्ति आहार के बिना नहीं रह सकता, अतः चिकित्सक जन आहार को ही महाभैषज्य कहते हैं। आहार-भैषज्य की यह विधि सामान्य-विशेष वाले पूर्वोक्त चिकित्सा-सूत्र पर ही आधारित है।

आज के युग में मधुमेह, स्थौल्य (मोटापा) एवं उच्चरक्तचाप (हाई ब्लडप्रैशर)- ये रोग बहुत प्रसारित हो गये हैं। इनसे बचाव के लिए भी सामान्य-विशेष का चिकित्सा-सूत्र बहुत उपयोगी है और इन रोगों के होने पर इनके उपचार में भी यही चिकित्सा-सूत्र कारगर है। आयुर्वेदीय ग्रन्थों में बताया गया है कि व्यायाम एवं शारीरिक श्रम का अभाव, दिन में सोना तथा स्निग्ध एवं मधुर पदार्थों का अतिसेवन मधुमेह एवं स्थौल्य (मोटापा) का मुख्य कारण है। जो व्यक्ति इन कारणों से बचते हुए अपनी जीवनचर्या को श्रमशील बनाता है और स्निग्ध-मधुर पदार्थों के अतिसेवन से बचता है, वह मधुमेह एवं स्थूलता के रोग से मुक्त रहता है। यदि ये रोग हो जाएं तो भी इसी सूत्र के अनुसार इनकी चिकित्सा की जाती है। रोग के जो सामान्य द्रव्य, गुण, कर्म हैं, उन्हें छोड़कर उनके विपरीत द्रव्य, गुण, कर्मों का सेवन किया जाए तो मधुमेह एवं मोटापा नियन्त्रित हो जाता है। उदाहरणार्थ आहार-द्रव्यों में यव (जौ), चना, आंवला, करेला, पत्रशाक, त्रिफला आदि द्रव्यों का सेवन, प्रातः भ्रमण, अभ्यंग व्यायाम,

आसन, प्राणायाम, ध्यान, उष्णजलस्नान, दिवाशयन-त्याग, शारीरिक श्रम व लघु भोजन से ये रोग शीघ्र ही नियन्त्रित हो जाते हैं।

जिह्वारसासक्ति के कारण बहुत अधिक उष्ण, नमकीन एवं चटपटे पदार्थों का अधिक मात्रा में निरन्तर लम्बे समय तक सेवन करते रहने से रक्त में पित्तजन्य उष्णता बढ़ जाती है और उच्चरक्तचाप (हाईब्लडप्रैशर) का रोग घेर लेता है। इसके निवारण के लिए पूर्वोक्त पदार्थों के सेवन से बचना आवश्यक है। लवण के रूप में सैन्धव लवण का ही थोड़ी मात्रा में सेवन करें। भोजन सादा एवं सात्त्विक रखें। अधिकांश भोजन में अनार, अमरूद, पपीता आदि फल, गाय का दूध, दधि एवं तक्र तथा उबली सब्जियां होनी चाहिए। बहुत गरिष्ठ, तले, भुने, भारी भोजन से सदैव दूर रहना चाहिए। मांस, मदिरा एवं अन्य मादक पदार्थों का तो सर्वथा परित्याग होना चाहिए। इससे रक्त की उष्णता कम होगी और उच्चरक्तचाप स्वयं ही दूर हो जायेगा। जो उच्चरक्तचाप से बहुत अधिक पीड़ित हैं, वे व्यक्ति यदि तीन दिन तक फलाहार करें तो चमत्कारी असर होता है और उच्चरक्तचाप एकदम शान्त हो जाता है। फलों में अनार, अमरूद, पपीता मुख्य रहें। बहुत शर्करा वाले केला आदि फल वर्जित हैं। यदि भोजन में फलों, उबले शाक और गोरस की मात्रा अधिक रहे एवं अन्न की मात्रा कम रहे तो उच्चरक्तचाप की सम्भावना ही नहीं रहती है। यह सहज चिकित्सा है, जो पूर्वोक्त सामान्य-विशेषसूत्र पर आधारित है।

यहाँ आरोग्य विषयक आयुर्वेद के कुछ विशिष्ट उपदेश प्रस्तुत किए जा रहे हैं, जो जनसामान्य के लिए बहुत ही उपयोगी है- अच्छी भूख लगना स्वास्थ्य के लिए परमावश्यक है। कहा भी है-

**अग्निमूलं बलं पुंसां रेतो मूलं च जीवितम्।**
**तस्मात् सर्वप्रयत्नेन वह्निं शुक्रञ्च रक्षयेत्।।**

अर्थात् मनुष्यों का शारीरिक बल जठराग्नि-मूलक होता है और जीवन शुक्रमूलक होता है। अतः सर्वप्रयत्न से जठराग्नि एवं शुक्र की रक्षा करनी चाहिए। नित्य व्यायाम करने एवं समय पर हितकर व मित भोजन करने से भूख अच्छी लगती है और संयम (ब्रह्मचर्य) से शुक्र (वीर्य) की रक्षा होती है। इस विषय में प्रत्येक व्यक्ति को अवश्य ही जागरूक रहना चाहिए। भूख को जागृत करने का एक अन्य उपाय इस प्रकार है-

**भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम्।**
**अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम्।।**

(भा.प्र.नि.- १.५१)

भोजन के आरम्भ में सैन्धव लवण के साथ थोड़ी मात्रा में अदरक का सेवन सदा पथ्य (हितकर) होता है। यह अग्नि-सन्दीपन, रुचिकारक तथा जिह्वा एवं कण्ठ को शुद्ध करने वाला होता है। इससे भोजन में रुचि जागृत होती है एवं पाचन भी अच्छे प्रकार से होता है।

**अरुचि एवं मन्दाग्नि का मुख्य कारण अतिभोजन-**

अतिमात्र आहार भी अरुचि एवं मन्दाग्नि का एक मुख्य कारण है। अत: इसका निवारण भी अरुचि की चिकित्सा में आवश्यक माना गया है। अतिभोजन से वात, पित्त, कफ- ये तीनों दोष प्रकुपित हो जाते हैं व अपच होकर भोजन में अरुचि हो जाती है। इसके निवारण के लिए लंघन (एक या दो काल का उपवास) सर्वोत्तम उपाय है। उपवास में थोड़ी-थोड़ी मात्रा में उबालकर रखा हुआ हल्का उष्ण जल पीते रहना चाहिए। इससे अपच दूर हो जाती है तथा भोजन में पुन: रुचि जागृत हो जाती है। मिताहारी व्यक्ति को अरुचि की समस्या का सामना नहीं करना पड़ ता है। अत: भोजन में रुचि व स्वाद बना रहे, इसके लिए मिताहार सर्वाधिक महत्त्वपूर्ण है। इस विषय में व्यक्ति को विशेष रूप से जागरूक रहना चाहिए। कहा भी है-

**एकभुक्तं सदारोग्यं द्विभुक्तं बलवर्धनम्।**
**त्रिभुक्तं च सदारोगं चतुर्भुक्तं तु मारकम्।।**

(द्रव्यरत्नाकरनिघण्टु, दिनऋतुचर्यादिवर्ग-८)

एक बार भोजन करना सदा आरोग्यकारक होता है, दो बार भोजन करना बलवर्द्धक होता है। तीन बार भोजन करना सदा रोगकारक होता है तथा चार बार भोजन करना तो साक्षात् मारक ही बन जाता है।

एक बार भोजन को सदा आरोग्यकारक इसलिए बताया है कि ऐसा करने से भोजन का पाचन पूर्णतया हो जाता है। तेज भूख लगती है और तीव्र जठराग्नि प्रतिदिन ही रोगकारक दोषों व मलों को जला देती है। अत: रोग होने का अवसर ही नहीं आता है। ढलती उम्र में भी एक बार भोजन करना तथा दूसरे समय हल्का फलाहार या दुग्धाहार लेना आरोग्य व दीर्घायु के लिए बहुत उत्तम होता

है। बढ़ती नई उम्र में तथा युवावस्था में दो बार भोजन करना चाहिए। यह बलवर्द्धक होता है। तीन बार के भोजन से तो प्रायः अजीर्ण हो जाता है। उससे आमाशय में मल कुपित हो जाते हैं तथा वे ही सब रोगों के कारण बनते हैं। जैसा कि कहा है-

**सर्वेषामेव रोगाणां निदानं कुपिता मलाः।**

(माधवनिदानम्- १.१४)

अर्थात् कुपित हुए मल ही सब रोगों के कारण होते हैं। एक काल भोजन करने वाले को अजीर्ण होने या मलों के कुपित होने की सम्भावना प्रायः नहीं होती है।

बच्चों को भी प्रातराश (नाश्ते) में फल व दूध आदि लघु व सात्त्विक भोज्य देना चाहिए। इससे वे सदा स्वस्थ व स्फूर्तिमान् रहते हैं। नाश्ते में फल व दूध आदि पेय को छोड़कर अन्नमय भोज्य रोटी आदि, बिस्किट अथवा पराठा आदि तले हुए भारी भोज्य देने से अजीर्ण की सम्भावना रहती है तथा बच्चों में मोटापा आदि विकार बढ़ते हैं। बाल्यकाल में भी तीनों समय अन्न-बहुल भोजन देने से अम्लता की वृद्धि होती है, जो रोगों का कारण बनती है। अतः बच्चों को नाश्ते में फल, दूध आदि देना ही अधिक उचित है। प्रौढ़ लोगों द्वारा एककाल-भोजन करने से तो अजीर्ण की सम्भावना ही नहीं रहती, अतः इसे सदा आरोग्यकारक कहा गया है।

स्वास्थ्य के लिए आहारमात्रा का ज्ञान आवश्यक है। आयुर्वेद में अतिभोजन-जन्य दोषों का यथार्थ चित्रण करते हुए मितभोजन का महत्त्व बताया गया है।

मनुष्य को मात्राशी (मात्रायुक्त भोजन करने वाला) होना चाहिए। भोजन की मात्रा अग्निबल (पाचनशक्ति) के अनुसार होती है। जितना भोजन सहज स्थिति को बाधित न करते हुए यथासमय पच जाता है, वही मात्रा का उचित प्रमाण जानना चाहिए।

**तत्र शालि-षष्टिक-मुद्गादीन्याहारद्रव्याणि प्रकृतिलघून्यपि मात्रा-पेक्षीणि भवन्ति। तथा पिष्टेक्षु-क्षीरविकृति-तिल-माषादीन्याहारद्रव्याणि प्रकृतिगुरूण्यपि मात्रामेवापेक्षन्ते।**(चरकसंहिता, सूत्रस्थान-५.५)

शालि (चावल), षष्टिक (साठी चावल), मूंग आदि आहार द्रव्य स्वभावतः

लघु होते हुए भी मात्रा की अपेक्षा रखते हैं, अर्थात् भले ही ये पचने में हल्के हैं, तथापि इन्हें मात्रा में ही खाना चाहिए। अतिमात्रा में खाने से तो ये भी अजीर्णकारक होने से बहुत हानि करते हैं।

इसके अतिरिक्त आटे से बने हुए (रोटी, पूरी, हलुआ आदि), इक्षुविकार (गुड़ , शक्कर आदि), क्षीरविकार (खीर, मलाई, खोआ आदि) तथा तिल व माष (उड़द) से बने आहारद्रव्य स्वभावतः गुरु (पचने में भारी) होते हैं। इन्हें पूर्वोक्त लघु भोज्यों की मात्रा से अल्प मात्रा में ही खाना चाहिए।

**मात्रावद्ध्यशनमशितमनुपहत्य प्रकृतिं बलवर्णसुखायुषा योजयत्युपयोक्तारमवश्यमिति।।** (चरकसंहिता, सूत्रस्थान-५.८)

इसलिए उचित मात्रा में लिया भोजन ही व्यक्ति की प्रकृति को बाधित न करते हुए उसे बल, वर्ण व सुखायु (सुखी जीवन) से युक्त करता है।

**गुरु पिष्टमयं तस्मात्तण्डुलान् पृथुकानपि।**
**न जातु भुक्तवान् खादेन्मात्रां खादेद् बुभुक्षितः।।**

(चरकसंहिता, सूत्रस्थान-५.९)

मिष्टान्न आदि गुरु पदार्थ, आटे के बने भोज्य पदार्थ, भात व पृथुक (चिउड़ा) आदि को एक बार खाने के उपरान्त कभी भी भोजन-काल से पहले दोबारा नहीं खाना चाहिए। भूख लगने पर भोजन-काल में भी उचित मात्रा में ही खाना चाहिए, अधिक नहीं।

**तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते।**
**अजातानां विकाराणामनुत्पत्तिकरं च यत्।।**

(चरकसंहिता, सूत्रस्थान-५.१३)

उन पदार्थों का नित्य सेवन करना चाहिए, जिनसे स्वास्थ्य बना रहता है तथा जो अजात (अब तक न उत्पन्न हुए) विकारों को उत्पन्न नहीं होने देते। इस प्रकार के पदार्थ स्वभावतः हितकर आहारद्रव्य माने जाते हैं। इनमें लोहित शालि (लाल चावल), षष्टिक (साठी चावल), जौ, मूंग, सैन्धव लवण, अनार, आंवला, मुनक्का, बथुआ, जीवन्ती (डोडी) शाक, गाय का दूध, गाय का घी, तिल का तेल एवं वृष्टिजल (वर्षा का स्वच्छतापूर्वक एकत्र किया जल) आते हैं। स्वभावतः अहितकर पदार्थों के अन्तर्गत उड़द, ऊषरभूमि का लवण, बड़हल का फल व सरसों का शाक आता है।

इस प्रकरण के अन्तर्गत चरकसंहिता में इस तथ्य को भी रेखांकित किया है कि उड़द व दही का नित्य सेवन नहीं करना चाहिए-

**दधि च माषांश्च न शीलयेत्**

उड़द यद्यपि बलवर्धक होता है, तथापि पचने में भारी तथा कफपित्त-जनक होता है, अतः इसका नित्य सेवन निषिद्ध है। दही भी यद्यपि स्वास्थ्य के लिए उपयोगी है, तथापि वर्षा, हेमन्त एवं शिशिर में ही सेवनीय होता है। आयुर्वेद के अनुसार वसन्त, ग्रीष्म व शरद् में दही के सेवन से बचना चाहिए। क्योंकि कफपित्तकर होने से कफप्रकोप वाली वसन्त तथा पित्त के संचय व प्रकोप वाली ग्रीष्म एवं शरद् ऋतुओं में दही के सेवन से विकार की सम्भावना रहती है। इस विषय में अन्यत्र भी कहा है-

**कफपित्तकरो माषः कफपित्तकरं दधि।**

(भावप्रकाश-निघण्टु-८.४४)

अर्थात् उड़द व दही दोनों ही कफपित्तकर होते हैं, अतः इनका पूरे वर्ष निरन्तर सेवन निषिद्ध किया है।

**दिन में सोना भी अरुचि व मन्दाग्नि का कारण-**

ग्रीष्म ऋतु को छोड़ कर अन्य ऋतुओं में दिन में सोना बहुत हानिकारक होता है, विशेष रूप से दिन के भोजन के बाद तुरन्त सोना। इससे अतिमात्रा में बढ़ा हुआ कफ जठराग्नि को मन्द कर देता है। कहा भी है-

**'ग्रीष्मवर्ज्येषु कालेषु दिवास्वापो निषिध्यते'।**

अर्थात् ग्रीष्म ऋतु को छोड़ कर अन्य ऋतुओं में दिन में सोना निषिद्ध है॥ क्योंकि यह सर्वदोषप्रकोपक होने से अति हानिकारक है। अन्यत्र भी कहा है-

**'भुक्तमात्रस्य शयनाद् हन्त्यग्निं कुपित कफः'।**

अर्थात् भोजन करते ही दिन में सोने से अति कुपित हुआ कफ जठराग्नि को नष्ट कर देता है। सुश्रुतसंहिता में भी कहा है-

**सर्वर्तुषु दिवास्वाप प्रतिषिद्धोऽन्यत्र ग्रीष्मात्। विकृतिर्हि दिवास्वप्नो नाम, तत्र स्वपतामधर्मः सर्वदोषप्रकोपश्च, तत्प्रकोपाच्च कास-श्वास-प्रतिश्यायशिरोगौरवाङ्गमर्दारोचक-ज्वराग्निदौर्बल्यानि भवन्ति।** (सुश्रुतसंहिता, शारीरस्थान- ४.३८)

अर्थात् दिन में सोना एक विकृति है। दिन में सोने वालों को अधर्म (पाप) लगता है तथा वात, पित्त व कफ- ये तीनों दोष प्रकुपित हो जाते हैं। इससे कास (खाँसी), श्वास (दमा), प्रतिश्याय (जुकाम), शिर में भारीपन, अंगों में टूटन, ज्वर, अरुचि व मन्दाग्नि इत्यादि उपद्रव होते हैं। अतः ग्रीष्म ऋतु को छोड़ कर अन्य ऋतुओं में दिन में सोने से बचें।

ग्रीष्म ऋतु में रात छोटी तथा दिन लम्बे होते हैं। प्रचण्ड आतप (धूप) के कारण वातावरण व शरीर में रूक्षता आ जाती है। अत दिन में सोना उचित माना है॥ क्योंकि इससे शरीर में स्निग्धता व तरावट आती है तथा दोषों का सन्तुलन बना रहता है। आयुर्वेद के अनुसार बाल, वृद्ध, रोगी व रात में आजीविका-कार्य करने वालों के लिए दिन में सोना मान्य है।

**तन-मन के स्वास्थ्य का अमोघ उपाय मिताहार -**

पूर्व प्रस्तुत विवेचन से स्पष्ट है कि अतिभोजन व दिवाशयन आदि आमदोष व अरुचि के मुख्य कारण हैं। इनसे बचते हुए मिताहार को अपनाएं। आयुर्वेद ही नहीं, अध्यात्मविद्या के ग्रन्थों में भी मिताहार की उपादेयता व महत्त्व का प्रतिपादन किया गया है। यहां हम महाकवि अश्वघोष-विरचित सौन्दरनन्द नामक मोक्षमार्ग-प्रतिपादक महाकाव्य से मिताहार-विषयक कुछ उद्धरण प्रस्तुत कर रहे हैं, जो स्वास्थ्य व आध्यात्मिक उन्नति चाहने वालों के लिए बहुत ही मार्मिक रूप में प्रेरणाप्रद हैं-

## सौन्दरनन्दम्, सर्ग-१४, श्लोक-१-१२

**अथ स्मृतिकवाटेन पिधायेन्द्रियसंवरम्।**
**भोजने भव मात्राज्ञो ध्यानायानामयाय च।।१।।**

स्मृति (जागरूकता) रूपी किवाड़ से इन्द्रियरूपी द्वारों को बन्द करके अर्थात् इन्द्रियों को वश में करके ध्यान और आरोग्य के लिए भोजन की समुचित मात्रा जानो अर्थात् मितभोजन करो। क्योंकि अतिभोजन व अत्यल्प भोजन, ये दोनों ही आरोग्य व ध्यान-साधना में बाधक होते हैं।

**प्राणापानौ निगृह्णाति ग्लानिनिद्रे प्रयच्छति।**
**कृतो ह्यत्यर्थमाहारो विहन्ति च पराक्रमम्।।२।।**

यदि अधिक भोजन किया जाए तो वह प्राण व अपान की गति को बाधित

करता है, आलस्य और नींद लाता है तथा पराक्रम (उद्यमशीलता) को नष्ट कर देता है।

योग-साधना में प्राणायाम का अभ्यास बहुत आवश्यक है, क्योंकि इससे तन-मन के विकार नष्ट हो जाते हैं, रजोगुण व तमोगुण की प्रवृत्तियाँ क्षीण हो जाती हैं। सात्त्विकता बढ़ती है। मन एकाग्र होने लगता है तथा धारणा-ध्यान की योग्यता आ जाती है। प्रस्तुत पद्य में स्पष्ट रूप से कहा है कि अति भोजन से प्राण व अपान की गति बाधित हो जाती है अर्थात् अति भोजन से भारी पेट वाला व्यक्ति प्राणायाम नहीं कर पाता है। अतः प्राणायाम की साधना करने के लिए आहार का संयम करना अति आवश्यक है। इसीलिए गीता में कहा है-

**अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति।**
**सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः।।** (गीता-४.३०)

अर्थात् आहार पर नियन्त्रण रखने वाले व्यक्ति प्राणयज्ञ (प्राणायाम की साधना) से तन-मन के विकारों को नष्ट कर देते हैं।

**यथा चात्यर्थमाहारः कृतोऽनर्थाय कल्पते।**
**उपयुक्तस्तथात्यल्पो न सामर्थ्याय कल्पते।।३।।**

जिस प्रकार अधिक भोजन करने से अनर्थ होता है, उसी प्रकार अत्यल्प भोजन से भी शक्ति नहीं मिलती तथा दुर्बलता के कारण व्यक्ति कर्त्तव्य करने में असमर्थ हो जाता है। अतः अत्यल्प भोजन भी नहीं करना चाहिए।

**आचयं द्युतिमुत्साहं प्रयोगं बलमेव च।**
**भोजनं कृतमत्यल्पं शरीरस्यापकर्षति।।४।।**

अत्यल्प भोजन करने से शरीर की पुष्टि नहीं हो पाती है तथा कान्ति, उत्साह, सक्रियता और बल का ह्रास हो जाता है।

**यथा भारेण नमते लघुनोन्नमते तुला।**
**समा तिष्ठति युक्तेन भोज्येनेयं तथा तनुः।।५।।**

जैसे अधिक भार से तुला झुकती है, हल्के भार से उठ जाती है और उचित भार से समान रहती है, उसी प्रकार (अधिक, अल्प एवं युक्त) आहार से शरीर क्रमशः भारी, क्षीण व स्वस्थ बनता है।

**तस्मादभ्यवहर्तव्यं स्वशक्तिमनुपश्यता।**
**नातिमात्रं न चात्यल्पं मेयं मानवशादपि।।६।।**

इसलिए अपनी शक्ति (पाचनक्षमता) को देखते हुए भोजन करना चाहिए, हठपूर्वक न बहुत अधिक और न ही बहुत कम। क्षुधा के अनुसार मित (मापा हुआ अर्थात् न कम, न अधिक) भोजन करना ही मिताहार कहलाता है।

**अत्याक्रान्तो हि कायाग्निर्गुरुणान्नेन शाम्यति।**
**अवच्छन्न इवाल्पोऽग्निः सहसा महतैधसा।।७।।**

शरीर की पाचकाग्नि अति भोजन के भार से दबकर ऐसे ही शान्त हो जाती है, जैसे थोड़ी आग सहसा बहुत अधिक इन्धन डालने से बुझ जाती है। अतः अतिभोजन कदापि नहीं करना चाहिए।

**अत्यन्तमपि संहारो नाहारस्य प्रशस्यते।**
**अनाहारो हि निर्वाति निरिन्धन इवानलः।।८।।**

भोजन को सर्वथा छोड़ देना भी प्रशंसनीय नहीं है, क्योंकि भोजन न करने वाले मनुष्य की जठराग्नि वैसे ही शान्त जाती है, जैसे इन्धन न डालने से अग्नि स्वयमेव शान्त हो जाती है।

**यस्मान्नास्ति विनाहारात्सर्वप्राणभृतां स्थितिः।**
**तस्माद् दुष्यति नाहारो विकल्पोऽत्र तु वार्यते।।९।।**

क्योंकि भोजन के बिना कोई भी प्राणी जीवित नहीं रह सकता, इसलिए भोजन में दोष नहीं है, किन्तु भोजन की आसक्ति अर्थात् रसविशेष में राग निषिद्ध है।

बुद्ध का वचन है- जिह्वारसासक्ति से ग्रस्त व्यक्ति निरयगामी (नरकगामी) हो जाता है। वह नरक कहीं अन्यत्र नहीं, यहीं है। जिह्वालोलुपता से अपथ्याहार करने वाले नानाविध भयंकर रोगों से पीड़ित होकर यहीं नारकीय दुःख भोगते दिखाई देते हैं। यह बहुत बड़ा सत्य है कि जहाँ-जहाँ रोग की गहन पीड़ा दिखती है, वहाँ निश्चित रूप से उसके पीछे रसासक्ति ही कारण होती है। यह चिरपरीक्षित कटु सत्य है-

**लोभमूलानि पापानि रसमूला व्यथाः स्मृताः।**
**स्नेहमूला हि शोकाश्च त्रयं त्यक्त्वा सुखी भव।।**

(प्रकीर्णसुभाषितम्)

अर्थात् सभी पाप लोभमूलक होते हैं। सभी रोगों की व्यथा (पीड़ा) रसासक्तिमूलक होती है, और सब शोक रागमूलक होते हैं। यदि लोभ, रसासक्ति

व राग को विवेकदृष्टि से अनिष्टकारक जानकर छोड़ दिया जाए तो सारे दुःख दूर हो जाते हैं। इस प्रकार रोगों की व्यथा से बचने के लिए रसासक्ति से दूर रहना ही एकमात्र उपाय है। इसी विषय में आगे कहा है-

**न ह्येकविषयेऽन्यत्र सज्जन्ते प्राणिनस्तथा।**
**अविज्ञाते यथाहारे बोद्धव्यं तत्र कारणम्।।१०।।**

प्राणी दूसरे किसी एक विषय में उतना आसक्त नहीं होते हैं, जितना कि भोजन के विषय में, अर्थात् रसना की आसक्ति सबसे प्रबल होती है। कल्याणाभिलाषी को इसे समझना चाहिए तथा इस पर नियत्रण करना चाहिए।

**चिकित्सार्थं यथा धत्ते व्रणस्यालेपनं व्रणी।**
**क्षुद्विघातार्थमाहारस्तद्वत् सेव्यो मुमुक्षुणा।।११।।**

घायल व्यक्ति जैसे घाव की चिकित्सा के लिए मल्हम-पट्टी करता है, वैसे मुक्ति चाहने वाले साधक को भूख मिटाने के लिए भोजन का सेवन करना चाहिए। न कि आसक्तिपूर्वक रसनातृप्ति के लिए।

**भारस्योद्वहनार्थं च रथाक्षोऽभ्यज्यते यथा।**
**भोजनं प्राणयात्रार्थं तद्वद्विद्वान्निषेवते।।१२।।**

जैसे भार-वहन हेतु रथ की धुरी को दृढ़ करने के लिए तेल से अञ्जित (चिकना) किया जाता है, उसी प्रकार विद्वान् लोग प्राणयात्रा अर्थात् आवश्यक दैनन्दिन कार्यों को सम्यक् प्रकार से सम्पन्न करने हेतु सामर्थ्य पाने के लिए ही अन्न का सेवन करते हैं। राग या रसासक्ति के कारण से नहीं।

इस प्रकार मिताहार स्वास्थ्य का मूलमन्त्र है। इसे अपनाने से आरोग्य-लाभ के साथ योग-साधना में भी प्रगति होती है। यह अभ्युदय (लौकिक उन्नति) एवं निश्रेयस (परम कल्याण), इन दोनों की सिद्धि में परम सहायक है।

आयुर्वेद में भोज्यान्न का एक आवश्यक गुण स्वादु होना भी बताया है। स्वादिष्ठ अन्न शीघ्र पचता है, इन्द्रियों को तृप्त करता है। बलवर्द्धक व वर्णप्रसादकर (रंग निखारने वाला) होता है। रुचिवधू-गल-रत्नमाला आदि ग्रन्थों में नानाविध विचित्र स्वादु अन्नपान का वर्णन स्वास्थ्यवृद्धि की दृष्टि से ही किया गया है। इसमें वर्णित स्वादु व्यञ्जनों को भी मित मात्रा में ही खाना चाहिए। अन्यथा ये रुचिजनक होने की अपेक्षा अरुचि के कारण बन जाते हैं। क्योंकि कितना ही स्वादिष्ठ अन्न हो, यदि उसे भी अधिक मात्रा में खाया जाएगा तो

उसके भी पूर्वोक्त दोष व दुष्परिणाम अवश्य होंगे। उत्तमोत्तम स्वादिष्ठ व्यञ्जन के सेवन में भी आयुर्वेद के इस सिद्धान्त का सदा ध्यान रखना चाहिए-

**यथाग्न्यभ्यवहारोऽग्निसन्धुक्षणानाम्।** (च. सं. सू.-२५.४०)

अर्थात् जठराग्नि की क्षमता के अनुसार भोजन करना ही क्षुधा बढ़ाने वाले उपायों में सर्वश्रेष्ठ है। सभी व्यञ्जन तभी लाभकर व सार्थक होते हैं, जब इस विशिष्ट नियम के अनुसार उनका मित मात्रा में सेवन किया जाता है। नीतिकार सोमदेव सूरि भी कहते हैं-

**यो मितं भुङ्क्ते स बहु भुङ्क्ते।**

(नीतिवाक्यामृतम्, दिवसानुष्ठान-समुद्देश-३८)

अर्थात् जो मित मात्रा में खाता है, वही वस्तुतः अधिक खाता है। क्योंकि उसका खाया अन्न पचकर शरीर का अंग बन जाता है। इसके विपरीत जो मात्रा से अधिक खाता है, उसका खाया हुआ सब व्यर्थ जाता है, अजीर्ण होने से रोगकारक बन जाता है। अतः मितभोजी ही बहुभोजी की अपेक्षा लाभ में रहता है।

॥ इति शम् ॥

✦✦✦

# Inference

**Prof. Piyushkant Dixit**

Vice-chancellor

Uttra khand Sanskrit University

Haridwar

नूतनजलधररुचये गोपवधूटीदुकूलचौराय।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय।।

The importance of inference is well-known all over the world. When Lord Shree Krishna introduces himself in the Geeta as "Vada" then he makes an indication towards pure Shastric discussions. Shastric discussions are capable to reach that decision which is beneficial to protect and preserve humanity and society. These discussions are more or less based on different types of inferences or Anumana. Some of the common instances of inference used in the Shastric content are mentioned below. This is to explore the actual meaning of Anuman and importance of the co-existence rule or Vyapti regarding Anuman.

1. When we see black clouds in the sky during rainy days, then we infer that it may rain . Similarly, when we see ants in a long queue, carrying their eggs, we are again able to infer the possibility of rain.

   In the rainy season when we see flooded rivers, then we infer the fact that some where in the upper reaches, there was rainfall.

2. In earth there is earth-ness and because earth is also a substance so in earth substance-ness also exists. Knowing this, we can infer substance-ness in earth through the knowledge of earth-ness.

3. Every knowable object in the World can be expressed by the

use of words and is at the same time, a subject matter of knowledge. Thus, if any one has cognizance of the characteristic (in an object) of being a subject matter of knowledge (Jneyatva), then it is possible to infer the presence of the characteristic of being capable of expression by words (Vachyatva). Just as Vachyatva can be inferred from Jneyatva, in the same fashion, Jneyatva can also be inferred from Vachyatvam .

4. Every object has a defining characteristic that enables us to identify it. For example, the substance earth has a defining characteristic of smell. In this way, through the knowledge of earth's defining characteristic (smell), we can infer that ' earth is different from all things other than earth.'

5. In the mountains, when people see the thick line of smoke emanating from the base of the mountain, then they can infer that there is fire on the mountain.

6. When we see the sunset in the west in the evening and again when we see in the next morning the rising Sun in the east, then it is possible to infer that during the night there was relative movement between the Earth and the Sun.

All the above mentioned instances of inference are based on the specific rule which is called 'Vyapti' in Nyaya-Darshan. Before every inferential cognition, essentially we need the knowledge of the 'Hetu' or minor in three phases . For instance, the first time, we see the concomitance of smoke and fire in the kitchen. Later, after repeatedly seeing such a concomitance of smoke with fire many times in different location like in busy crossings, in the cow yard etc., then we decide that in this smoke there is a specific rule of coexistence with fire. This is the first phase knowledge of 'Hetu' or minor.Again, when we infer fire on the mountain, then on the mountain, we first see a thick line of smoke. This is the second phase knowledge of 'Hetu' or minor.After seeing the smoke, we remember the previously experienced coexistence rule.After the knowledge of this specific rule of coexistence with fire in smoke, we become able to gain the third knowledge phase i.e. 'smoke' (the

Hetu in this case) being characterized by the coexistence rule (Vyapti), exists on the mountain'.

In reality this third knowledge is called inference (Anumanam or Paramarsha) which is principal cause of inferential cognition orAnumiti.

In the starting of this preface I have purposely mentioned many examples of inferential cognition. Each example denotes a different type of inferential cognition.

The first example is different because in these types of inferential cognition, we infer objects through their cause . Here Black cloud is the cause of rain.According to Nyaya-Darshan these kinds of inferences are named 'Poorvavat'.

The second example is different because in these types of inferential cognition, we infer things through their product or result. In the given example, the flooded river is a product or result of rain.According to Nyaya-tradition these types of inferences called 'Sheshvat' .

The third example is different because in these types of inferential cognition, we infer any item through those types of things which are neither the cause of that item nor its product or result. In the given example earth-ness or Prithveetva is neither the cause of substance-ness or Dravyatva nor its product or result. In Nyaya-Darshan these kinds of inferences are mentioned as "Samanyatodrishta" .

Some Nyaya-philosophers explain the above mentioned three words Poorvavat,Sheshvat and Samanyatodrishta differently .According to these thinkers, the meaning of 'Poorvavat' is 'Kevalanvyee'. Kevalanvayee means that inference which occurs only after the knowledge of 'invariable accompaniment of the Hetu (middleeèk minor term) by sadhya (major term). This way the fourth example is based on this explantion Poorvavat where we infer Vachyatva through knowledge of Jyeyatva.

According to these thinkers, the meaning of 'Sheshvat' is Kevalavyatirekee. Kevalvyatirekee means that inference which

occurs only after the knowledge of 'invariable accompaniment of the Sadhyabhava (negation of major term) by the Hetvabhava (negation of middle term). The fifth example is based on this explanation of Sheshvat where we infer 'earth is different from all objects different from earth through the knowledge of smell.

In the view of these thinkers, the word 'Samanyatodrishta' is used for 'Anvayavyatirekee'. These inferences are 'Anvayavyatirekee' which

occur after the knowledge of 'invariable accompaniment of the Hetu (middle term) by sadhya (major term) and also the invariable accompaniment of the Sadyabhava (negation of major term) by Hetvabhava (negation of middle term)

There may be different meanings of Poorvavat, Sheshavat and Samanyatodrishta according to different scholars, but it is very clear that in eachAnumanam, the cognition of Vyapti or co-existence rule is very important. To know this co-existence rule or Vyapti, it is necessary to arrive at a meaningful definition.

Although there are many definitions of Vyapti or co-existence rule, we can categorise these definitions mainly in to two in the light of Nyaya traditions. Poorva-Paksha and Uttar-Paksha. Poorva-Paksha definitions are mainly based on the famous five definitions of Poorva-paksha-Vyapti which are commonly called "Pancha-Lakshanee, or "Vyapti Panchak" in Nyaya tradition.

These five definitions of Vyapti are—

1. Sadhyabhavadhikarna-niroopit vrittitvabhava.
2. Sadhyavadbhinna-sadhyabhavavadavrittitva.
3. Sadhyavatpratiyogikanyonyabhavasamanadhikaranya.
4. Sakal-sadhyabhavavannishthabhavpratiyaogitva.
5. Sadhyavadanyavrittitva.

Among the above-mentioned definitions of Vyapti, only the fourth definition is related to Vyatireka Vyapti - this means Vyatirek Sahachar [Invariable accompaniment of the Sadhyabhava (negation of major term) by Hetvabhava (negation of middle term)] based

Vyapti. The remaining other three definitions are related toAnvaya-Vyapti orAnvaya-Sahachar [Invariable accompaniment of Hetu (middle term) by Sadhya (major term)] based Vyapti.

The first Vyapti definition is different from the second, third and fifth definitions due toAtyantabhava (Simple negation) andAnyonyabhava (Mutual negation). In the first definition, simple negation (Atyantabhava) is included whereas in the second, third and fifth definitions, mutual negation is used.

Between the third and fifth definitions of Vyapti, there is only one difference. In the third definition,Adhikaranatva or locus-ness is included but in the fifth definition of Vyapti, it is not accepted as its part.

All these five definitions of Vyapti are the elaborated form ofAvyabhichritatva which means the absence of a particular fault (Vyabhichara) in the minor which is associated with the major by a co-existence rule.

According to primary books of Nyaya-Vaisheshika Philosophy like Tarkasangraha, Tarkamrita etc., the definition of Vyapti is "Sahacharya-Niyam or co-existence rule" which is required in the Hetu or middle term. However,apart from God, common people are not able to see all those places where Hetu or middle term exists and Sadhya or major term also exists. So instead of Sahacharya-Niyama or rule of coexistence as a positive definition, the absence of Vyabhichara is accepted as the defining attribute of Vyapti.

For example, if we accept Sahacharya-Niyama as Vyapti and infer the fire on the mountain through the thick line of smoke then before inference of fire, it is not possible to cognize all locations of fire and smoke coexistence to finalise the rule (because even one contrary instance can break the rule and thus not allow inferential cognition). However, when we accept the negation of Vyabhichara as Vyapti, it means that in Hetu (middle term), there exists the negation of the co-existence with Sadhyaabhava (non-existence of major term). In the mentioned, instance of inferring fire using the knowledge of smoke, it is common experience that Hetu i.e. smoke never exists in the locus of the non existence of fire.

Thus, rather than establishing the existence of Vyapti in a positive manner, it is more apt to establish it by negation. It is common to experience that the negation of co-existence of Smoke or Hetu (minor term) with Sadhyabhava i.e. Vahnyabhava (non-existence of major term i.e. fire) in this way we become able to decide the Vyapti in smoke (middle term) which allows us to proceed to infer fire properly.

It becomes clear that if we say that where ever there is smoke there is fire, then this statement implies another statement automatically that there is never smoke where is no fire. Keeping this view in mind, the first definition of Vyapti in the Panchalakshani text is mentioned by the renowned Philosopher of Navya-Nyaya,Acharya Gangesh Upadhyaya as "Sadhyabhavavda-vrittitvam".

All these five definitions are meant to be defining the proper form or Svaroop of Vyapti. Thus, it is proposed that we treat these definitions as the real form of Vyapti.Also, because these definitions are existing in Saddhetu (or uncorrupted Hetu), so these definitions are Tatastha or marginal definitions of Saddhetu.

If this definition does not exist in Saddhetu, then we can say that the definition is faulty. That particular fault is named in the Nyaya-Vaisheshika tradition as Avyapti (non applicability of a definition to the defined space). In the same way, if this definition of Vyapya or Saddhetu also exists inAsaddhetu (or corrupted Hetu), then also it becomes faulty and this fault known asAtivyapti (Unwarranted extension of a definition to things not intended to be defined by it.) When any definition does not exist in or apply to the defined space at all, then this definition becomes unacceptable due to the fault namedAsmbhava (Impossibility). According to Nyaya-Vaisheshika view, any definition must be free from all the above mentioned three faults .

In Shastric tradition, whenever we accept any definition of anything then at first we carefully examine it for the existence of the above mentioned three faults. In the present context, the Saddhetu definition "Sadhyabhavadhikarana niroopit vrittitya-bhava" is not faulty because its application in Saddhetu—smoke when used to infer

fire is sure and it's non-application in Asaddhetu—fire when used to infer smoke is also very clear. In this way, the definition of Vyapya or Saddhetu is free from free from all three faults i.e.Avyapti, Ativyapti and Asambhava.

When we infer fire on the mountain by a thick and constant line of smoke, then here smoke is Saddhetu. Locus of this Saddhetu—smoke is never seen as the locus of Sadhyabhava—negation of Sadhya—fire.Always, whichever becomes the locus of negation of Sadhya—fire or Sadhyabhava, on that particular locus Sadhana—smoke never exists, and this non-existence is the definition of Vyapti or Vyapya of Saddhetu.

We are able to say that the application of the first Vyapti definition i.e. "Sadhyabhavadhikarana niroopit vrittitvabhava— non-existence of smoke in locus of negation of fire" is correct. Through this application we easily decide that this definition of Vyapti is free fromAvyapti andAsambhava errors.

To decide that this definition is free fromAtivyapti error too, we examine the non-application of it inAsaddhetu. When we infer on mountain smoke after seeing higher flames of fire on the mountain, then here fire isAsaddhetu. Locus of thisAsaddhetu—fire is seen in so many places coinciding with the locus of Sadhyabhava—negation of Sadhya—smoke. An example is a heated iron ball where is there is fire (Hetu) but no smoke (Sadhya).

Thus, if in any single locus we find the negation of smoke—Dhoomabhava—Sadhyabhava and fire—Vahni—Hetu together, then the Hetu-fire coexists with negation of smoke Sadhyabhava. Because the Hetu—fire exists in the locus of the negation of smoke—Sadhyabhava (like in the case of a heated iron-ball), thus we cannot say in any way that Hetu fire does not exist in the locus of negation of smoke. Thus, anAsaddhetu is not covered by the definition which indicates it being free from the fault ofAtivyapti.

In the same way, we are able to decide the errorless-ness of each of the five Vyapti definitions easily and if anywhere there appears to be error, to try to resolve them appropriately. This specific

process is also accepted in the Panchalakshani text by the different reputed scholars includingAcharya Mathuranath Tarkavageesha, the author of Mathuri or Rahasya commentary on the Chintamani ofAcharya Sh.Gangesha Upadhyaya.

All the five Vyapti definitions are not existing in the Saddhetu—Jneyatva which is used to infer Vachyatva (as desribed earlier in the preface). For example in pot, cloth etc., because everywhere the Sadhya (major term) Vachyatva (ability to express in words) is present, so we cannot find Sadhyabhav—negation of Vachyatva anywhere. In this way these five definitions of Vyapti are not acceptable due to theAvyapti error.

To avoid this error, the Siddhanta Lakshana or final accepted definition of Vyapti was proposed by Acharya Sh. Gangesha Upadhyaya in the text of the Chintamani. The final definition of Vyapti is given below—

Pratiyogyasmanadhikarana Hetusamanadhikarana Atyanta-bhava PrtiyogitaAnavachchhedako yo Dharmah Taddharmavach-chhinnena yen-kenapi samam Samanadhikaranyam."

In other words, we can define this Sidhanta Vyapti as " Hetu-Vyapaka Sadhya-Samanadhikaranyam."According to Navya-Nyaya philosophy Vyapakatva is equal to "TadvannishthaAtyantabhava Pratiyogita Anavachchhedaka Dharmavattva." In this Siddhanta-Vyapti definition, nowhere is "Sadhyabhava" mentioned and so it is free from above givenAvyapti error in the Kevalanvayee Hetu Jneyatva.

Concluding my view, I want to clear that if we have mastery inAnumanam or the inference process, through proper knowledge of texts like the Panchalakshani (Five definitions of Vyapti), then we can achieve our aims in life easily because our every aspect of living is surrounded byAnuman and Vyapti.

Even on a daily basis, the omnipresence of the need to performAnumana and Vyapti is very evident. This can be shown through a simple experience which occurred recently. I bought milk packets from local milk diary in the morning and felt that one of the packets was different to handle from the other three. When I informed

the booth-owner that I felt a very minor difference in that packet, he handled the packet and replied that there may be a leakage.

This was confirmed when he applied pressure on the packet. At every step of this incident there were numerous instances of Anumana. Applying Anumana properly is an unspoken and necessary aspect of our daily life.

Here, it might be said that even those who are not aware about concepts like Vyapti orAnumana conduct their life properly and are able to use the faculty of inference properly. This observation is right and I wish to add something more. Not only do common people infer in the manner described in sophisticated Indian logicial texts, but in this world even animals are able to use the faculty of inference. According toAcharya Shankara, when any cow looks at a man taking green grass in his hand then the cow infers that "this man wants to give me grass". When the same animal sees the man with a stick in hand then the cow infers that "he wants to beat me" and reacts . Accordingly to the Hetu (minor), the cow comes near to man or goes away from the man.

We would say that there is much difference between man's and an animal's inference. In the same way, we can say that there is an assured difference in the inference process between a common man and a man who is aware about the intricacies of Vyapti and the inference process as detailed in Nyaya texts like the Tarkbhasha, Nyaya Darsan, Nyaya Siddhant Muktavali, Vyaptipanchak etc. So we should study this text book properly at least once in our life to aid and improve our powers of discrimination.

१. वादः प्रवदतामहम्। गीता अ० श्लो०

२. यत्र यत्र धूमः तत्राग्निरिति साहचर्यनियमो व्याप्तिः। त०सं० पृ० ४९

यत्र यत्र धूमः तत्राग्निः इति व्याप्तेरभिनयः। साहचर्यनियमः इति लक्षणम्। त०सं०दी० पृ० २५५

३. पूर्वं कारणम्, तद्वत्, तत् लिङ्गकम् मेघोन्नतिविशेषे वृष्ट्यनुमानम्। न्या.सू. वृ.पृ. १६

पूर्ववदिति-यत्र कारणेन कार्यमनुमीयते, यथा मेघोन्नत्या भविष्यति वृष्टिरिति। न्या० सू० भा० १.१.५ पृ० २९१

उदाहरणम्-मेघोन्नत्या भविष्यति वृष्टिरिति कारणेन कार्यानुमानम्। कथं पुनरस्य प्रयोगः? वृष्टिमन्त एते मेघाः, गम्भीरध्वानवत्त्वे सति, बहुबलाकावत्त्वे सति अचिरप्रभावत्त्वे सति उन्नतत्वात् तदन्यवृष्टिमन्मेघवदिति। न्या० सू० भा० वा० १.१.५ पृ० २९५

४. अनुमानस्य त्रैविध्यं पूर्वमुक्तम्, तत्र त्रिविधस्याप्रामाण्ये साधितेऽनुमानम-प्रमाणमर्थात् सिद्धमित्याशयेनेदम्। अनुमानम् अनुमानत्वेनाभिमतम्, न प्रमाणं प्रमितिकरणम्, व्यभिचारहेतुकत्वात्। तत्र त्रिविधे व्यभिचारं दर्शयति, रोधेत्यादिना। नदीवृद्ध्या पिपीलिकाण्डसञ्चारेण मयूररुतेन च वृष्ट्यनुमानं त्रिविधमुदाहरणं न सम्भवति, नदीरोधाधीननदीवृद्ध्या आश्रयोपघाताधीनपि-पीलिकाण्डसञ्चारेण मनुष्यकर्तृकमयूररुतसदृशरुतेन व्यभिचारात्। पिपीलि-काण्डसञ्चारस्य वृष्टिहेतुत्वाभिप्रायेणेदम्। अथवा लक्षणसूत्रे पूर्ववत् पूर्वकालीनसाध्यानुमाकम्, शेषवदुत्तरकालीनसाध्यानुमापकम्, सामान्यतो दृष्टं विद्यमानसाध्यस्याप्यनुमापकमित्यर्थ इत्याशयः। एतेन त्रैकालिकसाध्या-नुमापकत्वं न सम्भवति।

परे तु पिपीलिकाण्डसञ्चारेणात्यन्तोष्मानुमानम्, ततश्च महाभूतक्षोभानुमानम्, तस्य च वृष्टिहेतुत्वात्तेन वृष्ट्यनुमानमिति वदन्ति। एवमन्यत्रापि व्यभिचारशङ्का-सम्भवादव्यभिचारनिश्चयस्यानुमितिहेतोरेव दुर्लभत्वात् तत्प्रामाण्यं न सम्भवतीती-त्याशयः।

समाधत्ते–अनुमानाप्रामाण्यं न युक्तम्, एकदेशरोधजनदीवृद्धेस्त्रासजपिपीलि-काण्डसञ्चारान्मयूररुतसदृशरुताच्च लिङ्गीभूतानां नदीवृद्ध्यादीनां भिन्नत्वान्न दोषः। न्या० सू० वृ० २.१.३५-३६ पृ० ९२-९३

नायमनुमानव्यभिचारः। अनुमाने तु खल्वयमनुमानाभिमानः। कथम्? नाविशिष्टो लिङ्गं भवितुमर्हति। पूर्वोदकविशिष्टं खलु वर्षोदकं शीघ्रतरत्वं स्रोतसो बहुतरफेनफलपर्णकाष्ठाऽऽदिबहुलञ्चोपलभमानः पूर्णत्वेन नद्या उपरि वृष्टो देव इत्यनुमिनोति, नोदकवृद्धिमात्रेण। पिपीलिकाप्रायस्याण्डसञ्चारे भविष्यति वृष्टिरित्यनु-मीयते, न कासाञ्चिदिति। नेदं मयूरवासितं, तत्सदृशोऽयं शब्दः, इति विशेषा-परिज्ञानान्मिथ्याऽनुमानमिति। यस्तु सदृशात् विशिष्टाच्छब्दात् विशिष्टं मयूरवासितं गृह्णाति तस्य विशिष्टोऽर्थो गृह्यमाणो लिङ्ङ्गम्। यथा सर्पादीनामिति।

सोऽयमनुमातुरपराधः,नानुमानस्य॥योऽर्थविशेषेणानुमेयमर्थमविशिष्टार्थदर्शनेन बुभुत्सत इति। न्या० सू० भा० २.१.३६ पृ० ९३

५. सामान्यतो दृष्टं कार्यकारणभिन्नलिङ्गकम्, यथा पृथिवीत्वेन द्रव्यत्वानुमानम्। न्या० सू० वृ० पृ० १६

६. अथवा पूर्वम् अन्वयः, तद्वत् केवलान्वयीत्यर्थः, यथा अभिधेयं प्रमेयत्वात् इत्यादि। न्या. सू. वृ. पृ. १७

७. शेषो व्यतिरेकः, तद्वत्, केवलव्यतिरेकीत्यर्थः, यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादि। न्या.सू. वृ. पृ. १७

८. सामान्यतो दृष्टम्, अन्वयव्यतिरेकि, यथा वह्निमान् धूमादित्यादि। न्या० सू० वृ० पृ० १७

९. सामान्यतो दृष्टम्, व्रज्यापूर्वकम् अन्यत्र दृष्टस्य अन्यत्र दर्शनमिति। तथा चादित्यस्य। तस्मादस्त्यप्रत्यक्षाऽप्यादित्यस्य व्रज्येति। न्या० सू० भा० २.१. ३६ पृ०१६

अपरे पुनर्मन्यन्ते–सामान्यतो दृष्टम् आदित्यस्य गत्यनुमानमिति। तत्तु न बुद्ध्यामहे कथमनुमीयते इति। यदि तावत् गतिमानादित्य इति अनुमीयते, तत् केन प्रतिपद्यते? न ह्यादित्यगतेः किञ्चित् सम्बद्धं लिङ्गमस्ति। न चासम्बद्धोऽर्थोऽनुमातुं शक्यते। तथा च सर्वं सर्वेणानुमीयेत। अथापि देशान्तरप्राप्तिर्लिङ्गमिति? तन्न, अदृष्टत्वात्। न हि सवितुः कश्चित् देशान्तरप्राप्तिं पश्यति। देशान्तरं तस्माद्दे खलु आकाशदेशो दिग्देशो वा भवेत्। उभयं चाप्रत्यक्षम्। न चान्या गतिरस्ति। तस्माद्देशान्तर-प्राप्तिदर्शनमयुक्तम्। सर्वत्र खल्वयमादित्यस्य मण्डलमेव केवलमुपलभते। न च वस्तुमात्रदर्शनादनुमानं युक्तम्। अपि च केनचित् प्रकारेणादित्यस्य गतिः शक्या द्रष्टुम्, उपलब्धिलक्षणप्राप्तत्वात्। न पुनर्देशान्तरप्राप्तिर्नित्यमतीन्द्रियत्वात्। न हि कदाचिदपि प्रत्यक्षाप्रत्यक्षवृत्तिः संयोगो भवति प्रत्यक्षः। अथ देवदत्तस्य देशान्तरप्राप्तिदर्शनेनादित्यस्य गत्यनुमानं सामान्यतो दृष्टमिति मन्यसे, न केवलमादित्यस्य सर्वार्थानां गत्यनुमानमेतत्। तर्हि भवानपि गच्छतीत्येवं कस्मात् नानुमिमीषे? नैवेदम् आदित्यगत्यनुमानं साक्षात्। किं तर्हि? देशान्तरप्राप्तिमनुमाय तया गत्यनुमानमित्यदोषः। **देशान्तरप्राप्तिमानादित्यो द्रव्यत्वे सति क्षयवृद्धिप्रत्ययाविषयत्वे च प्राङ्मुखोपलभ्यत्वे च तदभिमुखदेशसम्बन्धादनुत्पन्नपादविहारस्य परिवृत्य तत्प्रत्ययविषयत्वात्, मण्यादिवत्। मण्यादावेतत् सर्वमस्ति।स च**

देशान्तरप्राप्तिमान्। एवं चादित्यः। तस्माद्देशान्तरप्राप्तिमानिति। अनया तु देशान्तरप्राप्त्या अनुमितया गतिरनुमीयते इति। देशान्तरप्राप्तिमत्त्वे वा साधनम् (अनुमानम्)–देशान्तरप्राप्तिमानादित्यः, अचलचक्षुषो व्यवधानानुपपत्तौ दृष्टस्य पुनर्दर्शनाविषयत्वात्। देवदत्तवदिति। न्या० सू० भा० वा० १.१.५ पृ० २९६

१०. तानि ते तत् पूर्वं यस्य तदिदं तत्पूर्वकम्। यदा तानीति विग्रहः, तदा समस्तप्रमाणभिसम्बन्धात् सर्वप्रमाणपूर्वकत्वमनुमानस्य वर्णितं भवति। पारम्पर्येण पुनस्तत् प्रत्यक्ष एव व्यवतिष्ठते इति प्रत्यक्षपूर्वकत्वमुक्तं भवति। यदापि विग्रहः ते द्वे पूर्वे यस्येति, ते द्वे प्रत्येक्षे पूर्वे यस्य प्रत्यक्षस्य तदिदं तत्पूर्वकं प्रत्यक्षमिति। कतरे द्वे प्रत्यक्षे? लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यं प्रत्यक्षं, लिङ्गदर्शनं च द्वितीयम्।

**बुभुत्सावतो द्वितीयात् लिङ्गदर्शनात् संस्काराभिव्यक्त्यनन्तरकालं स्मृतिः, स्मृत्यनन्तरं च पुनर्लिङ्गदर्शनमयं धूम इति। तदिदमन्तिमं प्रत्यक्षं पूर्वाभ्यां प्रत्यक्षाभ्यां स्मृत्या चानुगृह्यमाणं लिङ्गपरामर्शरूपमनुमानं भवति।** न्या० सू० भा० वा० १.१.५ पृ० २९२

महानसादौ धूमाग्न्योर्व्याप्तौ गृह्यमाणायां यद्धूमज्ञानं तदादिमम्। पक्षे यद्धूमज्ञानं तद् द्वितीयम्। अत्रैव वह्निव्याप्यत्वेन यद्धूमज्ञानं तत्तृतीयम्। इदमेव लिङ्गपरामर्श इत्युच्यते। त०सं० पृ० ७५

महानसे यद्धूमज्ञानं तत् प्रथमम्। पर्वतादौ पक्षे यद्धूमज्ञानं तद्द्वितीयम्। ततः पूर्वं गृहीतां धूमाग्न्योः व्याप्तिं स्मृत्वा यत्र धूमस्तत्राग्निः इति तत्रैव पर्वते पुनर्धूमं परामृशति अस्त्यत्र पर्वतेऽग्निना व्याप्तो धूम इति तदिदं धूमज्ञानं तृतीयम्। त०भा० पृ० १११

११. लिङ्गलिङ्गिसम्बन्धस्मृतिर्लिङ्गदर्शनं वेति सन्देहः। एके तावतद् वर्णयन्ति लिङ्गलिङ्गिसम्बन्धस्मृतिरनुमानमितरैर्लिङ्गलिङ्गिसम्बन्धदर्शनादिभिरनुगृह्यमाणा। अपरे पुनर्मन्यन्ते लिङ्गपरामर्शोऽनुमानमितरैर्नुगृह्यमाण इति। वयं तु पश्यामः, सर्वमनुमानम्, अनुमितेस्तन्नान्तरीयकत्वात्। प्रधानोपसर्जनभावविवक्षायां तु लिङ्गपरामर्श इति न्याय्यम्। कः पुनरत्र न्यायः? आनन्तर्यप्रतिपत्तिः। यस्मात् लिङ्गपरामर्शात् अनन्तरं शेषार्थप्रतिपत्तिरिति, तस्मात् लिङ्गपरामर्शो न्याय्य इति। स्मृतिर्न प्रधानम्। किं कारणम्? स्मृत्यनन्तरमप्रतिपत्तेः। न हि भवति यत्र धूममद्राक्षं तत्राग्निमद्राक्षम् इति। एतस्याश्च स्मृतेरनन्तरं तस्मादग्निरिति

शेषार्थग्रह इति युक्तं वक्तुम्। तस्मात् स्मृत्यानुगृह्यमाणो लिङ्गपरामर्शोऽभीष्टार्थप्रतिपादको भवति। न्या० सू० भा० वा० १.१.५ पृ० २९३

ननु भवतु प्रत्यक्षद्वयपूर्वकः संस्कारोऽनुमानम्, तेनापि शेषोऽर्थोऽनुमास्यत इत्यत आह—स्मृतिहेतुः नानुमितिहेतुरित्यर्थः। परिहरति—नैष दोष इति। विशिष्टज्ञानं विज्ञानम् विशेषश्च स्मृतेरन्यत्वम्, न हीन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं स्मृतिः। तस्याः संस्कारमात्रप्रभवतया अन्यस्मादनुत्पत्तेः। तेन च ज्ञानेन स्वकारणं विशेषितम्, प्रत्यक्षसूत्रे यत इत्यध्याहारात्। तस्मादिहापि स्वकारणविशेषकम् स्मृतेरन्यद् विज्ञानमधिकृतम्। न च संस्कारः प्रत्यक्षपूर्वोऽपि तादृशज्ञानकारणमिति न तस्य प्रसङ्ग इत्यर्थः। न्या० सू० भा० वा० टी० १.१.५ पृ० ३१३

१२. पूर्ववदिति–यत्र कारणेन कार्यमनुमीयते, यथा मेघोन्नत्या भविष्यति वृष्टिरिति। न्या० सू० भा० १.१.५ पृ० २९१

उदाहरणम्- मेघोन्नत्या भविष्यति वृष्टिरिति कारणेन कार्यानुमानम्। कथं पुनरस्य प्रयोगः? वृष्टिमन्त एते मेघाः, गम्भीरध्वानवत्त्वे सति, बहुबलाकावत्त्वे सति अचिरप्रभावत्त्वे सति उन्नतत्वात् तदन्यवृष्टिमन्मेघवदिति। न्या० सू० भा० वा० १.१.५ पृ० २९५ क एवमाह कारणदर्शनात् कार्यास्तित्वं प्रतिपद्यते इति? को वा ब्रवीति यत्र कारणं तत्र कार्यमिति। कार्यं तु कारणविशेषत्वेनोपयुक्तं गुणभूतमनुमीयते इति सूत्रार्थः। न्या० सू० भा० वा० १.१.५ पृ० २९४

यद्यपि कारणमात्रं व्यभिचरति कार्योत्पादं, तथापि यादृशं न व्यभिचरति तत्र निपुणेन प्रतिपत्रा भवितव्यम्। अन्यथा धूममात्रमपि वह्निसत्तां व्यभिचरतीति न धूमविशेषो गमको भवेत्। रसाद्रूपानुमाने तु वैनाशिकानामापादितं कारणात् कार्यानुमानमस्माभिः। अपि चान्त्यतन्तुसंयोगानन्तरं पटो जायते तत्रापि शक्यं कारणात् कार्यानुमानम्। यदा खल्वयमन्यत एवोद्बुद्धसंस्कारो व्याप्तिस्मृतिमान् अविरलेष्वितरेषु तन्तुषु अन्त्यतन्तावुत्पन्नायां क्रियायामिन्द्रियसन्निकर्षात् प्रथममेव परामृशति तथा चेयमिति, तदैव क्रियातो विभाग इत्येकः कालः। अथ यदा विभागात् पूर्वसंयोगविनाशः, तदा परामर्शात् तस्मादवश्यम्भाविपटविशिष्टेयं क्रियेत्यनुमानोत्पाद इत्येकः कालः। अथान्त्यस्य तन्तोस्तन्तुसंयोगः, अथ पटोत्पादः, तत्र रूपाद्युत्पादः, अथ प्रत्यक्षदर्शनम् इत्यनुमानोत्पादस्य परस्ताच्चतुर्थक्षणे प्रत्यक्षम्। यदि तु क्रियोत्पादानन्तरमालोचनमिष्यते, तथापि तृतीये क्षणे प्रत्यक्षस्य उत्पाद इति नानवसरमनुमानम्। अपि च बधिरो मुरजमुखमभिहत्य स्वपाणिनाभिघातादेव शब्दकारणात् तत् कार्यं शब्दं निःशङ्कमनुमिमीते। एवमन्यान्यपि कारणात् कार्यानुमानानि ऊहनीयानीति। न्या० सू० भा० वा० टी० १.

१.५ पृ० ३१६

१३. नद्याः पूर्णत्वं शेषवदुदाहरणम्। कथं पुनर्नदीपूरो नद्यां वर्तमान उपरि वृष्टिमन्तं देशमनुमापयति, व्यधिकरणत्वात्? नोपरिवृष्टिमद्देशानुमानं नदीपूरः। किं तर्हि? नद्या एवोपरिवृष्टिमद्देशसंबन्धित्वमनुमीयते नदीधर्मेणैव। उपरिवृष्टिमद्देशसम्बन्धिनी नदी शीघ्रतरस्रोतस्त्वे सति फलकाष्ठादिवहनवत्त्वे च सति पूर्णत्वात् तदन्यवृष्टिमत्पूर्णनदीवत् इति। भविष्यति, भूता वेति कालस्याविवक्षितत्वात् यः कश्चित् काल उपादेयः इति। न्या० सू० भा० वा० १. १.५ पृ० २९५

१४. सामान्यतो दृष्टं नाम अकार्यकारणभूतेन यत्राविनाभाविना विशेषणेन विशेष्यमाणो धर्मी गम्यते, तत् सामान्यतो दृष्टम्। यथा बलाकया सलिलानुमानम्। कथं पुनर्बलाकया सलिलानुमानम्? यावानस्य देशो बलाकयाजहद्वृत्तित्वेन प्रसिद्धो भवति, तावन्तमन्तर्भाव्य वृक्षादिकमर्थं पक्षीकृत्य बलाकावत्त्वेन साधयति। न्या० सू० भा० वा० १.१.५ पृ० २९५

१५. **त्रिविधमिति।** अन्वयव्यतिरेकी, अन्वयी व्यतिरेकी चेति। तत्रान्वयव्यतिरेकी विवक्षिततज्जातीयोपपत्तौ विपक्षावृत्तिः, यथा अनित्यः शब्दः सामान्यविशेषवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वात् घटादिवदिति। अन्वयी विवक्षिततज्जातीयवृत्तित्वे सति विपक्षहीनः, यथा सर्वानित्यत्ववादिनामनित्यः शब्दः कृतकत्वादिति। अस्य हि विपक्षो नास्ति। व्यतिरेकी विवक्षितव्यापित्वे सति सपक्षाभावे सति विपक्षावृत्तिः, यथा नेदं जीवच्छरीरं निरात्मकम्, अप्रमाणादिमत्त्वप्रसङ्गादिति। न्या० सू० भा० वा० १.१.५ पृ० २९४

१६. नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः? न तावदव्यभिचरितत्वम्। तद्धि न साध्याभाववदवृत्तित्वम्। व्या० स० सा०, चि०, पृ०१६३

१७. साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्। व्या० स० सा०, चि०, पृ०१७९

१८. साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम्। व्या० स० सा०, चि०, पृ०२२३

१९. सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम्। व्या० स० सा०, चि०, पृ०२२६

२०. साध्यवदन्यावृत्तित्वं वा। व्या० स० सा०, चि०, पृ०२४४

२१. यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः। त०सं० पृ० ४९

२२. व्याप्तिस्तावदसर्वज्ञदुर्विज्ञेया।

२३. समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्ति-**स्वरूपनिरूपणमारभते, ननु** इत्यादिना। व्या०स०सा०, दी० पृ० १५९
अनुमानप्रामाण्यं निरूप्य व्याप्तिस्वरूपनिरूपणमारभते **ननु** इत्यादिना। व्या०स०सा०, मा० पृ०१५८

२४. दोषत्रयशून्यं लक्षणं भवति।

२५. केवलान्वयिन्यभावात्। व्या० स० सा०, चि०, पृ०२६२
सर्वाण्येव लक्षणानि केवलान्वय्यव्याप्त्या दूषयति- **केलान्वयिन्यभावात्** इति। व्या० स० सा०, चि०मा० पृ०२६२

२६. प्रतियोग्यसमानाधिकरण यत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदका-वच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यम् व्याप्तिः। सि०ल०चि० पृ०१

२७. यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तन्ते अनुकूले च प्रवर्तन्ते, यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलम्भ्य मां हन्तुमयमिच्छितीति पलायितुमारभन्ते, हरित-तृणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखीभवन्ति, एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान् बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरीतान् (सम्भावनास्तान्) प्रत्यभिमुखीभवन्ति। अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः। पश्वादीनां च प्रसिद्ध एव अविवेकपूर्वकः प्रत्यक्षादिव्यवहारः। तत्सामान्यदर्शनात् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादि-व्यवहारस्तत्कालः समान इति निश्चीयते। ब्र०सू०शां०भा० अ०१पा०.१. अ०१सू.१ पृ० ३-४ समताबुक्स चेन्नई, पुनर्मुद्रणम्- १९९९

✦✦✦

# अवयवानवयवत्वसाध्यकानुमितौ संशयपक्षताविचारः

श्रीगणेश्वरनाथः झा
सहायकाचार्यः, व्याकरणविभागः
श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्
दरभङ्गा, बिहारम्।

**प्रस्तावना**

दृश्यते हि समेषां दर्शनानां निजनिजनयप्रसिद्धप्रमेयप्रतिपादनात्मकः स्वभावः। तद्यथा-पञ्चविंशतितत्त्वप्रतिपादनपरं सांख्यशास्त्रं, सप्तपदार्थप्रतिपादनपरं वैशेषिकं, षोडशपदार्थनिरूपणपरं न्यायशास्त्रं, शब्दसाधुत्वप्रतिपादनपरं व्याकरणं, परमात्मयाथात्म्यनिरूपणपरञ्च अद्वितीयमद्वैतदर्शनञ्च। सर्वाणि शास्त्राणि स्वीयप्रमेयप्रतिपादनपराण्यपि प्रमाणान्यवलम्ब्यैव पदार्थनिरूपणे प्रवृत्तानि। यतो हि प्रमेयप्रतिपादकप्रमाणं विना प्रमाणप्रतिपाद्यप्रमेयञ्च विना न हि कश्चित् किञ्चिदप्यभिधत्ते। अतएव न्यायभाष्यकारो भगवान् वात्स्यायनोप्याह–प्रमाणतो अर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्। अतएव च प्रामाणिकानाम् आभाणकम्-प्रमेयसिद्धिप्रमाणाद्धि इति,मानाधीना मेयसिद्धिश्च।अतः सर्वेषां प्राधान्यतः प्रमेयप्रतिपादकानामपि शास्त्राणां प्रमाणप्रतिपादने प्रवृत्तिरानुषङ्गिकी अवलोक्यते। तदिदं प्रमाणनिरूपणे प्रवृत्तेषु शास्त्रेषु अन्यतमं न्यायशास्त्रं प्रमाणनिरूपणप्रसङ्गे मूर्धन्यतमं स्थानमनितरवैशिष्ट्यञ्चावहति। तदुक्तं वात्सायनभाष्ये–

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां सेयमान्वीक्षिकी मता।।**

न्यायशास्त्रमिवान्यशास्त्रं प्रति व्याकरणशास्त्रमपि नितरामुपकरोति। अत एव काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमिति वृद्धोक्तं सङ्गच्छते। अस्मिन् वृद्धोक्तवाक्ये काणादपदस्य न्यायोपलक्षकतया न्यायशास्त्रस्य सर्वशास्त्रोपकारकत्वं निर्वहति। यद्यपि शब्दसाधुत्वप्रतिपादनपरमिदं व्याकरणशास्त्रं स्वात्मसूत्रैरेव शब्दानां साधुत्वमान्वाख्यायते तथापि विधिशास्त्राणां लक्ष्यधर्मिकसाधुत्वप्रकारकाप्रामाण्यज्ञानानास्कन्दितबोधोपपत्तये सहकारितया प्रवृत्तानां परिभाषाशास्त्राणां न्यायशास्त्रमन्तरेण अर्थबोधो न संभवति।

अतः वैयाकरणमूर्धन्यैराचार्यैः न्यायशास्त्रप्रसिद्धं सिद्धान्तमवलम्ब्य तत्तत्स्थलेषु वैयाकरणसिद्धान्तः प्रत्यपादि। तत्र प्राचीननैयायिकाभिमतसंशयपक्षतायाः वैयाकरण-सिद्धान्तनिरूपणे कथमुपयोग इति विषयमधिकृत्य अत्र निबन्धे विचाराः प्रस्तूयन्ते।

**प्रतिपाद्यविषयः**

सर्वतन्त्रस्वतन्त्रैः श्रीमन्नागेशभट्टैः स्वकीये परिभाषेन्दुशेखरे परिभाषानिरूपण-प्रसङ्गे अनुमितिरूपा अनेकान्ता अनुबन्धा" इति परिभाषा निगदिता। अस्या अनुमितिरूपायाः परिभाषाया अवतरणं प्रददतोक्तम् इत्सञ्ज्ञका अनुबन्धास्तेष्व-वयवानवयवत्वसन्देह आह अनेकान्ता इति। अत्र इत्संज्ञका अनुबन्धा इति पक्षनिर्देशः, अनवयवत्वं साध्यम्, तदर्थभूते विधेये कदाप्यदर्शनादिति हेतुः। अत्र अनुबध्यन्ते परस्मिन् सम्बध्यन्ते ये ते अनुबन्धा इति व्युत्पत्त्या परप्रतियोगिकसम्बन्धवन्त अनु-बन्धा इत्यर्थो लभ्यते। अयं च सम्बन्धो द्विविधः। भेदरूपः,अभेदरूपश्च। भेदरूपसंबन्धः शास्त्रे नानाविधो दृष्टः। यथा शुकवृक्षयोः संयोगः। वृक्षशाखयोश्च समवायः। तत्र यदि अनुबन्धानामितरपदार्थैस्साकं संयोगादिसम्बन्धेन सम्बद्धता चेदनवयवत्वम्, समवायसम्बन्धेन सम्बद्धता चेदवयवत्वम्।

एवञ्च लक्ष्ये श्रवणातिरिक्तकार्यसम्पादकानामनुबन्धानां बोधकावयवत्वम् अनवयवत्वं वा इति संदेहे जाते तत्र अनुमानेन निश्चीयते यदनुबन्धाः बोधकानवयवाः बोधकावयवत्वेनोपलब्धिविषयत्वाभावात्। पक्षधर्मताज्ञानाय अन्यदनुमानं प्रयुज्यते अनुबन्धाः बोधकावयवत्वेनोपलब्धविषयत्वाभाववन्तः तदर्थभूते विधेये कदाप्यदर्शनात्। यो हि अवयवः सः कदाचित् स्वविधेये उपलभ्यते। यथा तिप्प्रत्ययावयव इकारः "भवति पठति" इत्यादौ उपलभ्यते एवं सुबवयवोकारः "रामासु" इत्यादौ उपलभ्यते अतः एतेषामवयवत्वम्। तिप्घटकपकारानुबन्धः सुप्घटकपकारानुबन्धश्च न कदापि स्वविधेये उपलभ्यते अतस्तेषामनवयवत्वम्।

**संशयपक्षतोपयोगः**

प्राचीननैयायिकनये साध्यसन्देहरूपाया एव पक्षतायाः स्वीकारात् तादृशपक्षताया अनुमितिकारणत्वेन अनुमितिकारणीभूतां पक्षतां दर्शयितुं ग्रन्थकृतोक्तम् इत्संज्ञका अनुबन्धास्तेष्ववयवानवयत्वसन्देह इति। सन्दिग्धवत एव पक्षत्वमिति अभिप्रेत्योक्तं सन्दिग्धसाध्यवान् पक्ष इति। तत्र सन्दिग्धश्चासौ साध्यश्च सन्दिग्धसाध्यः स अस्मिनस्तीति सन्दिग्धसाध्यवान्। अत्र समुपसृष्दिह्धातोः सन्देहः अर्थः, सविषयक-धातुसमभिव्यहारे कर्मप्रत्ययार्थो विषयताश्रय इति नियमात् सविषयकदिह्धातोः

कर्मण्यर्थे विहितस्य क्तप्रत्ययस्य विषयताश्रयोऽर्थः। तस्याभेदसंबन्धेन साध्ये अन्वयः। तथाच सन्देहविषयीभूतसाध्याश्रयत्वं पक्षत्वमिति लक्षणं पर्यवसन्नम्। तथाहि प्रकृतस्थले सन्देहः अनवयवत्वतदभावप्रकारकः, अनुबन्धः अनवयवत्ववान् न वा इति सन्देहः तद्विषयीभूतः साध्यः अनवयवत्वरूपः तदाश्रयत्वम् अनुबन्धः अनवयवत्ववान् इत्यत्र पक्षभूते अनुबन्धे वर्तते इति लक्ष्ये लक्षणसमन्वयः।

अत्र लक्षणे यदि साध्यविशेषणतया सन्दिग्धत्वं न दीयते तदा साध्याश्रयत्वं पक्षत्वमिति लक्षणं स्यात्। एवञ्च अनवयनत्वरूपसाध्याश्रयत्वस्य सपक्षे गगनादौ स्यादतिव्याप्तिः, तदुपादाने तु सपक्षस्य गगनादेः निश्चितसाध्याश्रयत्वेन सन्दिग्धसाध्याश्रयत्वस्याभावात् नातिव्याप्तिः। ननु अनुबन्धान्तर्भावेण सन्देहविषयीभूतसाध्याश्रयत्वस्य सपक्षे सत्त्वादतिव्याप्तिस्तदवस्था इति चेन्न। सन्देहविषयीभूतसाध्याश्रयत्वमित्यस्य साध्यप्रकारकसन्देहविशेष्यत्वमित्यर्थः। तथा च सपक्षे गगनान्तर्भावेण साध्यप्रकारकसन्देहाभावात् साध्यप्रकारकसन्देहविशेष्यत्वस्य गगनादावभावात् नातिव्याप्तिः। नचैवमपि साध्यतावच्छेदकांशे साध्यस्य विशेष्यतया साध्यप्रकारकसन्देहविषयत्वस्य साध्ये अपि सत्वादतिव्याप्तिरिति चेन्न।

साध्यप्रकारकसन्देहविषयत्वमित्यनेन साध्यप्रकारकसन्देहनिरूपितमुख्यविशेष्यत्वस्य विवक्षितत्वात्, साध्यस्य साध्यतावच्छेदकांशे विशेष्यत्वे अपि पक्षांशे प्रकारत्वेन अनवयवत्वत्वनिष्ठप्रकारतानिरूपितानवयवत्वनिष्ठविशेष्यतायाः अनुबन्धनिष्ठविशेष्तानिरूपितप्रकारतासमानाधिकरणतया मुख्यविशेष्यत्वाभावात् नातिव्याप्तिः।

नच अनुबन्धः अनवयवत्ववान् न वा शब्दो नित्यो न वा इति समूहालम्बनात्मके ज्ञाने साध्यप्रकारकसन्देहनिरूपितमुख्यविशेष्यतायाः शब्दे सत्त्वादतिव्याप्तिः इति चेत् उच्यते-साध्यनिष्ठप्रकारतानिरूपिता या सन्देहीया मुख्यविशेष्यता तदाश्रयत्वं पक्षत्वमिति लक्षणस्वीकारेण अदोषात्। तथाहि समूहालम्बनज्ञाननिरूपितशब्दनिष्ठविशेष्तायाः साध्यप्रकारकसन्देहनिरूपितत्वे अपि शब्दे साध्यतदभावयोरप्रकारत्वात् तन्निष्ठप्रकारतानिरूपितविशेष्यतायाः शब्दे असत्त्वात् नातिव्याप्तिः।

अत्रेदं विचार्यते यथा वह्निसाध्यकानुमितौ पर्वतो वह्निमान् न वा इति वह्निप्रकारकसन्देहविशेष्यत्वस्य पर्वते सत्त्वात् तस्य पक्षत्वं निर्वहति तद्वत् प्रकृतस्थले अनुबन्धे कस्य सन्देहः? यद्युच्यते अनवयवत्वस्य सन्देहः तन्न सम्भवति। यतो हि एकस्मिन्नपि निरूपकभेदेन अवयवानवयवत्वयोर्दर्शनादविरोधेन तयोः विरुद्धकोटिद्वयावगाहिज्ञानरूपसन्देहस्याभावात्, यथा घटघटकघकारे घटनिरूपितावयवत्वस्य पटनिरूपितानवयवत्वस्य च सत्त्वात् निरूपकभेदेन घटघटकघकारे अवयवत्वानवयवत्वयोर्दर्शनात्

तयोः परस्परमविरुद्धत्वात् विरुद्धकोटिद्वयावगाहिज्ञानरूपसंशयस्याभावात् घटघटक-घकारः अवयवो न वा इति सन्देहो नोदेति तथा प्रकृतस्थले अपि सन्देहो न स्यात्।

नच बोधकैकनिरूपितयोरवयवत्वानवयवत्वयोः सन्देहः सम्भवतीति वाच्यमिति चेन्न। निरूपकभेदवत् बोधकभेदेन अवयवत्वानवयवत्वयोः एकत्र दर्शनात् न सन्देहः सम्भवति तथाहि सन्प्रत्ययः बोधकः तद्वत् तिप्प्रत्ययः अपि तत्र सन्घटकनकारे बोधकसन्निरूपितावयवत्वस्य बोधकतिप्निरूपितानवयवत्वस्य च सत्त्वात्।

ननु स्वघटितघटकबोधकानवयवत्वसन्देहः सम्भवति। तथाहि एवं साध्यवत्त्वेन विवक्षितो गुप्तिज्किद्भ्यः सन् इत्यत्र नकारस्तद्घटितः गुप्तिज्किद्भ्यः सन् इति सूत्रं, तद्घटकबोधकः सन्, तन्निरूपितावयवत्वानवयवत्वयोः परस्परं विरुद्धत्वात् विरुद्धकोटिद्वयावगाहिज्ञानरूपसन्देहः सम्भवति इत्युक्तावपि न निस्सारः। यतः एवं साध्यवत्वेन चिकीर्षितः सन्घटकनकारस्तद्घटिता सम्पूर्णा अष्टाध्यायी, तद्घटकयत्किञ्चित्, तद्बोधकानवयवत्वस्य गुप्तिज्किद्भ्यः सन् इति सूत्रघटकबोधकसन्निरूपितावयवत्वस्य नकारे सत्त्वेन अविरोधस्तादवस्थ्यः। नच विरोधसम्पत्तये स्वघटितपदघटक-बोधकानवयवत्वस्य सन्देह इत्युच्यते। तथा च न सम्पूर्णां अष्टाध्यायीमादाय अविरोधः, तस्या अपदत्वात्, तथाच न दोषः इत्यपि वक्तुं न युक्तम्। यतोहि प्रमाणे द्वय-**सज्दघ्नञ्मात्रचः** इति सूत्रे स्वपदेनानुबन्धो गृह्यते तद्घटितं पदं द्वयसज्दघ्नञ्मात्रचः इति तद्घटकबोधकमात्रजिति तन्निरूपितानवयवत्वस्य दघ्नच्घटकदकारे , अथ च दघ्नञ्निरूपितावयवत्वस्य च दर्शनेनाविरोधस्तादवस्थ एव।

यद्यत्र समुदायरूपपदमादायाविरोधस्याभावाय पदे पदाघटितत्वं विशेषणं दीयते। तथा सति द्वयसज्दघ्नञ्मात्रच इत्यस्य पदत्वे अपि समासे लुप्यमानप्रत्ययस्य, प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रेण स्थानिवद्भावात् द्वयसजित्यादेरपि सुबन्ततदादित्वात् पदत्वेन समुदायस्य पदघटितत्वात् पदाघटितत्वं नास्त्यतो न दोष इत्यपि न विचारसहं, यतो-हि सन्यतः इत्यत्र स्वघटितं पदाघटितं पदं सनीति तद्घटकबोधक इकारस्तन्निरूपिता नवयवत्वस्य सकारे, अथ च सन्निरूपितावयवत्वस्य सत्त्वेन विरोधानुपपादनात्।

अत्रोच्यते मूले अवयवानवयवत्वसन्देह इत्यनेन स्वघटितविभक्त्यघटित-पदघटकबोधकावयवत्वानवयवत्वयोः परस्परं विरुद्धयोरभिप्रेत्वात् न कुत्रापि दोषः। सन्यत इत्यादौ सनीति सप्तम्यन्तस्य विभक्तिघटितत्वेन विभक्त्यघटितत्वाभावात् न दोषः।

## संशयप्रयोजकधर्मविचारः

यत्र सन्देहो भवति तत्र सर्वत्रापि सन्देहप्रयोजकः साधारणासाधारणधर्मः

कारणतया गृह्यते प्रकृते नकारादौ अनुबन्धे सन्देहप्रयोजकः साधारणासाधारणधर्मः कः? इति जिज्ञासायामुच्यते सनिरूपकपदार्थसन्देहस्य निरूपकसन्देहाधीनतया बोधकतासन्देहस्यैव प्रकृते प्रयोजकत्वात् स च सन्देहः सञ्छब्दो बोधकः सशब्दो वा इत्याकारको न ग्राह्यः सन्देहस्यैकधर्मिकत्वनियमात् अपितु बोधकता सपर्याप्ता सन्पर्याप्ता वा इत्याकारको ग्राह्यः। तदुक्तं भूतिटीकायां–सनो बोधकत्वं ससब्दस्य वेति बोधकत्वसंशयस्य तत्प्रयुक्तस्य सनो नकारे बोधकावयवानवयवत्वसन्देहस्य च श्रोत्रेणानिवर्त्यतया अनुमानस्योपयोग इति भावः। एवञ्च प्रकृतस्थले बोधकता-संशयप्रयुक्तः अवयवानवयवत्वसंदेहो वर्तते। अत्र बोधकतासन्देहप्रयोजकः धर्मः क इति चेदुच्यते व्याकरणशास्त्रे बोधकतायां स्वनिरूपितबोध्यतापर्याप्त्यधिकरण-पर्याप्तानुपूर्वीमत्पर्याप्तत्वं दृश्यते। तद्यथा जराया जरसन्यतरस्यामिति सूत्रे जरोनिष्ठ-बोधकतानिरूपितबोध्यतापर्याप्त्यधिकरणं लक्ष्यस्थं जरसिति, तत्र पर्याप्तिसम्बन्धेन विद्यमानानुपूर्वी जरस्त्वरूपा, तद्वान्सूत्रे जरश्शब्दः, तत्पर्याप्तत्वं जरोनिष्ठायां बोधकता-यामस्ति। तद्वद्यदि बोधकतानिरूपितबोध्यतापर्याप्त्यधिकरणपर्याप्तानुपूर्वीमत्वपर्याप्तत्वं स्यात् तदा बोधकता सपर्याप्ता पूर्वोक्तस्वनिरूपितबोध्यतेत्यादि परिष्कृतनियमे प्रमाणं स्वरूपं शब्दस्याशब्दसंज्ञा इति सूत्रमनेन सूत्रेण बोध्यबोधकयोः शब्दशास्त्रीयसंज्ञा-तिरिक्तस्थले समानानुपूर्वीकत्वं बोध्यते।

तदुक्तं- शब्दस्य स्वं रूपं सञ्ज्ञी शब्दशास्त्रे या सञ्ज्ञा तां विना। अथ च बोधकतायां स्वाश्रयप्रकृतिकविभक्तिप्रकृतित्वपर्याप्त्यधिकरणपर्याप्तत्वमपि दृष्टं यथा–ङसिङ्योः स्मात्स्मिनौ इति सूत्रघटकस्मात्स्मिन्निष्ठबोधकतायां स्वाश्रयप्रकृतिक-विभक्तिप्रकृतित्वपर्याप्त्यधिकरणपर्याप्तत्वं दृष्टं तथाहि स्वपदेन बोधकता गृह्यते, तदाश्रयः स्मात्स्मिन्निति प्रातिपदिकं, तत्प्रकृतिकविभक्तिः औ विभक्तिस्तत्प्रकृति-त्वपर्याप्त्यधिकरणं स्मात्स्मिन्निति तत्पर्याप्तत्वं तन्निष्ठबोधकतायामस्ति तथा यदि सन्प्रत्यये स्यात् तर्हि बोधकता सन्पर्याप्ता। अत्र स्वाश्रयप्रकृतिकेत्यादि नियमस्वीकारे प्रमाणन्तु अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति सूत्रम्। अनेन सूत्रेण धातुप्रत्यय-प्रत्ययान्ततदादिभन्ने शब्दस्वरूपे वृत्तिमत्वं भवति तदा प्रातिपदिकत्वं बोध्यते। वृतिश्च शक्तिलक्षणाव्यञ्जनान्यतमरूपा।

एवञ्च अनुबन्धविशिष्टे सनित्यादिशब्दे बोधकतारूपवृत्तिमत्वं न स्यात् तदा प्रातिपदिकत्वं न स्यात्। प्रतिपदिकत्वाभावे तदुद्देश्यकसुबुत्पत्तिः न स्यात्। तथा च पदत्वाभावेन अपदं न प्रयुञ्जीत इति निषेधप्रवृत्या प्रयोगानुपपत्तिः स्यात्। अतः अनुबन्धविशिष्टे सनित्यत्र बोधकता प्रतिभाति। एवञ्च सन्देहप्रयोजकस्य स्वनिरूपित-

बोध्यतापर्याप्त्यधिकरणपर्याप्तानुपूर्वीमत्त्वस्य स्वाश्रयप्रकृतिकविभक्तिप्रकृतित्वपर्याप्त्यधिकरणपर्याप्तत्वस्य च बोधकतायां सत्त्वात् बोधकतासंदेहः स्पष्ट एव।

किञ्च हलन्त्यमिति सूत्रे अवयवबोधकान्त्यशब्देन अनुबन्धस्य ग्रहणात् तस्य अवयवत्वं प्रतिभाति।उपदेशेऽजनुनासिक इत् इति सूत्रे उपदेशग्रहणाभावे अभ्र आँ अटितः इत्यत्र सामीप्यमूलकमारोपितमवयवत्वमादाय आदित्वप्रयुक्ता आदितश्चेति सूत्रेण इण्निषेधापत्तिकथनपरकभाष्यादनुबन्धे अवयवत्वस्य ज्ञायमानत्वात् अनुबन्धे अवयवत्वतदभावरूपकोटिद्वयोदयेन सन्देहोपपत्तेश्च।

अत्रेदं विचार्यते एकधर्मिककोटिद्वयावगाहिज्ञानस्य सन्देहपदार्थत्वेन सन्देहपदस्य उपात्तधर्मविरुद्धकोट्युपस्थापकत्वस्य नियमस्वभावसिद्धतया एककोट्युपादाने अपि विरुद्धकोटेः उपस्थापनं भवत्येव। यथा–पर्वतो वह्निमान् न वा इत्युक्ते पर्वतांशे वह्नितद् विरुद्धवह्न्यभावश्च प्रकारतया भासते। वह्न्यभावस्य प्रकारतया भानाय वह्न्यभावरूपधर्मस्य सन्देहापलापके शब्दे प्रयोगो नावश्यकः तर्हि अवयवत्वसन्देह इत्युक्तावपि सन्देहमहिम्नैव कोट्यन्तराक्षेपात् अवयवत्वानवयवत्वयोरुपादानं मूलग्रन्थे विरुद्धः स्यात् इति चेदत्र जयदेवमिश्राः स्पष्टार्थमेव मूलग्रन्थे अवयवानवयवत्वयोरुपादानं कृतम्। न हि आक्षेपेन प्राप्तुं योग्यस्य सुस्पष्टतया बोधनाय शब्दो न प्रयुज्यते इति नियमो वर्तते अपितु प्रयुज्यते एव। यथा द्वारम् इत्येतावतदुक्तौ पिधेहि इत्यस्य आक्षेपसम्भवेपि स्पष्टतया बोधनाय कदाचित् द्वारं पिधेहि इति वाक्यप्रयोगः भवत्येवेति वदन्ति।

भूतिकारैस्तु सन्देहे अन्यतरोपादानेनैव सिद्धे उभयोपादानं परिभाषाद्वयसाधारणमिदमवतरणमिति बोधयितुं तथोक्तमित्युक्तम् एतेषां नये अनेकान्ता अनुबन्धा, एकान्ता अनुबन्धा इति अनुमितिरूपपरिभाषाद्वयस्य पक्षतात्वं बोधयितुमुभयोपादानं कृतम्। अनवयवत्वसन्देहे इत्युक्तौ अस्य अनवयवत्वतदभवान्यतरकोटिकसन्देह इत्यर्थः स्यात्। तथा च अनवयवत्वाभाववान् अनवयवत्वव्याप्यवान् न वा इति सन्देहस्यापि अनवयवत्वसन्देहरूपत्वेन एकान्ता अनुबन्धा इति अनुमितीयपक्षतात्वन्न स्यात्। अवयवत्वसन्देह इत्युक्तौ अवयवत्वाभावान् अवयवत्वव्याप्यवान् वेति सन्देहस्यापि अवयवत्वसन्देहरूपतया अनेकान्ता अनुबन्धा इति अनुमितीयपक्षतात्वन्न स्यादिति। प्राचीनैः साध्यतदभावान्तरस्मिन् पक्षसम्बन्धावगाहिसंशयस्यैव पक्षतात्वोपगमात् पर्वतो वह्निमान् इत्युमितौ पर्वतो वह्न्यभाववान् वह्निव्याप्यवान् वेति सन्देहस्य पक्षतात्वाङ्गीकारात्।

अयमाशयः प्रचीनतार्किकैः साध्यसंशयरूपपक्षतात्वं स्वीक्रियते इति प्राक्प्रतिपादितम्। साध्यसंशय इत्यस्य साध्यप्रकारकः साध्याभावप्रकारको वा संशय

अयमेवार्थः। न तु साध्यप्रकारताकत्वे सति साध्यभावप्रकारकः संशयः। यदि
साध्यसंशयस्य साध्यप्रकारताकत्वे सति साध्याभावप्रकारकः संशयः अयमेवार्थः
स्यात्, तर्हि वह्निसाध्यकस्थले पर्वतो वह्निमान् वह्न्यभाववान् वा इति संशयस्यैव
पक्षतात्वं स्यात्।न तु पर्वतो वह्न्यभाववान् वह्निव्याप्यवान् वा इति सन्देहस्य पक्षतात्वं
स्यात्। यतः अस्य सन्देहस्य वह्न्यभावप्रकारकत्वे अपि वह्निप्रकारताकत्वाभावात्।
प्राचीनाचार्यैस्तु पर्वतो वह्न्यभाववान् वह्निव्याप्यवान् वेति, पर्वतो वह्निमान् वह्न्यभाव-
व्याप्यवान् वा इत्यादिसंशयानामपि पक्षतात्वं स्वीक्रियते।

ननु पर्वतो वह्न्यभाववान् वह्निव्याप्यवान् वा इति संशये वह्निव्याप्यस्य प्रकारतया भानात् तस्य साध्यप्रकारकत्वं सम्भवत्येव। एवमेव पर्वतो वह्निमान् वह्न्यभावव्याप्यवान् इति सन्देहे वह्न्यभावव्याप्यस्य प्रकारतया भानात् वह्न्यभावः अपि प्रकारतया भासते एव। अतः न प्राचीनाभिप्रेतपक्षतात्वस्यानुपपत्तिरिति चेन्न। साध्यप्रकारकत्वमित्यस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारकत्वमित्यर्थः। साध्याभावप्रकारकत्वस्य च साध्यतावच्छेदकसम्बन्धावच्छिन्न साध्यतावच्छेदकावच्छन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारताकत्वमित्यर्थः। एवञ्च अनवयवत्वसन्देह इत्येतावन्मात्रं यदि मूले उक्तं स्यात् तर्हि अस्य अवयवत्वसन्देह इत्यस्य अनवयवत्वतदभावान्यतरकोटिकसंशयार्थकतया तेन अनवयवत्वाभाववान् अनवयवत्वव्याप्यवान् इति सन्देहस्यापि धर्तुं शक्यतया तस्य एकान्ता अनुबन्धा इत्यनुमितीयपक्षतात्वन्न स्यात्।

अवयवत्वतदभावान्यतरकोटिसन्देहस्यैव अवयवत्वसाध्यकानुमितौ पक्षतात्वाङ्गीकारात् उक्तसंशये अवयवत्वस्वरूपानवयवत्वाभावरूपसाध्यप्रकारकत्वे अपि अनवयवत्वाभावस्य अवयवत्वरूपसाध्यतावच्छेदकधर्मावच्छिन्नत्वाभावात् साध्यतावच्छेदकधर्मावच्छिन्नप्रकारताकत्वाभावेन पक्षतात्वन्न स्यात्। यदि अवयवत्वसन्देह इत्येतावन्मात्रं यदि मूले उक्तं स्यात् तर्हि तस्य अवयवत्वतदभावान्यतरकोटिकसंशयार्थकतया तेन सन्देहेन अवयवत्वाभाववान् अवयवत्वव्याप्यवान् वा इति सन्देहस्यापि ग्रहीतुं शक्यतया अनेकान्ता अनुबन्धा इत्यनुमितीयपक्षतात्वन्न स्यात्। यतः अनवयवत्वसाध्यकानुमितौ अनवयवत्वतदभावान्यतरकोटिकसंशयस्यैव पक्षतात्वस्वीकारात्। अस्मिन् संशये अनवयवत्वस्वरूपावयवत्वाभावरूपसाध्यप्रकारकत्वे अपि साध्यतावच्छेदकधर्मावच्छिन्नप्रकारताकत्वाभावात् अनवयवत्वसाध्यकानुमितीयपक्षतात्वन्न स्यात्। उभयकोट्युपादाने तु तादृशसंशयस्य परस्परं विरुद्धकोटिद्वयावगाहित्वेन उभयानुमितीयसाध्यप्रकारताकत्वेन उभयानुमितौ पक्षतात्वं सिद्ध्यति।

✦✦✦

# न्यायशास्त्रस्य वेदान्तशास्त्रे प्रभावः

**श्रीसंदीपशर्मा**
न्यायविद्वत्प्रवरः

इह खलु वैरिञ्चे प्रपञ्चे सर्वमपि प्राणिजातं दुःखस्य तद्धेतोश्च प्रहाणाय सुखस्य तत्साधनस्य प्राप्त्यै च प्रवर्ततेऽहर्निशं, मृगयति चाव्यभिचारिणं पन्थानं प्रसिद्धं चेदमसर्वविदामस्माकं समाजे। तद्यदि कश्चित् विपरीतं पन्थानमधिरोहेत, अनर्थम् इयात्।

प्रतिपादितं चेदं भगवत्पादैः ब्रह्मसूत्रभाष्ये यथा–"**एवं बहवो विप्रतिपन्नाः युक्तिवाक्यतदाभाससमाश्रयाः सन्तः अत्राविचार्य यत्किञ्चित्प्रतिपद्यमानो निःश्रेयसात् प्रतिहन्येत, अनर्थं चेयात्**" इति।

तस्मात् पुरूषार्थिनः प्रवर्तमानस्य प्रवृत्तिहेतुभूतं यत् इष्टसाधनत्वादिप्रकारकं ज्ञानं निवृत्तिहेतुभूतं द्विष्टसाधनताज्ञानं च प्रमात्मकमपेक्षते। प्रमा च प्रमाणमन्तरा नोपपद्यते, प्रमाणानि च गुणैरननुगृहीतानि न प्रमामुत्पादयितुं समर्थानि भवन्ति। तानि च प्रमाणानि कानि, के च सहायकास्तेषां गुणाः, किं च तत् प्रमाणैर्जिज्ञास्यमानं प्रमेयं इत्यादिपदार्थतत्वं बुबोधयिषुणा ऋषिणा आन्वीक्षिक्याः विद्यायाः प्रणयनं कृतं गौतमेन। उक्तं च गङ्गेशोपाध्यायैः प्रामाण्यवादे–अथ जगदेव दुःखपङ्कनिमग्न-मुद्दिधीर्षुरष्टादशाविद्यास्थानेष्वभ्यर्हिततमान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय. ... प्रमाणाधीना सर्वेषां व्यवस्थितिरिति च।

सेयं आन्वीक्षिकी न्यायविया न्यायशास्त्रापरपदाभिधेया सती व्यवहारविषयतां भजते। प्रोक्तं च भाष्यकृता वात्स्यायनेनापि ''आन्वीक्षिकी न्यायविद्या'' इति। तदिदं शास्त्रं प्रमाणमुखेन प्रमेयादीनपि प्रतिपादयति, तथाप्यस्य नैर्भर्यं प्रमाणतत्वप्रतिपादने ह्व्यते एतच्छास्त्रस्भिमानिनां विदुषामपि प्रमाणतत्वप्रतिपादने एव महान् श्रमोऽपि दृश्यते।

तत्र हेतुद्वयं भाष्यकृतैव स्पष्टीकृतं। ग्रन्थारम्भे एवं प्रमाणतोर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणं इत्युक्त्वा प्रमाणेन खल्वयं ज्ञातार्थमुपलभ्य तमर्थमभीप्सति

जिहासति वा इत्येकं, तदनु तासां चतुर्थीयमान्वीक्षिकी न्यायविद्या तस्याः पृथक्प्रस्थानाः संशयादयः पदार्थाः तेषां पृथवचनमन्तरेण अध्यात्मविद्यामात्रमियं स्यात् यथोपनिषदः। तस्मात् संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते इति। तस्मादस्य शास्त्रस्य प्रमाणशास्त्रं इत्यपि संज्ञा वर्तते। तस्मात् प्रमाणविषयकत्वादेवास्य शास्त्रस्य दर्शनान्तरेष्वपि प्रभावः दृश्यते। प्रसिद्धं च ''काणादं पाणिनीयं च सर्वशास्त्रेपकारकं'' इति।

अत्र काणादपदं न्यायशास्त्रोपलक्षकम्। तदिदानीम् न्यायशास्त्रस्य वेदान्तदर्शने कः प्रभावः इति विषयश्चिन्त्यते संक्षेपेण।

अनयोरूभयोरपि शास्त्रयोः प्रयोजनं मोक्षः एव। तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय इति श्रुतिमेव आधारीकृत्य शास्त्रद्वयेऽपि मोक्षसाधनं ज्ञानं एव। द्वाभ्यामपि आत्मावाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इत्यादि श्रुतीनां प्रामाण्यमभ्युपगम्य श्रवणमनननिदिध्यासनानां ज्ञानसाधनत्वं प्रातिपाद्यते। अथाऽपि तत्तच्छास्त्रे मुख्यतः प्रतिपाद्यविषयभेदात् अधिकारिभेदाच्च क्वचिद्विरोधोऽपि लभ्यते। यथा जीवब्रह्मणोरभेदविषयको मतभेदः, प्रमाणानां संख्या विषये मतभेदः, भ्रमसामग्रीविषयको मतभेदः मोक्षस्वरूपविषयको मतभेदः इत्यादयः अपि केचन सिद्धान्तभेदाः विलसन्ति। किन्त्वस्य न्यायशास्त्रस्य प्रमाणविषयकत्वेन वेदान्तशास्त्रेपकारकत्वं न निषेद्धुं केनापि शक्यते। भाष्यकारस्याऽपि तादृशार्थे एव तात्पर्यं फलति।

तस्मात् नैयायिकानां पदार्थप्रतिपादनरीतिं वेदान्तिनोऽपि स्पृशन्ति। यथा अद्वैतसिद्धिलघुचन्द्रिकादिग्रन्थेषु दीधिविकारमतं मणिकारमतं आचार्यमतं इत्येवं रीत्या प्रसिद्धन्यायविदुषां नामोल्लेखनपुरस्सरं स्वोक्तौ प्रमाणतया न्यायसिद्धान्तानुपस्थापयन्ति। प्रकृतेऽस्मिन् निबन्धे वेदान्तपरिभाषायामुपलभ्यमानं न्यायशास्त्रस्य प्रभावं चिन्तयामः।

## १. प्रमालक्षणविचारः

न्यायदर्शने तावत् तद्वतितत्प्रकारकज्ञानत्वं प्रमात्वमिति प्रमालक्षणे स्मृतेर्व्यावृत्यर्थं ज्ञानत्वस्थाने अनुभवत्वनिवेशः क्रियते। वेदान्तिभिरपि तदविरोधितया स्वीक्रियते अत एव परिभाषाग्रन्थे ''स्मृतिव्यावृत्तप्रमात्वं चानधिगताबाधितविषयज्ञानत्वं'' इत्युक्तम्। तथा च तैरपि स्मृतेयथार्थत्वं स्वीक्रियते किन्तु तत्र प्रमात्वस्वीकारे तेषां आग्रहो नास्तीति प्रतिभाति। तस्मात् शिखामणिव्याख्यायां अनधिगतत्वनिवेशेऽरुचिः प्रदर्शिता। इदमेव च तत्वं श्रीमदुयनाचार्यैः न्यायकुसुमाञ्जलौ चतुर्थे स्तबके ''सत्त्वेऽपि

तस्याप्रमाणत्वादिति'' विप्रतिपत्तिनिराकर्तुकामैः स्मृतेर्यथा न प्रमात्वं तद्स्फुटं प्रदर्शितं। तस्मादस्मिन् विषये मतयोरनयोः साम्यमेव दृश्यते।

## २. प्रमाणविचारः

प्रमाकरणं हि प्रमाणमित्युच्यते। अत्रांशे नानयोर्मतभेदः ''प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्'' इति वदतो भाष्यकारस्याऽपि तादृशार्थे एव तात्पर्यं पर्यवस्यति। वेदान्तपरिभाषाकारोऽपि 'प्रमाकरणं प्रमाणम्' इति वदति।

प्रमाणानां अतिरिक्तत्वानतिरिक्तत्वविषये मतभेदे सत्यपि सम्प्रतिपन्नप्रमाणविषये प्रक्रियासाम्यमपि प्रायेणोपलभ्यते। तत्र प्रत्यक्षज्ञानं प्रति इन्द्रियाणां करणत्वं नैयायिकाः वदन्ति। वेदान्तिनां मते प्रत्यक्षस्य चैतन्यात्मकत्वस्वीकारेण तस्य य नित्यत्वेन इन्द्रियादिभिः तदुत्पत्तिः न स्वीक्रियते। किन्तु इन्द्रियाणां तत्सन्निकर्षाणां च चैतन्याभिव्यञ्जकवृत्तिजनने एवं विनियोगः स्वीक्रियते। तेषामत्र प्रक्रिया विलक्षणाऽथापि सर्वांशे न्यायमतेन विरोधो न भवति। अस्मिन् विषयेऽपि सर्वत्र वेदान्तपरिभाषाकारः न्यायमतं एव पूर्वपक्षत्वेन स्वीकरोति, निराकृत्य च सिद्धान्तं प्रतिपादयति। किंतु तदपि तत्रैव यत्र मतभेद ततोऽन्यत्र न्यायमतस्वीकारः तेषां इष्टः।

अपरमपि यथा–न्यायनये प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं चेति। विशिष्टबुद्धिं प्रति विशषणज्ञानस्य कारणत्वात् सविकल्पकज्ञानस्य सर्वस्यापि विशिष्ट बुद्ध्यात्मकत्वात् प्रत्यक्षे सविकल्पकज्ञानात् पूर्वं नियमेन निर्विकल्पकज्ञानं स्वीक्रियते तच्च ज्ञानं संसर्गानवगाहि ज्ञानं भवति। तदिदं वेदान्तिभिरपि यथावत् स्वीक्रियते। विशेषः परमयं यत्तैः शब्दादपि निर्विकल्पकं ज्ञानं स्वीक्रियते, तैस्तावत् सोयं देवदत्तः तत्त्वमसीत्यादिवाक्यजन्यज्ञानस्यापि इन्द्रियसन्निकृष्टविषयकत्वात् योग्यत्वाच्च प्रत्यक्षत्वमङ्गीक्रियते।

अनुमितिं प्रतिं अनुमानं करणं इति तु समानम्। अनुमितिं प्रति व्याप्तिज्ञानं करणं इत्यपि च। परं परामर्शः वेदान्तिभिः अनुमितिकारणत्वेन नाङ्गीक्रियते इत्येव तेषां मते दृश्यते। तदुक्तं परिभाषायां

"अनुमितिकरणं च व्याप्तिज्ञानम् तत्संस्कारोऽवान्तरव्यापारः न तु – तृतीयलिङ्गपरामर्शोनुमितिकरणं।'' तदिदं न्यायवासनावासितान्तःकरणेन छात्रेणैव अवगन्तुं शक्यते। तेन स्पष्टं ज्ञायते यद्वेदान्तशास्त्रं अधिजिगीषुणा प्रथमं न्यायशास्त्रं अवश्यं पठनीयम्।यतः प्रतियोगि ज्ञानं विनाऽभावज्ञानं न सम्भवति। तस्मात् परामर्शादयः ये

न्यायमतसिद्धाः अर्थाः ते तस्मिन्नेव शास्त्रे तत्वतः अवगन्तु। शक्याः नान्यत्र। तेन न्यायशास्त्रस्य प्रभावोऽस्मिन् शास्त्रे स्फुट एव।

अन्यदपि परिभाषायां उक्तं यत् - व्याप्तिश्च अशेषसाधनाश्रयाश्रितसाध्य-सामानाधिकरण्यरूपा। साध्यस्य हेत्वधिकरणयावन्निष्ठत्वं अनया पङ्क्त्या लभ्यते। तच्च साध्यस्य हेतुव्यापकत्वे पर्यवस्यति। व्यापकत्वं च हेत्वधिकरणवृत्यन्ता-भावाप्रतियोगित्वं। साध्यं हि तदैव हेत्वधिकरणवृत्यन्ताभावाप्रतियोगि भवति यदा तद् हेत्वधिकरणयावद्वृत्ति भवति।

हेत्वधिकरणयत्किञ्चिद्वृत्तित्वे च हेत्वधिकरणवृत्यत्यन्ताभावप्रतियोगित्वस्यैव सत्त्वात्। तथा च एतादृशस्य हेतुव्यापकीभूतस्य साध्यस्य सामानाधिकरण्यं व्याप्तिः पर्यवस्यति। व्याप्तेश्च स्वरूपमिदं तत्वचिन्तामणिकारेण सिद्धान्तलक्षणप्रकरणे उक्तं "प्रतियोग्यसमाधिकरणयत्समानाधिकरणात्यन्तभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः'' इति। इयमेव व्याप्तिः शब्दभेदेन परिभाषाकारेण उक्ता।

तदनु परिभाषायां व्याप्तिः व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते, तच्च सहचारदर्शनं भूयोदर्शनं सकृद्दर्शनं वेति विशेषो नादरणीयः सहचार दशनस्यैव प्रयोजकत्वात् इति सिद्धान्तः प्रदर्शितः। अत्रापि मणिकारमतस्यैवानुसरणं दृश्यते। यतो हि प्राचीनन्याये भूयोदर्शनस्य व्याप्तिज्ञानं प्रति कारणत्वं उच्यते।

यथा च तर्कसङ्ग्रहे -"तथाहि स्वयमेव भूयोदर्शनेन महानसादौ व्याप्तिं गृहीत्वा"-इत्युक्तं। तदेव मणिकारेण नाङ्गीक्रियते। भूयासां दर्शनानां समाहारः, भूयस्सु अधिकरणेषु दर्शनं, भूयासां साध्यहेतूनां दर्शनम् इत्येवं भूयोदर्शनशब्दस्य सम्भवद्विग्रहत्रयं प्रदर्श्य त्रयं अपि व्यभिचारदोषेण दूषित्वा तैःभूयोदर्शनस्य व्याप्तिज्ञानकारण्त्वं निराकृतम्। तथा च व्यभिचारज्ञानविरहसहकृतसहचारज्ञानं व्याप्तिज्ञानं प्रति कारणं इत्युक्तम्। तदिदानीम् पश्यामश्चेत् परिभाषाकारोक्ताः उपायाः नव्यप्राचीनमतसङ्कीर्णाः सन्तोऽपि न्यायसम्मताः सन्ति। तदिदमपि न्यायशास्त्रप्रभावम् स्पष्टयति।तदग्रे यदनुमानस्य अन्वयित्वमात्रं प्रदर्शितं न तु तस्य त्रैविध्यमपि तदपि न्यायविदैव अवगन्तुं योग्यं नान्येन।ततश्च परार्थानुमानप्रदर्शनावसरेऽपि परार्थानुमानस्य न्यायसाध्यत्वं एव लक्षणं उक्तं यच्च मणिकारादि सम्मतम्। तस्मात् स्पष्टमेव हि न्यायदर्शनस्य प्रभावः वेदान्तशास्त्रे ज्ञायते। न्यायदर्शनं च सश्रमम् अनधीत्य वेदान्तशास्त्रे श्रमं कुर्वतां हि क्लेशाधिक्यं अनवगतिश्चैव भवतः। तस्माद् वेदान्तशास्त्रविविदिषुणा

प्रथमं न्यायशास्त्रं अवश्यं अध्येतव्यम्। एवं न्यायदर्शनोक्तेषु षोड़शपदार्थेषु प्रमाणविषये एव प्रायेण मतभेदः स्यात् प्रमेयेषु द्वादशविधेषु आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रेत्यभावफलदुःखापवर्गेषु अपवर्गादीनां केषाञ्चिदेव स्वरूपविषये मतभेदः अन्यत्र तु न तथा दृश्यते। तथाऽन्येषां संशयादिनिग्रहस्थानान्तानां तथैव स्वदर्शने सवीकारः वेदान्तिभिरपि क्रियते। तदयं तेषामभ्युपगमः स्वदर्शने न्यायशास्त्रप्रभावं ज्ञापयति। तदित्थं स्वमतिवैभवेनाभिधाय विरमामि।

✦✦✦

# लघुचन्द्रिकायां पक्षतावच्छेदकविचारः

श्रीहरिशिवरामधायगुडे
न्यायवेदान्तविशारदः
चेन्नै

श्रीमन्मधुसूदनस्वामिपादैः अद्वैतसिद्धिरिति न्यायामृतस्य खण्डनात्मकः स्वमतमण्डनात्मकश्च ग्रन्थः कृतः। अस्मिन्ग्रन्थे क्रमशः मिथ्यात्वानुमानानि प्रवृत्तानि, तत्र पक्ष-साध्य-हेतुविचाराः प्रवृत्ताः। तत्सन्दर्भे एतद्ग्रन्थव्याख्यानभूते ब्रह्मानन्दस्वामिपादविरचिते लघुचन्द्रिकाख्यग्रन्थे महता ग्रन्थप्रबन्धेन मिथ्यात्वानुमाने अपेक्षितपक्षतावच्छेदकविचारः कृतः। तत्रांशिकविचारः यथाग्रन्थमत्र शोधप्रबन्धे प्रस्तूयते।

मूले अद्वैतसिद्धौ एवं विप्रतिपत्तौ प्राचां प्रयोगाः प्रदर्शिताः-'**विमतं मिथ्या, दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात्, शुक्तिरूप्यवत्**' इति। तत्र विमतं नाम विप्रतिपत्तिजन्यसंशयविशेष्यम्। तत्र विपदस्य विरुद्धोभयकोटिकत्वमर्थः। तस्य च संशये अन्वयः। तथा च विमतमित्यस्य विप्रतिपत्तिजन्यसंशयविषयपक्षः इत्यर्थः। तथा च उक्तविषयतया विप्रतिपत्तेः पक्षतावच्छेदकत्वम्। नावयवेष्विति। "तत्र पञ्चतयं केचित् द्वयमन्ये वयं त्रयम्" इति शास्त्रदीपिकोक्तरीत्या तार्किकप्रतिवादित्वे पञ्चावयवाः प्रयोक्तव्याः। मीमांसकप्रतिवादित्वे त्रयवयवाः। तत्रापि "उदाहरणपर्यन्तं, यद्वा उदाहरणदिकं" इति मीमांसकाः। उदाहरणोपनयरूपावयवद्वयवादिनो बौद्धा इति।

अत्र विप्रतिपत्तिमात्रस्य पक्षतावच्छेदकत्वे सिद्धसाधनबाधौ भवतः। यतो हि 'ब्रह्म प्रत्यगभिन्नं न वा' इति विप्रतिपत्तेः विशेष्यतासम्बन्धेन ब्रह्मणि विद्यमानत्वात्, तत्र च मिथ्यात्वस्याभावाद्बाधः। एवं शुक्तिरूप्येपि 'शुक्तिरूप्यं सद्वा असद्वा' इतिविप्रतिपत्तेः सत्वात् तत्र च पूर्वनिर्दिष्टमिथ्यात्वस्य प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपस्य सिद्धत्वात् सिद्धसाधनम्। घटादिमात्रविशेष्यकविप्रतिपत्तिनिवेशे प्रपञ्चमात्रस्य मित्थ्यात्वासिद्ध्या अनुमानस्य सामान्यत्वहानिः।

तत्राह–स्वनियामकनियतयेति। स्वस्याः विप्रतिपत्तेः नियामकं इत्युक्ते प्रकृतानुमान पक्षतावच्छेदकत्वयोग्यतासम्पादकम्। विप्रतिपत्तित्वमात्रं न तादृशयोग्यतासम्पादकम्। किन्तु ब्रह्मप्रमातिरिक्ताबाध्यत्वावच्छिन्नविशेष्यकत्वादित्रयम्। तथा च 'ब्रह्मप्रमातिरिक्ता-

बाध्यत्वे सति सत्वेन प्रतीत्यर्हं चिद्भिन्नं मिथ्या न वा' इति विप्रतिपत्तेः पूरोक्त-विषयतासम्बन्धेन ब्रह्मशुक्तिरूप्ययोरभावात् न बाधसिद्धसाधने।

एवं सति ब्रह्मप्रमातिरिक्ताबाध्यत्वावच्छिन्नविशेष्यकत्वविशिष्टसत्वेन प्रतीत्यर्हत्वावच्छिन्नविशेष्यकत्वविशिष्टचिद्भिन्नत्वावच्छिन्नविशेष्यकत्वविशिष्ट विप्रतिपत्तित्वेन विप्रतिपत्तेः पक्षतावच्छेदकत्वमायाति। तथा च एतादृशरूपत्रय-विशिष्टविप्रतिपत्तित्वेन तस्याः पक्षतावच्छेदकत्वे गौरवम् इति चेत्,

न, तादृशरूपत्रयविशिष्टविप्रतिपत्तित्वेन न तस्याः पक्षतावच्छेदकत्वं परन्तु तादृशविप्रतिपत्तिव्यक्तेः तद्व्यक्तित्वेनैव पक्षतावच्छेदकत्वमिति अत्यन्तलाघवम्। तादृशरूपाणां तु विप्रतिपत्तिव्यक्तिपरिचायकत्वमात्रमिति।

उक्ताबाध्यत्वादिरूपाणां विप्रतिपत्तिपरिचायकघटकतया अवश्यं प्रथमोपस्थित-त्वात् तेषामेव पक्षतावच्छेदकत्वं युक्तमिति 'यद्वा' कल्पानुसरणम्।

तत्र ग्रन्थे पूर्वोक्तयुक्त्या सामानाधिकरण्येन अनुमित्युद्देश्यायां सामानाधिकरण्येन साध्यसिद्धेः विरोधित्वमते ब्रह्मप्रमातिरिक्ताबाध्यत्वविशेषणस्य शुक्तिरूप्ये सिद्धसाधन-वारणप्रयोजनकत्वमुक्तम्। तत्रैवमाशङ्का भवति प्रपञ्चसत्यत्ववादिभिः कैरपि शुक्तिरूप्ये वक्ष्यमाणसदसद्विलक्षणत्वरूपसाध्यं नाङ्गीक्रियते। भट्टभास्करादयस्तु सत्यमेवरूप्यं शुक्त्यादौ उत्पद्यते इत्याहुः। माध्वादयस्तु शुक्तिरूप्यं असदेवोत्पद्यते इत्यभिमानिनः इति प्रपञ्चसत्यत्ववादिमते शुक्तिरूप्ये सदसद्विलक्षणत्वरूपसाध्यमादाय न सिद्धसाधनप्रसङ्ग इति तद्वारकं ब्रह्मप्रमातिरिक्ताबाध्यत्वरूपं पक्षविशेषणं व्यर्थमित्याशङ्का।

समाधानमुच्यते– भट्टभास्करानुयायिना केनचित् भट्टभास्करसिद्धान्तः "सत्यं शुक्तिरूप्यं जायते" इति तत्सिद्धान्तस्य अन्यथा अर्थवर्णनं क्रियते। तथाहि– "सत्यं जायते" इत्यत्र किन्नाम सत्यत्वं? न कालसम्बन्धित्वं, तस्य "जायते" इत्यनेनैव लब्धत्वात्। अतः असद्विलक्षणत्वं सत्यशब्दार्थः। तथा च शुक्तिरूप्यस्य शुक्तितत्त्वज्ञानबाध्यत्वात् सद्विलक्षणत्वमपि सिद्ध्यति। एवञ्च तादृशरीत्या शुक्तिरूप्ये सदसद्विलक्षणत्वरूपसाध्यसिद्धिं अङ्गीकरोति यः भट्टभास्करानुयायी तं प्रत्यनुमान-प्रयोगे शुक्तिरूप्ये सिद्धसाधनवारणप्रयोजनकत्वं सेत्स्यति ब्रह्मप्रमातिरिक्ताबाध्यत्व विशेषणस्येति न तद्विशेषणवैय्यर्थ्याशङ्का। तादृशस्य वादिनः अभावेपि प्रपञ्चसत्यत्ववादीन् प्रति अद्वैतसिद्धान्तिनां तादृशमिथ्यात्वानुमानात् प्राक् क्वचित् शुक्तिरूप्यादौ उपायान्तरेण अर्थापत्त्यादिना साध्यं प्रसाधनीयम्। यथा 'शुक्तिरूप्यं असत् स्यात् चेत् न प्रतीयेत, प्रतीयते चेति न असत्'। 'शुक्तिरूप्यं सत् स्यात् चेत् न बाध्येत, बाध्यते चेति न सत्' इत्यर्थापत्त्या शुक्तिरूप्ये साध्ये सिद्धे, शुक्तिरूप्यस्य च पक्षान्तर्गतत्वात् येन

केनापि सिद्धसाधनमुद्भावयितुं शक्यते इति तद्वारणार्थं ब्रह्मप्रमातिरिक्ताबाध्यत्वविशेषणं सार्थकम्। अत्र यदि तार्किकेण सह विप्रतिपत्तिः अवच्छेदकावच्छेदेनानुमितिश्चोद्देश्या तदा पक्षैकदेशे साध्यसिद्धेः अप्रतिबन्धकत्वात् तद्वारकं तादृशाबाध्यत्वविशेषण-मनुपादेयमेव। इतरविशेषणे एव देये। तत्रापि तुच्छे बाधोद्भावनं भवति चेदेव तद्वारकं सत्वेन प्रतीत्यर्हत्वविशेषणं देयम्। अन्यथा चिद्भिन्नत्वमात्रस्य पक्षता-वच्छेदकत्वम्। तथा च वादिभेदेन विशेषणभेदे द्वाभ्यां सह विप्रतिपत्तौ प्राप्तायां त्रीण्यपि विशेषणानि देयानि वा? इति चेत्,

न, एकदा तु न द्वाभ्यां सह विप्रतिपत्तिः तथैव कथकानां सम्प्रदायात्। एवञ्च यदेव यं प्रति विप्रतिपत्तौ पक्षविशेषणं तदेव तं प्रति न्यायप्रयोगे पक्षतावच्छेदकमिति भावः।

अत्रानुमाने सत्वेन प्रतीत्यर्हत्वं तुच्छे बाधवारणार्थमुपन्यस्तं, तत्, सत्वेन प्रतीतियोग्यत्वरूपम्। तच्च चित्तादात्म्यमेव। तथा च व्यावहारिके घटादौ चित्तादात्म्यं व्यावहारिकं घटादेः व्यावहारिकत्वात्। शशविषाणादौ अनध्यस्तेपि प्रातिभासिकं चित्तादात्म्यं भवतु। आरोपात् सम्भवति च तत्। तथा च सत्तादात्म्यस्य अलीकेपि सत्वात्, न तेन दलेन तत्र बाधवारणसम्भवः। यदि तद्दोषवारणार्थं व्यावहारिक-सत्तादात्म्यमिति सत्वेन प्रतीत्यर्हत्वमित्यस्य अर्थः स्वीक्रियते तदा तादृशस्य सत्ता-दात्म्यस्य अलीके असत्वात् दोषवारणं भवति परं मूलग्रन्थासंगतिः प्रसज्यते। कथमितिचेत् इत्थं-मूले "यदि पुनः पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरुद्देश्या तदैकदेशे साध्यसिद्धावपि सिद्धसाधनाभावात् तद्वारकं विशेषणं ब्रह्मप्रमातिरिक्ताबाध्यत्व-रूपमनुपादेयमेव" इति ग्रन्थविरोधः स्यात्। यतोहि पूर्वोक्तरीत्या व्यावहारिकसत्तादात्म्यस्य प्रातीतिकशुक्तिरूप्ये असत्वात् तेन तद्रूप्यस्य पक्षबहिर्भूतत्वात् तत्र सिद्ध-साधानाप्रसक्तत्वादेव "यदिपुनः" इत्यनेन तद्दोषवारकविशेषणमनुपादेयमिति अप्रसक्तमुक्तं स्यात् इति ग्रन्थविरोधः स्यात्। तथा च सत्वेन इत्यस्य व्यावहारिकसत्तादात्म्यमित्यर्थः न वर्णयितुं शक्यः। एवञ्च शुक्तिरूप्यसाधारणमेव सत्तादात्म्यं विवक्षणीयम्। तथा च तुच्छे बाधवारणासम्भवः।

तत्र समाधानम्– तत्रैव हि सत्तादात्म्याध्यासः यत्र तत्समानकालमध्यासः। तदर्थश्च अनुयोग्याकारेण परिणममानाविद्यायाः एव अनुयोगिनिष्ठसत्तादात्म्या-कारेणपरिणममानत्वादिति नियमः। शुक्तिरूप्यस्थले रूप्याकारेण परिणममानाविद्यात्वं यस्यां शुक्त्यविद्यायां तस्यामेव तादृशरूप्यनिष्ठसत्तादात्म्याकारेणाविद्यात्वमिति। अत्र नियमे व्याप्यं भवति तन्निष्ठसत्तादात्म्याकारेण परिणममानाविद्यात्वं, व्यापकञ्च

तदाकारेण परिणममानाविद्यात्वम्। तथा च तुच्छस्थले अलीकाकारेण अविद्यापरिणामाभावात् व्यापकाभावादेव व्याप्यः तन्निष्ठसत्तदादात्म्याकारेण अविद्यापरिणामः निवर्तते वह्निनिवृत्तेः धूमनिवृत्तिरिव। तथा च सत्वेन प्रतीत्यर्हत्वस्य भवति तुच्छे दोषवारकत्वमिति। पूर्वोक्तनियमस्य सामान्यत्वेन व्यभिचारमाशङ्कते पूर्वपक्षी-यथा तदाकारेण परिणममानाविद्यायाः तन्निष्ठतादात्म्याकारेण परिणामः। तथा च लोहितस्फटिकस्थले स्फटिकाकाराविद्यापरिणामाभावेपि तन्निष्ठलौहित्यतादात्म्याकारेण अविद्यापरिणामः दृश्यते। तथा च व्यभिचारः। तथा च पूर्वनियमासिद्धेः अविद्यायाः अलीकाकारपरिणामाभावेपि तन्निष्ठसत्तादात्म्याकारेण परिणामोऽस्तु। तथा च तद्विशेषणस्य बधावारकत्वं तदवस्थमेव।

अत्र समाधिः- सामान्यनियमे व्यभिचारेपि तदाकारपरिणताविद्याया एव तन्निष्ठसत्तादात्म्याकारेण परिणामः इति नियमे तु न व्यभिचारः।

पूर्वपक्षी शङ्कते-सत्तादात्म्यं नाम सत्प्रतियोगिकतादात्म्यं, तादृशस्य अलीके पूर्वनियमानुसारमभावेपि सदनुयोगिकतादात्म्यं अलीके आस्ताम्। तथा च बाधावारकत्वं तदवस्थमेवेति चेत्,

तादृशतादात्म्यसाधकस्य 'सदलीकं' इति प्रत्ययस्य अभावात् न तदापत्तिः। अत एव "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इतिपातञ्जलसूत्रे शब्दज्ञानमात्रजन्य-विकल्पाख्यवृत्तेः सदविषयकत्वरूपं वस्तुशून्यत्वमुक्तम्। "प्रमाणविकल्पनिद्रास्मृतयः" इतिवृत्तिविभाजकेपि पातञ्जलसूत्रे विकल्पात्पृथक् विपर्ययस्योक्तिः विपर्ययस्य विकल्पवद्वस्तुशून्यत्वाभावात्। तुष्यतु दुर्जन इति न्यायेन अलीके कथञ्चित् सत्तादात्म्यसम्बन्धित्वस्य सिद्धेपि प्रकृते सत्प्रतियोगिकतादात्म्यस्यैव निवेशात् न दोषगन्धोपीति।

माध्वादिमते शुक्तिरूप्यादेः अलीकतास्वीकारात् 'इदं रूप्यं सत्' इत्याकारक-भ्रमेण तत्र सत्प्रतियोगिकतादात्म्यावगाहनात् माध्वादीन् प्रति न्यायप्रयोगे शुक्तिरूप्ये सदसद्विलक्षणत्वरूपसाध्यस्य अभावात् बाधः। माध्वादिभिः भ्रमस्थले असत्ख्याति-स्वीकारेण अनिर्वचनीयख्यात्यनभ्युपगमेन शुक्तिरूप्यवत् तन्निष्ठसत्तादात्म्यस्यापि अलीकस्यैवोत्पत्तेः न दोषः। अनलीकस्यैव सत्तादात्म्यस्य स्वीकारे अलीके अत्यन्ताभावप्रत्ययवत् सत्तादात्म्ये जायमानः अत्यन्ताभावप्रत्ययो न स्यात्। अलीकस्यैवतन्मते अत्यन्ताभावप्रतियोगित्वात्। एवं तैः भ्रमस्थले अधिष्ठानान्यभ्रमविषयस्य अवश्यं अलीकत्वं स्वीकार्यं, अन्यथा शुक्तिरूप्यादेरपि अनलीकत्वापत्तिः। तद्वारयितुं नियमस्वीकारे तु अधिष्ठानान्यभ्रमविषयत्वात् सत्तादात्म्यस्य अलीकत्वसिद्धेः न

दोषः।

सत्स्वरूपमेव तादात्म्यं तत्र भासते इत्याग्रहः तथापि न दोषः सदसतोरुपरागा-भावात्। तथा च सत्प्रतियोगिकतादात्म्यस्य तत्राभावात् तादृशतादात्म्यानुयोगिकत्वरूप-पक्षतावच्छेदकानाक्रान्तत्वात् शुक्तिरूप्यस्य न बाधः इति।

सत्प्रतियोगित्वविशिष्टतादात्म्यत्वावच्छिन्नाधिकरणत्वस्य पक्षतावच्छेद-ककुक्षिप्रवेशे तादृशाधिकरणत्वस्य चिद्भिन्ने एव सत्वात् तेनैव चितः पक्षबहिर्भावसम्भवे चिद्वारकं चिद्भिन्नत्वविशेषणं व्यर्थम् इति चेत्, सत्यं पूर्वोक्तस्य सत्वेन प्रतीत्यर्हत्वस्य निवेशे चिद्भिन्नत्वम् अनुपादेयमेव। एतावता पक्षतावच्छेदकविशेषणानां पक्षतावच्छेद-ककुक्षिप्रवेशसार्थक्यम् उपादेयानुपादेयत्वञ्च चिन्तितम्।

इतःपरं न्यायभास्करोक्तानि कानिचनदूषणानि उद्भाव्य तानि खण्ड्यन्ते। मूले विमतं मिथ्या दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात् शुक्तिरूप्यवत् इति मिथ्यात्वानुमानम् उक्तम्। तत्र विमतमिति पक्षग्रहणम् अयुक्तम्। विमतत्वन्नाम संशयनिरूपितविषयत्वं, विषयतासंबन्धेन संशयो वा। एतादृशविमतत्वस्य 'ब्रह्मप्रत्यगभिन्नं न वा', 'अलीकं शाब्दातिरिक्तप्रतीतिविषयो न वा' इत्याकारकस्य ब्रह्मतुच्छयोः सत्वात्, तत्र च मिथ्यात्वस्य असत्वात् बाधः इति। एवं विषयतामात्रस्य पक्षतावच्छेदकत्वसम्भवे तस्यां संशयनिरूपितस्य व्यर्थत्वात्। विषयतया संशयस्य पक्षतावच्छेदकताकल्पे संशयत्वघटकज्ञानत्वातिरिक्तभागस्य व्यर्थत्वाच्च इति च दूषणानि।

समाधानं - प्रकृतविप्रतिपत्तिविषयत्वस्य विषयतासंबन्धेन, तादृशविप्रतिपत्तेर्वा पक्षतावच्छेदकत्वस्वीकारे न ब्रह्मतुच्छयोः बाधापत्तिः। विप्रतिपत्तिविशेषनिवेशादेव तत्कोटौ तद्विषयतायाञ्च ज्ञानत्वातिरिक्तभागस्य संशयनिरूपितत्वस्य ब्रह्मतुच्छयोः बाधवारकत्वात् न व्यर्थता। यद्वा विप्रतिपत्तिविषयतावच्छेदकमेव पक्षतावच्छेदकमस्तु इति पक्षे सामानाधिकरण्येन अनुमितेः उद्देश्यत्वे सामानाधिकरण्येन साध्यसिद्धेः न प्रतिबन्धकता इति मते ब्रह्मप्रमातिरिक्ताबाध्यत्वमित्यस्य शुक्तिरूप्यादौ सिद्ध-साधनवारणप्रयोजकत्वमुक्तम्, तदपि न संभवति। यतोहि प्रपञ्चसत्यत्ववादिभिः शुक्तिरूप्यादौ सदसद्विलक्षणत्वरूपं साध्यं न अंगीक्रियते। भट्टभास्करादिभिस्तु शुक्तिरूप्यादेः सत्यत्वमेव स्वीक्रियते। माध्वादयः शुक्तिरूप्यादेः अलीकत्वमेव अभिमन्वते। अतः सिद्धसाधनत्वाभावादेव पूर्वोक्तं तद्वारकं विशेषणं व्यर्थमिति न्यायभास्करोक्तदूषणान्तरम्। उक्तमेव तत्समाधानं यत् भट्टभास्करानुयायिनं प्रकल्प्य तन्मते सिद्धसाधनवारणरूपम् इति।

तादृशवादिनं प्रकल्प्य अपि पूर्वोक्तविशेषणसार्थक्योपपादनमपि अयुक्तम्। कुत इति चेत् ब्रह्मप्रमातिरिक्ताबाध्यतवविशिष्टमिथ्याभूतशुक्तिरूप्योत्पत्तिस्वीकर्तुः प्रतिवादिनः अपि कल्पनसंभवेन एवम्प्रकारेण अनवस्था स्यादिति न्यायभास्करोक्तान्यद्दूषणम्।

तत्समाधानम्-मिथ्यात्वानुमितेः प्राक् ब्रह्मप्रमातिरिक्ताबाध्यस्य बाधदर्शनरूपप्रयोजकमन्तरेण मिथ्यात्वस्य वक्तुमशक्यतया तादृशवादिनः कल्पनमेव न संभवतीति नानवस्थादोषः तत्प्रयुक्तपूर्वोक्तवाद्यकल्पनञ्च।

किञ्च ब्रह्मण्यारोपितध्वंसप्रतियोगित्वादौ सिद्धसाधनं दुर्वारम्। ब्रह्मनिष्ठध्वंसप्रतियोगित्वादेः ब्रह्म न ध्वंसप्रतियोगि इति प्रमाबाध्यत्वं अवश्यं वक्तव्यम्, तादृशप्रमायाः ब्रह्मविषयकत्वेन ब्रह्मप्रमात्वात् तदतिरिक्तत्वाभावात् ब्रह्मप्रमातिरिक्तबाध्यत्वरूपपक्षतावच्छेदकाक्रान्तत्वात् तादृशध्वंसप्रतियोगित्वस्य तत्र च मिथ्यात्वस्य सिद्धत्वात् सिद्धसाधनम्। तद्वारकत्वं ब्रह्मप्रमेत्यादिविशेषणस्य न सम्भवतीति दोषः। शुद्धस्य ब्रह्मणः ब्रह्म न ध्वंसप्रतियोगि इत्याकारकसप्रकारकज्ञानविषयत्वाङ्गीकारात् तादृशज्ञानस्य ब्रह्मप्रमातिरिक्तत्वात् ब्रह्मप्रमा इत्यनेन अखण्डाकारवृत्तेरेव विवक्षिततत्वात् न सिद्धसाधनावारकत्वदोषः उक्तविशेषणस्य। ब्रह्मप्रमा इत्यस्य ब्रह्मविषयकप्रमा इति विवक्ष्यते, ब्रह्मप्रमातिरिक्ताबाध्यत्वमित्यस्य ब्रह्मान्यविषयकज्ञानाबाध्यत्वम् इत्यर्थः परिष्क्रियते। तथा च ब्रह्म न ध्वंसप्रतियोगि इति ज्ञानस्य ब्रह्मान्यध्वंसविषयत्वात् उक्ताबाध्यत्वस्य तादृशध्वंसप्रतियोगित्वे असत्वात् पक्षतावच्छेदकानाक्रान्तत्वादेव न बाधः।

एवं परिष्कृते आश्रयासिद्धिः—अध्यस्तं प्रति अधिष्ठानसाक्षात्कारत्वेनैव बाधकता, तथा च "इयं शुक्तिःअयं घटः" इतिसमूहालम्बनग्रहस्य रूप्यादिबाधाकत्ववत् "अहं ब्रह्म घटः सन्" इतिसमूहालम्बनस्यापि प्रपञ्चबाधकत्वं स्वीकार्यम्। तथा च ब्रह्मान्यघटविषयकत्वात् तादृशज्ञानस्य, ब्रह्मान्यविषयकज्ञानाबाध्यत्वस्य प्रपञ्चे अभावात् आश्रयासिद्धिः।

समाधानम्-'अहं ब्रह्म घटः सन्'इति ज्ञानस्य आहार्यत्वात् शुक्तित्वाभाववति इयं शुक्तिः इति ज्ञानस्य इव अबाधकत्वात्। पूर्वोक्तसमूहालम्बनज्ञानस्य आहार्यत्वमेव कथमिति चेत्, उच्यते द्वैताद्वैतविषयतयोः विरोधात्, तयोः विरोध एव कथमिति चेत् अद्वितीयब्रह्मसाक्षात्कारात् पूर्वं "एकमेवाद्वितीयम्" इति श्रुतिजन्याद्वैतत्वप्रकारक ब्रह्मानुभवजन्योद्बुद्धसंस्कारस्य आवश्यकत्वेन तस्यैव द्वैतविशेष्यकसत्तादात्म्यविषयताशालिधीविरोधात् पूर्वोक्तज्ञानस्य समूहालम्बनस्य एवं श्रौतबोधजन्योद्बुद्धसंस्कारस्य

च समानप्रकारकविशेष्यकत्वाभावात् कथन्तयोः विरोधित्वमिति उच्यते– यथा ह्रदे वह्न्याभावः इति ज्ञानं प्रति ह्रदः वह्न्यभाववान् इत्याकारकनिश्चयस्य विरोधिता तद्वत्।

ब्रह्म द्वितीयाभाववत् इत्युद्बुद्धसंस्कारस्य द्वितीये सत्तादात्म्यावगाहिधीविरोधिता स्यान्नाम कथंपुनः घटत्वाद्यवच्छिन्नसत्तादात्म्यावगाहिधीविरोधिता इति चेत् यथा घटपटादयः सर्वान्तर्गताः इति धियः अनन्तरं 'सर्वं गगनाभाववत्' इति निश्चयस्य 'घटः गगनवान्' 'पटः गगनवान्' इति निखिलज्ञानप्रतिबन्धकता तथा घटादयः द्वितीयाः' इति ज्ञानोत्तरं 'ब्रह्म द्वितीयाभाववत्' इति श्रौतबोधजनितोद्बुद्धसंस्कारस्य घटः सन्नितिबुद्धिप्रतिबन्धकत्वोपपत्तेः। यद्वा तद्धर्मावच्छिन्नवत्ताबुद्धौ घटत्वाद्यवच्छिन्नवत्ताबुद्धौ तद्व्यापकतया गृहीतधर्मावच्छिन्नाभावविषयकोद्बुद्धसंस्कारस्य घटत्वादिव्यापकतया गृहीतद्वित्वावच्छिन्नाभावविषयकोद्बुद्धसंस्कारस्य प्रतिबन्धकत्वेन तत्सत्वे व्याप्यधर्मावच्छिन्नविषयकबुद्धेरनुदयेन पूर्वोक्तसमूहालम्बनस्य अनाहार्यत्वानुपपत्तिः। तथा च पूर्वोक्तसमूहालम्बनस्य आहार्यत्वेन अप्रतिबन्धकत्वादेव ब्रह्मान्यविषयकज्ञानाबाध्यत्वस्य प्रपञ्चे सत्वात् नाश्रयासिद्धिः।

यदिच 'अहं ब्रह्म घटः सन्' इति समूहालम्बनस्यापि प्रपञ्चबाधकत्वमित्याग्रहः तदा ब्रह्मप्रमातिरिक्ताबाध्यत्वमित्यस्य ब्रह्मान्यविषयकत्वावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यतावत् स्वस्वोपादानान्यतरत्वावच्छिन्नाभावकान्यत्वमित्यर्थः। तथा च शुक्तिरूप्यस्थले ब्रह्मान्यविषयकत्वं शुक्तिविषयकत्वं तदवच्छिन्ना या तादृशान्यतरत्वावच्छिन्नाभावप्रयोजकता, तन्निरूपितप्रयोज्यतावत् यत् स्वं शुक्तिरूप्यं स्वोपादानं शुक्त्यज्ञानं तदन्यतरत्वावच्छिन्नाभावः तादृशाभावकत्वमेव शुक्तिरूप्ये नतु तादृशाभावकान्यत्वमिति तस्य पक्षबहिर्भावात् सिद्धसाधनवारकत्वं उक्तविशेषणस्य। एवं उक्तसमूहालम्बनस्थले ब्रह्मान्यविषयकत्वं घटविषयकत्वं तदवच्छिन्नप्रयोजकतानिरूपितप्रयोज्यतावती घटघटोपादानमूलाज्ञाने एतदन्यतरत्वावच्छिन्नाभावो न भवति यतोहि घटादिविषयकत्वस्य मूलाज्ञानप्रतियोगिकान्यतराभावाप्रयोजकत्वात्। तथा च तादृशान्यतराभावकत्वं घटादिप्रपञ्चे नास्ति तदन्यतरत्वरूपपक्षतावच्छेदकं वर्तत इति नाश्रयासिद्धिः इति न्यायभास्करोक्तानि कानिचन दूषणानि ब्रह्मानन्दीयभावप्रकाशमनु यथामतिपरिहृतानि।

॥ इतिशिवम् ॥

✦✦✦

# प्रमालक्षणविचारः

ज.सूर्यनारायणः
न्यायविद्वान्
चेन्नै

'मानाधीना मेयसिद्धिः' इति युक्त्यनुसारेण सर्वाण्यपि शास्त्राणि स्वग्रन्थप्रतिपाद्य-अर्थनिरूपणार्थं कानिचन प्रमाणानि स्वीकुर्वन्ति, अत एव बहुत्र ग्रथेषु प्रमाणनिरूपणे प्रामुख्यं दृश्यते। प्रमाणं नाम प्रमाकरणम्, 'घटितज्ञानं घटकज्ञानाधीनम्' इति प्रमाघटितस्य प्रमाणस्य निरूपणार्थं प्रमानिरूपणमपि अत्यावश्यकम्। अत एव प्रायशः सर्वत्र प्रमानिरूपणं कृतम्। तन्मनसि निधायैव मया अत्र प्रमालक्षणविचारः क्रियते। तत्रापि प्रथमतः वैशेषिकसूत्रानुसारेण प्रमालक्षणविचारं कृत्वा, तद्विषये संक्षेपतः न्यायसूत्रविचारम् उपस्थाप्य, अन्यतर्कग्रन्थेषु एवमेव अन्यदर्शनेषु च विद्यमानानां प्रमालक्षणानां स्वरूपपरिचयं दत्वा, उपलभ्यमानेषु अर्वाचीनतरं "महामहोपाध्याय-श्रीराजेश्वर-द्राविडमहाभागैः" दिनकरीव्याख्यारूपायां रामरुद्रीं प्रणीतं प्रमालक्षणं विस्तारेण प्रतिपाद्यते।

## वैशेषिकसूत्रे प्रमालक्षणम्

वैशेषिकसूत्रेषु 'अदुष्टं विद्या'(९-२-१२) इति सूत्रेण प्रमालक्षणमुक्तम्। वैशेषिकसूत्रे सर्वमपि ज्ञानं '(i)विद्या, (ii)अविद्या'- भेदेन द्विविधमित्युक्तम्। विद्या नाम प्रमा, अविद्या नाम भ्रमः। तत्रापि प्रथमतया अविद्यायाः निरूपणं 'इन्द्रियदोषात् संस्कारदोषाच्च अविद्या' (९-२-१०), 'तद् दुष्टज्ञानम्' (९-२-११) इति सूत्रद्वयेन कृतम्। तथाच दोषनिरूपणं कृत्वा तद्दोषरहितं ज्ञानं विद्या इति निरूपितं भवति। अविद्या नाम 'तदभाववति तत्प्रकारकं ज्ञानम् , विद्या नाम 'तदभाववति तत्प्रकारकज्ञानभिन्नज्ञानम्' इति सूत्रार्थतः ज्ञायते। सापि विद्या (i) प्रत्यक्ष- (ii) लैङ्गिक- (iii) स्मृति- (iv)आर्ष- भेदेन चतुर्विधा इति प्रशस्तपादभाष्ये निरूपितम्।

वैशेषिकसूत्रोपस्कारे प्रमायाः लक्षणचतुष्टयं उपदिष्टम् –

(i) 'अदुष्टं अदुष्टेन्द्रियजन्यं' (ज्ञानं प्रमा) इति,

(ii) 'यत्र यदस्ति तत्र तदनुभवः' (प्रमा) इति,

(iii) 'समानाधिकरणप्रकारानुभवः' (प्रमा) इति,

(iv) 'विशेष्यावृत्ति-अप्रकारकानुभवो' (प्रमा) इति।

तत्र 'दोषरहितं दोषरहितेन्द्रियजन्यं ज्ञानं प्रमा' इति प्रथमस्य, 'तद्वति तत्प्रकारकानुभवः प्रमा' इति द्वितीयस्य, 'विशेष्यतासमानाधिकरणो यः प्रकारः, तन्निष्ठप्रकारतानिरूपकानुभवः प्रमा' इति तृतीयस्य, 'तदभाववति तत्प्रकारकानुभव-भिन्नानुभवः प्रमा' इति चतुर्थस्य लक्षणस्यार्थः भवितुं अर्हति।

**न्यायसूत्रे प्रमालक्षणम्**

'बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्' (१-१-१५) इति प्रमालक्षणबोधक-न्यायसूत्रम्। तत्रैव न्यायसूत्रभाष्ये 'उपलब्धिसाधनानि प्रमाणानि' इति, 'यदर्थविज्ञानं सा प्रमितिः' इति च विवृतम्। 'यत् उपलब्धिनिमित्तं तत् प्रमाणम्' इति वदता वार्तिककारेणापि 'उपलब्धिः प्रमा' इति सूचितम्। तथा च उपलब्धिरथवा अर्थविज्ञानं प्रमेति सिद्धम् न्यायसूत्रे।

**अन्यतर्कग्रन्थेषु प्रमालक्षणम्**

क्रमशः इतरेषु तर्कग्रन्थेषु निरूपितानि प्रमालक्षणानि प्रदर्शयामि।

* तत्त्वचिन्तामणौ – 'यत्र यदस्ति तत्र तस्यानुभवः', 'तद्वति तत्प्रकारकानुभवो वा प्रमा' इति,
* तर्कसङ्ग्रहे – 'तद्वति तत्प्रकारकोऽनुभवो यथार्थः, सैव प्रमा' इति,
* कारिकावल्यां – 'भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा'(१३४) इति,
* मुक्तावल्यां – 'तद्वद्विशेष्यकं तत्प्रकारकं ज्ञानं प्रमा' इति,
* दिनकर्यां – 'तद्विशेष्यत्वावच्छिन्न- तत्प्रकारकत्ववज्ज्ञानं' प्रमेति,
* पदार्थरत्नमालायां – 'तद्वति तत्प्रकारकः भ्रमभिन्नो वा अनुभवः प्रमा' इति,
* जयनारायणीयवृत्तौ– 'समानाधिकरणप्रकारानुभवः', 'तद्वति तत्प्रकारकज्ञानं', 'दोषानधीनं ज्ञानम्', 'भ्रमसामान्यभिन्नं वा ज्ञानं' प्रमेति,
* सप्तपदार्थ्यां – 'तत्त्वानुभवः प्रमा' इति,

* मानमनोहरे – 'सम्यगनुभवः यथार्थज्ञानं वा प्रमा' इति,
* तर्कभाषा- न्यायसिद्धान्तमञ्जरी-तर्ककौमुदी-न्यायचन्द्रिका-पदार्थ-दीपिकादिषु–'यथार्थानुभवः प्रमा' इति,
* तार्किकरक्षायां – 'अकार्यत्वेऽपि सम्यगनुभूतित्वात् ईश्वरज्ञानं प्रमा' इति,
* न्यायचन्द्रिकायां – 'विशेष्यावृत्यप्रकारकज्ञानत्वं यथार्थत्वम्, तादृशयथार्थानु-भवः प्रमा' इति,
* न्यायलीलावत्यां –'बुद्धिर्द्विविधा – विद्या च अविद्या चेति। तत्र अविद्या संशय- विपर्यय- स्वप्न- अनध्यवसायलक्षणा। तद्भिन्ना विद्येति सूचितम्। लीलावतीप्रकाशकारेणापि विशेष्यावृत्यप्रकारकं ज्ञानं विद्या। यद् यत्रास्ति तत्र तस्य ज्ञानं वा विद्या। तद्भिन्नं ज्ञानमविद्या' इति प्रदर्शितम्।

**अन्यदर्शनेषु प्रमालक्षणम्**

* वेदान्तपरिभाषायां– 'अनधिगत- अबाधितार्थविषयक- ज्ञानत्वम्' इति स्मृतिव्यावृत्तं प्रमात्वम्, स्मृतिसाधारणं तु 'अबाधितर्थविषयक- ज्ञानत्वम्' इति,
* अद्वैतसिद्धिव्याख्यायां लघुचन्द्रिकायां – 'अबाधितस्य वृत्तिविषयत्वोपहितं रूपं यस्य ज्ञानस्य विषयः तत्वं प्रमात्वम्' इति,
* बौद्धाः – 'अविसंवादि ज्ञानं प्रमा' इति,
* सांख्याः – 'अनधिगततत्त्वबोधः पौरुषेयो व्यवहारहेतुः प्रमा' इति,
* भाट्टराः – 'अव्यभिचार्यनुभवः प्रमा' इति,
* मध्वमतानुयायिनः – 'यथार्थज्ञानं प्रमा' इति,
* विशिष्टाद्वैतिनः– 'यथावस्थितव्यवहारानुगुणज्ञानं प्रमा' इति प्रदर्शितम्।

**रामरुद्र्यनुसारेण प्रमालक्षणम्**

**"अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते।।**
**तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता।''१२६**

– इति कारिकावलीस्थकारिकया भ्रमप्रमानिरूपणं सकृदेव कृतम्। तत्र कारिकायां यद्यपि प्रमालक्षणार्थं पृथग्व्यापारः न कृतः, तथापि 'तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता' इति भागेन भ्रमस्य 'तदभाववति तत्प्रकारकानुभवत्व'-

रूपं लक्षणं सूचितं भवति। तेन अर्थतः 'तद्वति तत्प्रकारकानुभवत्वं' प्रमायाः लक्षणम् इति ज्ञातं भवति। चिन्तामणावपि 'यत्र यदस्ति तत्र तस्यानुभवः, तद्वति तत्प्रकारकानुभवो वा प्रमेति' दृश्यते। प्रमालक्षणनिरूपणं च विशिष्य रामरुद्र्यां कृतम्।

तत्र प्रमालक्षणं च – "तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववदनुभवत्वम्" इति। तच्छब्देन प्रकारत्वेन अभिमतः ग्राह्यः, तथाच "तन्निष्ठधेयतानिरूपिताधिकरणतावन्निष्ठविशेष्यतानिरूपकत्वावच्छिन्नं यत् तन्निष्ठप्रकारतानिरूपकत्वं तद्विशिष्टत्वे सति अनुभवत्वम्" इत्यर्थः आयाति, 'तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशाल्यनुभवत्वम्' इति पर्यवस्यति। 'इदं रजतम्' इत्यादिप्रमायां समन्वयः भवति, रजतत्ववद्रजतनिष्ठविशेष्यतानिरूपकत्वे सति रजतत्वनिष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वस्य तत्र सत्वात्। शुक्तौ 'इदं रजतम्' इत्यादिभ्रमे च नातिव्याप्तिः, प्रकारीभूतरजतत्वादेः वस्तुगत्या पुरोवर्तिनि विशेष्ये शुक्त्यादौ अभावात्। लक्षणे 'तद्वद्विशेष्यकत्वं' इति भागे प्रकारस्य वास्तविकमेव वैशिष्ट्यं विशेष्यांशे निविष्टमिति नापत्तिः।

अत्राशङ्का –अस्य लक्षणस्य 'पृथिवीजलोभयं गन्धवत्' इति भ्रमे अतिव्याप्तिः। अत्र ज्ञाने पृथिवीजलोभयनिष्ठा विशेष्यता गन्धनिष्ठा च प्रकारता, अतः एतज्ज्ञानीया विशेष्यता पृथिव्यां जले च वर्तते इति स्वीकार्यम् , तथाच प्रकारीभूतः यो गन्धः तद्वत्पृथिवीविशेष्यकत्वे सति गन्धप्रकारकत्वे सति अनुभवत्वस्य सत्वात् अतिव्याप्तिः। एतद्दोषवारणार्थं एतल्लक्षणीयविशेष्यतायां व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं निवेश्यते तदा– 'तद्वन्निष्ठव्यासज्यवृत्तिधर्मानवच्छिन्नविशेष्यतानिरूपित तन्निष्ठप्रकारताशाल्यनुभवत्वम्' इति पर्यवस्यति। 'पृथिवीजलोभयं गन्धवत्' इत्यत्र तु विशेष्यता 'पृथिवीजलोभयत्व'रूप- व्यासज्यवृत्तिधर्मावच्छिन्ना अतः न तत्रातिव्याप्तिरिति चेत्, तथा सति व्यासज्यवृत्तिधर्मावच्छिन्नविशेष्यताकप्रमायां 'पृथिवीजलोभयं द्रव्यम्' इत्यादौ अव्याप्तिः। अतः लक्षणीयविशेष्यतायां व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं निवेशयितुं नैव शक्यते, तेन 'पृथिवीजलोभयं गन्धवत्' इत्यादौ अतिव्याप्तिः तदवस्था।

तर्हि 'पृथिवीजलोभयं गन्धवत्' इत्यादौ व्यासज्यवृत्तिधर्मावच्छिन्नविशेष्यताकभ्रमे अतिव्याप्तिवारणाय लक्षणीयविशेष्यतायां 'तदधिकरणतावच्छेदक धर्मावच्छिन्नत्वं' निवेश्यते। अत्रापि तच्छब्देन प्रकारत्वेनाभिमतो ग्राह्यः, तथाच विशेष्यतायां 'तदधिकरणतावच्छेदकधर्मावच्छिन्नत्वम्' इत्यस्य प्रकारनिष्ठाधेयतानिरूपित अधिकरणतावच्छेदको यो धर्मः तद्धर्मावच्छिन्नत्वं विशेष्यतायामित्यर्थः। पर्यवसितार्थस्तु 'तद्वन्निष्ठा या

तदधिकरणतावच्छेदकधर्मावच्छिन्ना विशेष्यता, तन्निरूपिततन्निष्ठप्रकारता-शाल्यनुभवत्वम्' इति। इदानीं नोक्तस्थले अतिव्याप्तिः। यत्र ज्ञाने प्रकाराधिकरणता-वच्छेदकमेव विशेष्यतावच्छेदकं तत्रैव लक्षणसमन्वयो भवति, 'पृथिवीजलोभयं गन्धवत्' इत्यत्र तु प्रकारत्वेनाभिमतो धर्मः 'गन्धः', गन्धाधिकरणतावच्छेदकत्वं च विशेष्यतावच्छेदकीभूतपृथिवीजलोभयत्वे नास्तीति नापत्तिरित्यर्थः।

अत्राशङ्का-पृथिवीजलोभयत्वस्यापि गन्धाधिकरणतावच्छेदकत्वमस्त्येव इति। यतः गन्धाधिकरणे पृथिव्यां पृथिवीजलोभयत्वस्य सत्वात्, तथाच निरुक्तस्थले अतिव्याप्त्यापत्तिः तदवस्था।

अत्र समाधानं- लक्षणीयविशेष्यतायां तदधिकरणतावच्छेदकधर्मावच्छिन्नत्व-निवेशानन्तरमपि 'रङ्गं रजतत्ववत्' इति भ्रमे अतिव्याप्तिः। अत्र रजतत्वं प्रकारः, तदधिकरणे रजते विशेष्यतावच्छेदकीभूतरङ्गत्वस्य समवायसंबन्धेन अविद्यमानत्वेपि कालिकसंबन्धेन विद्यमानत्वात्, रजतत्वाधिकरणतानिरूपितकालिकसंबन्धावच्छिन्न-अवच्छेदकताकरङ्गत्वनिष्ठावच्छेदकतानिरूपकत्वस्य तज्ज्ञानीयविशेष्यतायां सत्वादतिव्याप्तिः। अतः अवश्यं तदधिकरणतावच्छेदकतावच्छेदकसंबन्धस्य विशेष्यतावच्छेदकतावच्छेदकसंबन्धस्य च ऐक्यं विवक्षणीयम्। निवेशप्रकारस्तु 'तद्वन्निष्ठा या तदधिकरणतावच्छेदकताघटकसंबन्धावच्छिन्नतदधिकरणतावच्छेदकता-निरूपिका विशेष्यता, तन्निरूपिता या तन्निष्ठा प्रकारता, तन्निरूपकत्वे सत्यनुभवत्वम्' इति। तथा सति 'रङ्गं रजतत्ववत्' इत्यत्र नातिव्याप्तिः। अत्र रङ्गत्वं समवायसंबन्धेन विशेष्यतावच्छेदकं भवति, अतः विशेष्यतावच्छेदकताघटकः संबन्धः समवायः, रजतत्वाधिकरणे रजते रङ्गत्वं कालिकसंबन्धेन वर्तते इति रजतत्वाधिकरणता-वच्छेदकताघटकसंबन्धस्तु कालः इति उभयोः भेदात् नातिव्याप्तिः।

एवमेव 'पृथिवीजलोभयं गन्धवत्' इत्यत्रापि नातिव्याप्तिः। पृथिवीजलोभयत्वस्य विशेष्यतावच्छेदकता पर्याप्तिसंबन्धेन विवक्षिता, तस्यैव पृथिवीजलोभयत्वस्य गन्धाधिकरणतानिरूपिता अवच्छेदकता समवायसंबन्धेन वर्तते इति उभयोः भेदात् नातिव्याप्तिः। एतावता निष्कृष्टलक्षणंतु 'तद्वन्निष्ठा या तदधिकरणतावच्छेदकता-घटकसंबन्धावच्छिन्नतदधिकरणतावच्छेदकतानिरूपकविशेष्यता, तन्निरूपिता या तन्निष्ठा प्रकारता, तन्निरूपकत्वे सत्यनुभवत्वम्' इति।

अत्राशंका- 'पृथिवीजलोभयं गन्धवत्' इत्यादौ अतिव्याप्तिवारणाय लक्षणीय-विशेष्यतायां 'तदधिकरणतावच्छेदकधर्मावच्छिन्नत्वं' निविश्य यः परिष्कारः स्वीकृतः, सः न साधुः। निरवच्छिन्नविशेष्यताकायां घट इत्याद्याकारिकायां प्रमायाम्

अव्याप्त्यापत्तेः। निरुक्तप्रमायां घटत्वनिष्ठप्रकारतानिरूपिता या घटनिष्ठा विशेष्यता, सा निरवच्छिन्ना। किन्तु लक्षणीयविशेष्यतायां 'तदधिकरणतावच्छेदकधर्मावच्छिन्नत्वं' निविष्टमिति अव्याप्तिः इति प्रथमो दोषः। वस्तुतस्तु लक्षणीयविशेष्यतायां 'तदधिकरणतावच्छेदकधर्मावच्छिन्नत्व'निवेशनमेव न संभवति, यतो हि 'तदधिकरणतावच्छेदकधर्मावच्छिन्नत्वं' नाम–

(i) तदधिकरणतावच्छेदकधर्मव्यापकत्वं वा,

(ii) तदधिकरणतावच्छेदकधर्मसमनियतत्वं वा,

(iii) तदधिकरणतावच्छेदकयत्किंचिद्धर्मसमनियतत्वं वा,

इति आदौ निर्धारणीयम्। यदि लक्षणीयविशेष्यतायां निविष्टं 'तदधिकरणतावच्छेदकधर्मावच्छिन्नत्वं' 'तदधिकरणतावच्छेदकधर्मव्यापकत्वं' स्यात् तदा 'घटपटोभयं घटः' इति भ्रमे अतिव्याप्तिः दुर्वारा स्यात्। घटत्वाधिकरणतावच्छेदकीभूतः धर्मः तद्घटव्यक्तिगततद्व्यक्तित्वमपि भवति, तादृशतद्धर्मव्यापकत्वं च घटपटोभयत्वावच्छिन्नविशेष्यतायां वर्तत इति अतिव्याप्तिः।

अत्राशंका - कथं वा घटत्वाधिकरणतावच्छेदकत्वं तद्घटव्यक्तिगततद्व्यक्तित्वस्य इति। यतोहि घटत्वाधिकरणत्वं तद्व्यक्तित्वानधिकरणे अन्यघटव्यक्तावपि वर्तते इति चेत्। प्रकृतलक्षणे तदधिकरणतानिरूपितमवच्छेदकत्वमनतिरिक्तवृत्तित्वस्वरूपसंबन्धोभयसाधारणं स्वीकार्यम्। तथाच 'अस्यां घटव्यक्तौ घटः' इति प्रतीत्यनुरोधेन तद्घटव्यक्तिगततद्व्यक्तित्वस्य घटत्वाधिकरणतानिरूपितस्वरूपसंबन्धरूपावच्छेदकत्वं स्वीक्रियते, तथाच घटपटोभयत्वावच्छिन्ना विशेष्यता निखिलघटपटनिष्ठा, सा च तद्घटव्यक्तिमात्रगततद्व्यक्तित्वव्यापिका भवतीति अतिव्याप्तिः।

तर्हि तद्दोषवारणार्थं लक्षणीयविशेष्यतायां निविष्टं 'तदधिकरणतावच्छेदकधर्मावच्छिन्नत्वं' 'तदधिकरणतावच्छेदकधर्मसमनियतत्वम्' इति स्वीक्रियते, समनियतत्वं च तद्व्यापकत्वे सति तद्व्याप्यत्वम्। तथा च निरुक्तस्थले घटपटोभयत्वावच्छिन्नविशेष्यतायां तद्घटव्यक्तिगततद्व्यक्तित्वव्यापकत्वसत्वेपि, तद्व्यक्तित्वव्याप्यत्वं नास्ति। तद्व्यक्तित्वाभाववति पटे अपि तादृशविशेष्यतायाः सत्वात् इति चेत्, तथापि तल्लक्षणस्य 'घटो द्रव्यम्' इति प्रमायां अव्याप्तिः। अत्र द्रव्यत्वं प्रकारः, तदधिकरणतावच्छेदको धर्मः गुणवत्वं, तादृशधर्मव्याप्यत्वस्य घटत्वावच्छिन्नविशेष्यतायां सत्वेपि, तादृशधर्मव्यापकत्वं घटत्वावच्छिन्नविशेष्यतायां नास्ति। गुणवत्वाधिकरणे पटे घटत्वावच्छिन्नविशेष्यतायाः अभावात्।

तर्हि निरुक्तस्थले दोषवारणार्थं लक्षणीयविशेष्यतायां 'तदधिकरणतावच्छेदक-यत्किंचिद्धर्मसमनियतत्वं' निवेश्यते। तथाच 'घटे द्रव्यं' इति प्रतीत्या द्रव्यत्वाधिकरणता-वच्छेदकीभूतः यः यत्किंचिद्धर्मः घटत्वमिति, तादृशघटत्वसमनियतत्वस्य घटत्वा-वच्छिन्नविशेष्यतायां सत्वात् नाव्याप्तिः इति चेत् , तथापि 'घटपटोभयं घटः' इत्यत्रातिव्याप्तिस्तु दुर्वारैव। तत्रापि 'घटपटान्यतरस्मिन् घटः' इति प्रतीत्या घटपटान्य-तरत्वस्य घटत्वाधिकरणतावच्छेदकत्वमादाय दोषः स्यात्। तथाहि घटत्वाधिकरण-तावच्छेदकीभूतः यः यत्किंचिद्धर्मः पूर्वोक्तप्रनाड्या 'घटपटान्यतरत्वं', तादृशतद्धर्म-समनियतत्त्वं घटपटोभयत्वावच्छिन्नविशेष्यतायां वर्तत इति अतिव्याप्तिः तदवस्थैव। तथाच लक्षणीयविशेष्यतायां त्रिविधस्यापि 'तदधिकरणतावच्छेदकधर्मावच्छिन्नत्वस्य' निवेशः न संभवति। कथंचित् अदुष्टस्यैव तस्य संपादितत्वेपि, वस्तुगत्या तस्य निवेशस्तु न संभवति, तन्निवेशे निरवच्छिन्नविशेष्यताकायां 'घटः' इत्याद्याकारिकायां प्रमायां अव्याप्तिः दुर्वारैव। अन्ततो गत्वा प्रमायाः निर्दुष्टं लक्षणं दुर्लभमेव इति चेत्। न।

**सिद्धान्तस्तु**- 'पृथिवीजलोभयं गन्धवत्' इत्यादिभ्रमे अतिव्याप्तिवारणाय लक्षणीयविशेष्यतायां 'तदधिकरणतानवच्छेदकधर्मानवच्छिन्नत्वं' निवेश्यते। गन्धाधिकरणतावच्छेदको धर्मः पृथिवीत्वादि, तदनवच्छेदको धर्मः 'पृथिवीजलोभयत्वं' तद्धर्मावच्छिन्नत्वमेव गन्धवन्निष्ठविशेष्यतायां वर्तते, नतु तादृशतद्धर्मानवच्छिन्नत्वम् इति नातिव्याप्तिः। एवमेव निरवच्छिन्नविशेष्यताकप्रमायां नाव्याप्तिः। सामान्याभाववति विशेषाभावः अवश्यं वर्तते। अवच्छिन्नत्वसामान्याभाववति तादृशविशेष्यतायां तदधिकरणतानवच्छेदकधर्मावच्छिन्नत्वरूपस्य विशेषस्यापि अभावः सुलभः इति तादृशस्थले नाव्याप्तिः।

अत्राशंका- एतावता लक्षणस्वरूपं तु 'तदधिकरणतानवच्छेदकधर्मानवच्छिन्न विशेष्यतानिरूपिततन्निष्ठप्रकारताशाल्यनुभवत्वम्' इति। अस्य तु लक्षणस्य निरवच्छिन्नविशेष्यताकभ्रमे अतिव्याप्तिरिति। तथाच निरवच्छिन्नरजतनिष्ठविशेष्यता-निरूपितरङ्गत्वनिष्ठप्रकारताशालिभ्रमः 'इदं रङ्गम्' इत्याकारकः। तत्र रङ्गत्वा-धिकरणतानवच्छेदकधर्मानवच्छिन्ना या विशेष्यता इदम्पदवाच्यरजतनिष्ठा विशेष्यता, तन्निरूपकत्वे सति रङ्गत्वनिष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वस्य सत्वात् अतिव्याप्तिः इति चेत्। नातिव्याप्तिः।

लक्षणीयविशेष्यतायां तद्वन्निष्ठत्वस्यापि निवेशनीयत्वात्। निष्कृष्टलक्षणस्वरूपं तु- 'तदधिकरणतानवच्छेदकधर्मानवच्छिन्ना या तद्वन्निष्ठा विशेष्यता, तन्निरूपित-

तन्निष्ठप्रकारताशाल्यनुभवत्वम्' इति। निरुक्तभ्रमीया या रजतनिष्ठा विशेष्यता, सा न वस्तुगत्या रङ्गत्ववन्निष्ठा, अतः नातिव्याप्तिरित्यर्थः। तथाच तद्वन्निष्ठविशेष्यतायां 'तदधिकरणतानवच्छेदकधर्मानवच्छिन्नत्व'- निवेशनात् 'पृथिवीजलोभयं गन्धवत्', 'घटपटोभयं घटः' इत्यादौ अतिव्याप्तिर्वार्यते, निरवच्छिन्नविशेष्यताकप्रमायाश्च संग्रहो भवतीति सर्वं सुस्थम्।

✦✦✦

# संख्यापदार्थविमर्शः

**एन्. के. जगन्नाथः**
न्यायाध्यापकः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

एकः, द्वौ, त्रयः इत्यादयो व्यवहाराः लोके यदाश्रयेण प्रवर्तन्ते, सा संख्या। अत्रेयं शङ्का जायते यत् संख्यापदार्थः पदार्थस्य कतमे वर्गे सन्निवेशयितुं शक्य इति। अस्मिन् विषये प्राचीनन्यायदर्शस्थसंख्याप्रतिपादकानां ग्रन्थानां पर्यालोचनेन इदं ज्ञायते संख्या सर्वेषां द्रव्याणां सामान्यगुण इति, किन्तु कतिपयैर्नव्यनैयायिकैः वैशेषिकदर्शनविद्वद्भिश्च संख्यायाः गुणत्वमस्वीकृत्य पदार्थान्तरत्वमङ्गीकृतम्। प्राचीननैयायिकानामयमभिप्रायो यत् संख्यायाः द्रव्याणां सामान्यगुणत्वमेव समुचितम्। यतो हि तस्याः पदार्थान्तरत्वाभ्युपगमे पदार्थानां सप्तधा विभागो भज्येत। यतो हि एकत्वादिपरार्धपर्यन्ता अनन्ताः संख्या यदि पदार्थान्तररूपा स्वीक्रियन्ते, तदा केवलं संख्यापदार्थस्यैव आनन्त्यं दुनिर्वारम्। अतः संख्यायाः क्लृप्तपदार्थेष्वेव अन्तर्भावौचित्येन गुणेष्वेव सन्निवेशो न्याय्यः। न च संख्यायाः गुणेष्वेव कुतः सन्निवेशः, द्रव्यकर्मादिषु तत्समावेशः कुतो न स्यादिति वाच्यम्। तस्याः द्रव्यत्वे घटादौ अन्त्यावयविनि गगनादौ नित्यद्रव्ये च अवृत्तित्वप्रसङ्गात्। एवं कर्मण्यपि तदन्तर्भावो नोचितः, विभुद्रव्येषु तस्य असत्वप्रसङ्गात्। सामान्येऽपि नान्तर्भावः एकत्वसंख्यायाः एकव्यक्ति-मात्रवृत्तित्वात्। द्वित्वादीनामपि तदसंभवः, द्वित्वस्य च अपेक्षाबुद्धिजन्यत्वात्, सामान्यस्य च नित्यत्वात्। समवायेऽपि नान्तर्भावः विशिष्टबुद्धिविशेषनियामकसंसर्गत्वाभावाद-नित्यत्वाच्च। भावत्वेन प्रतीयमानत्वान्नाभावत्वम्। अतः परिशेषादस्याः गुणत्वमेव युक्तम्। दीधितिकाराः रघुनाथशिरोमणयः, एवं अन्ये नवीननैयायिकाः केचन संख्यायाः गुणत्वं नाङ्गीकुर्वन्ति। तत्र का युक्तिरिति चेत् – संख्यायाः गुणत्वे निर्गुणत्वस्य गुणलक्षणत्वानुपपत्तिः।

गुणे संख्यात्मकगुणस्य सत्वेन निर्गुणत्वस्य तत्र दुर्घटतया गुणे निर्गुणत्वलक्षणस्य असम्भवापत्तेः। गुणे संख्यात्मकः गुणः नास्ति इति वक्तुं न शक्यते, 'सप्तरूपाणि', 'षड्रसाः', 'द्वौ गन्धौ' इत्यादि प्रत्ययानुरोधेन गुणेऽपि संख्यायाः सद्भावात्। यत्र

यत्प्रतीतिर्न बाध्यते, तत्र तत्प्रतीतेर्भ्रमत्वे मानाभावात्।

न च द्रव्यगतसंख्यैव स्वसमवायिसमवायसंबन्धेन द्रव्यगतगुणे प्रतीयत इति युक्तम्, द्रव्येषु एकत्वादिप्रतीतितः रूपादिषु एकत्वादिप्रतीतेर्वैलक्षण्यस्य अप्रामाणिकत्वात् द्रव्ये एकत्वादिप्रतीतिः समवायेन, गुणे एकत्वादिप्रतीतिश्च स्वसमवायिसमवायेन भवतीति भेदस्य वक्तुमशक्यत्वात्। एवं नव्यनैयायिकैरुत्थापितानां आक्षेपाणां समाधानं प्राचीनैः एवं उच्यते यत् संख्यापदार्थः द्विविधः-गुणरूपः, अगुणरूपश्चेति। तत्र गुणरूपा संख्या द्रव्यमात्रेऽवतिष्ठते, अगुणरूपा च संख्या बुद्धिविशेषविषयत्वरूपा, सा च गुणादौ तिष्ठति। गुणलक्षणे च निरुक्ते निर्गुणत्वप्रतियोगिता गुणे समवायेन विवक्षिता। गुणानां च समवायसंबन्धेन गुणशून्यतया न तत्र निर्गुणत्वघटितस्य गुणलक्षणस्य अव्याप्तिः। तत्र संख्याव्यवहारश्च बुद्धिविशेषविषयत्वात्मकगुणानात्मक-संख्यया उपपद्यते। तथा च न दोष इति।

नव्यनैयायिकैरुक्तमतमालोचयद्भिः इदमुच्यते यत् द्रव्ये गुणादौ च संख्याप्रत्यय-व्यवहारयोः समानाकारतया द्रव्य गुणादौ च तयोर्विभिन्नसंख्याविषयत्वोपगमो नोचितः। अतः गुणाभिन्नत्वमेव तस्योचितम्। गुणाभिन्नतयैव द्रव्ये गुणादौ च संख्यायाः प्रत्ययव्यवहाराः संपद्यन्ते इति। श्रीविश्वनाथभट्टाचार्यैः कारिकावल्यां सामान्यगुणेषु संख्यायाः प्रथममुल्लेखः अकारि।

यथा–

> **संख्यादिपरत्वान्तो द्रवः सांसिद्धिकस्तथा।**
> **गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्त्तिताः।। इति।**
>
> (कारिकावली, श्लो. सं. ९१-९२)

अनया कारिकया यद्यपि सामान्यगुणत्वरूपं संख्यायाः परिमाणादिगुणान्तरसाधर्म्यं उक्तं, तथापि तत्साधर्म्यद्वारा संख्यायाः लक्षणमपि सूचितम्। तच्च सामान्यगुणत्वव्याप्य-द्रव्यत्वव्यापकतावच्छेदकजातिव्यापकगुणत्वसाक्षाद्व्याप्यजातिमत्वम्। तथा हि-सामान्यगुणत्वव्याप्यं संख्यात्वम्, तद्व्याप्यमेकत्वादिकं तच्च द्रव्यत्वव्यापकता-वच्छेदकम्, द्रव्यमात्रे एकत्वादिसंख्यायाः विद्यमानत्वात्। तद्व्यापिका गुणत्वसाक्षाद्-व्याप्या जातिः संख्यात्वम्, तस्य सर्वसंख्यासु विद्यमानत्वात् लक्षणसमन्वयः। न च पृथक्त्वस्यापि तादृशजातितया तत्रातिव्याप्तिरिति शङ्कनीयं, पृथक्त्वान्यत्वस्य लक्षणे निवेशात्।

श्रीमदुदयनाचार्येण संख्यालक्षणं प्रकारान्तरेण निर्दिष्टम्। यथा 'पृथक्त्वासमवेत-सर्वान्योन्याभावसमानाधिकरणैकद्रव्यसमवेतसमवेतवती संख्या"। तथा हि-पृथक्त्वा-

समवेतं सर्वान्योन्याभावसमानाधिकरणे समवेतम् एकद्रव्ये च समवेतं यत् तद्वती संख्या। महर्षिकणादेन वैशेषिकदर्शने नैकेषु सूत्रेषु संख्यायाः साधर्म्यं अभिहितं, येन संख्यायाः स्वरूपं विस्पष्टतां याति, किन्तु सूत्रेषु तेषु संख्याशब्दमप्रयुज्यैकत्वशब्दस्यैव प्रयोगः दृश्यते, येन कैश्चिद् विद्वद्भिः संख्यायाः एकत्वात्मना तावदेकविधत्व-भेदमुपगम्य द्वित्वत्रित्वादीनामेकत्वान्यसंख्यात्वं निराकृतम्। तन्मते द्वाभ्यां एकत्वाभ्यां द्वित्वस्य, त्रिभिश्चैकत्वैस्त्रित्वस्य प्रतीतिव्यवहारौ समर्थ्यते। "एकादिव्यवहारहेतुः संख्या" (न्यायकन्दली, संख्याप्रकरणम्) इतीदं लक्षणं व्याचक्षाणेन श्रीधराचार्येण इत्थमुक्तं-"व्यवहृतिर्व्यवहारो ज्ञेयज्ञानं व्यवह्रियते अनेनेति व्युत्पत्या व्यवहारशब्दः, तथा च एकादिव्यवहारः 'एकम्' 'द्वे' इत्यादिप्रत्ययः विशेषणकृतः प्रत्ययत्वात् दण्डीति प्रत्ययवत्। एवं शब्दमपि पक्षीकृत्य विशिष्टशब्दत्वादिति हेतुः अवगन्तव्यः।" एतद् व्याख्यानुसारेण तावदेकादिव्यवहारो यद्येकादिप्रत्ययः, तदा तत्पक्षकमनुमानम् एकत्वादिसद्भावे प्रमाणम्। विनिगमाविरहेणोभयोरपि पक्षयारेभ्यपुगतिर्युक्ता।

शिवादित्येन संख्यायाः लक्षणद्वयं प्रतिपादितम् (सप्तपदार्थी,संख्यालक्षणम्)। तथा हि- "संख्यात्वसामान्यवती संख्या", "गणनासाधारणकारणं संख्या" इति। अनयोः प्रथमं लक्षणं संख्यात्वजातिमवलम्बते। तत्सिद्धौ नान्यत् किमपि लक्षणे विमर्शयोग्यम्। द्वितीयलक्षणे किञ्चिद्विमर्शनीयमस्ति। तथा हि- तत्र असाधारणपदानिवेशे कार्यमात्रस्य कारणतया गणनात्मकस्यापि कार्यस्य कारणेश्वरज्ञानादावतिव्याप्तिः। असाधारणपदयोगे च गणनात्वावच्छिन्नकार्यतानिरूपितकारणतायाः लाभेन न तद्दोषावसरः, कार्यत्वरूपसामान्यधर्मत्वस्येव, ईश्वरज्ञानादीनां जन्यतावच्छेदकत्वाभ्युप-गमात्।

**संख्यायाः भेदः -**

प्रायः सर्वेषु दार्शनिकसम्प्रदायेषु एकत्वादिरूपायाः संख्यायाः अनेके प्रकारा अभ्युपगताः सन्ति, किन्तु वैशेषिकदर्शने संख्यायाः गुणत्वस्य स्वीकारेण गुणादेः संख्याश्रयत्वस्य असम्भवतया गुणादौ व्यवह्रियमाणस्यैकत्वादेः संख्याभिन्नत्व-मेवाभ्युपेयम्। अतः सर्वेषां एकत्वादीनां गुणात्मकसंख्यारूपत्वं विप्रतिपन्नम्। एकत्वा-देर्गुणात्मकसंख्यामात्ररूपत्वे गुणात्मकत्वेपि तस्य गुणादिवृत्तित्वसमर्थनेऽपि संख्या-प्रभेदविषये तत्र तत्र मतभेदः दृश्यते।

प्रशस्तपादाचार्यैः संख्यायाः मुख्यतया प्रकारद्वयं निर्दिष्टम्,एकद्रव्यवृत्तिसंख्या, अनेकद्रव्यवृत्तिसंख्या च (प्रशस्तपादभाष्यम्, संख्याप्रकरणम्)। तत्र एकद्रव्यवृत्तिसंख्या

केवलमेकत्वसंख्या, सा च आश्रयभेदेन भिन्ना, एकत्वत्वजात्यानुगमयितुमर्हा च। अनेकवृत्तिसंख्या द्वित्वमारभ्य परार्धपर्यन्ता।

वैशेषिकसूत्रोपस्कारे शङ्करमिश्रेण कन्दलीग्रन्थे श्रीधरेण च बहुत्वसंख्या त्रित्वादितो भिन्ना स्वीकृता। अयमाशयः – यदा असन्निहितेषु अनेकद्रव्येषु त्रित्वादिकं त्रित्वत्वादिरूपेण न गृह्यते, तदा बहुत्वस्य बहुत्वत्वेन ग्रहणं भवति। इदं ग्रहणं बहुत्वत्वेन यदि त्रित्वादिविषयकमेव, तदा बहुत्वसंख्याया न स्वतन्त्रसंख्यात्वम्। यदि च बहुत्वत्वेन त्रित्वादिभिन्नस्य ग्रहणं, तदा बहुत्वं स्वतन्त्रा संख्या स्यात्। श्रीमदुदयनाचार्याः बहुत्वत्वेन त्रित्वादेरेव ग्रहणमङ्गीकुर्वन्ति। न्यायशास्त्रस्य नव्यग्रन्थेषु व्यासज्यवृत्यव्यासज्यवृत्तिभेदादेव संख्यायाः द्वैविध्यमुक्तम्। तत्र व्यासज्यवृत्तित्वम् एकत्वतत्समनियतधर्मानवच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगित्वम्। तच्च द्वित्वादौ वर्तते एव। अव्यासज्यवृत्तित्वं तु एकत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगित्वम्। तच्चैकत्वसंख्यायां विद्यते। प्रायः सर्वैः नव्यनैयायिकैः एकत्वादिपरार्धपर्यन्ता एव संख्याः स्वीकृताः।

**एकत्वसंख्या** –एकत्वसंख्या द्विविधा नित्याऽनित्या चेति। नित्यद्रव्येषु विद्यमाना तावदेकत्वसंख्या नित्या। अनित्यद्रव्येषु विद्यमाना तु एकत्वसंख्या अनित्या। उभयविधाप्येकत्वसंख्या एकद्रव्यमात्रनिष्ठेति 'एकद्रव्या संख्या' इति शब्देनापि उच्यते। इयं हि सर्वासां संख्यानां उत्पादिका, यथा द्वाभ्यां कपालाभ्यां उत्पद्यमाने घटे एकत्वस्य उत्पत्तिः कपालगताभ्यां एकत्वाभ्यां जायते।

कैश्चित् एकत्वस्य रूपादिभिन्नत्वं नोपगम्यते। तन्मते तत् द्रव्यगतरूपादिरेव एकत्वत्वेन गृह्यते, परमिदं मतं वैशेषिकवदर्शनस्य मूलभूतसूत्रविरोधादेव वैशेषिकमतत्वेन स्वीकर्तुम् अशक्यम्। तथा हि सूत्रम्- ''रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरम् एकत्वम्'' (वैशेषिकसूत्रम् - ७/२/१) इति। अयं भावः–एकत्वप्रतीतेः रूपादिप्रतीतितः विलक्षणत्वेन अनुभवात्, एकत्वं रूपादितो भिन्नम्। किञ्च रूपादिशून्ये कालादावप्येकत्वस्य प्रतीयमानतया तस्य रूपादिव्यातिरिक्तत्वम् आवश्यकम्।

एकत्वं द्रव्य इव गुणकर्मादौ अपि भासते। परं तेषां निर्गुणत्वस्वीकारेण (वैशेषिकसूत्रम्- ७/२/४ निःसंख्यात्वात् कर्मगुणानां) तत्र एकत्वसंख्या गुणात्मिका न स्वीकर्तुं शक्यते। यतो हि नित्यैकत्वसंख्यायाः नित्यद्रव्यमात्रवृत्तितया रूपादौ तदभ्युपगमाऽसम्भवः। जन्यरूपादावपि अनित्यैकत्वसंख्या नाभ्युपगन्तुं शक्या। अवयवगतसंख्यारूपादेरसमवायिकारणादेव अवयविनि संख्यारूपादेरुत्पद्यमानतया

रूपादेरनवयवितया तत्र तदुत्पत्तेरसम्भवात्। अतः रूपादेरेकत्वप्रतीतेः भ्रमत्वमेव उचितम्।

द्रव्ये गुणादौ चैकत्वप्रतीतीनां समानाकारतया गुणादौ तत्प्रतीतेर्भ्रमत्वाभ्युपगमे द्रव्येऽपि तत्प्रतीतेर्भ्रमत्वस्वीकारसम्भवेन एकत्वस्य लोप एव स्यादिति तु नाशङ्कनीयम्, एकत्वस्य क्वाप्यसत्वे तत्प्रतीतेर्भ्रमत्वस्य अयुक्तत्वात्। एकत्र भ्रमस्य अन्यत्र प्रमायाः सत्वे एव सम्भवात्। अतः एवोक्तं महर्षिणा कणादेन-"एकत्वाभावात् भक्तिस्तु न विद्यते" (वैशेषिकसूत्रम्- ७/२/६) इति।

अयमाशयः- यदि द्रव्येऽपि भावात्मकमेकत्वं न भविष्यति, तदाऽद्रव्येषु तस्य भाक्तः प्रत्ययो न सेद्धुमर्हति, भाक्तप्रत्ययस्य मुख्यप्रत्ययपूर्वकत्वनियमात्। अत एकत्वसंख्यायां भावत्व-गुणत्व-द्रव्याश्रितत्वानामभ्युपगम एव न्याय्यः। प्रशस्त-पादाचार्यदिशा जलपरमाणुषु रूपादीनां नित्यत्वमिव, पृथिव्यादिचतुर्द्रव्यपरमाणुषु आकाशादिषु चतुर्षु विभुर्द्रव्येषु मनसि च नित्याया एकत्वसंख्याया नित्यत्वं भवति। अनित्येषु द्रव्येषु विद्यमाना तावदेकत्वसंख्या अनित्यैव। सा हि स्वाश्रयद्रव्यस्य अवयवगतैकत्वतो जायते, स्वाश्रयनाशान्नश्यति च।

**अनेकत्वसंख्या**- अनेकत्वसंख्या नाम एकत्वभिन्ना संख्या। सा च द्वित्वादिकमारभ्य परार्धपर्यन्ता। श्रीमदुदयनाचार्येण किरणावलीग्रन्थे द्वित्वस्य विश्लेषणं विस्तरेण कृतम्। द्वित्वस्येव त्रित्वादेर्विषये अनुगतिः कार्या। 'द्वित्वादिका' इति शब्दस्य 'द्वित्वमादिरस्या' इति विग्रहं वर्णयता किरणावलीकृता परार्धसंख्यानिरूपणसंदर्भे परार्धमन्तो यस्या इत्येवं परार्धशब्दस्य व्युत्पत्तिः प्रदर्शिता।

**अपेक्षाबुद्धिः** -अनेकेषु एकत्वप्रकारिका या बुद्धिः सैव अपेक्षा बुद्धिरित्युच्यते। एतदेवोक्तं विश्वनाथभट्टाचार्यैः (कारिकावली, श्लोक.सं. १०९)-अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते इति। एषा बुद्धिः द्रव्यगताभ्यां एकत्वाभ्यां द्रव्ययोर्द्वित्वोत्पादनार्थं अपेक्षणीयतया अपेक्षाबुद्धिरित्युच्यते। एषा बुद्धिर्द्वित्वादीनां निमित्तकारणं भवति। असमवायिकारणं च तेषां तत्समानाधिकरणं एकत्वमेव।

सर्वदर्शनसङ्ग्रहे अपेक्षाबुद्धिः प्रकारान्तरेण निरूपिता। यथा-"अपेक्षाबुद्धिर्नाम विनाशप्रतियोगिनी बुद्धिरिति बोद्धव्यम्" (सर्वदर्शनसंग्रहः, औलूक्यदर्शने निवृत्तिक्रम-निरूपणम्)। तस्यायमर्थः - विनाशको यो विनाशः, तस्य प्रतियोगिभूता या बुद्धिः सा अपेक्षाबुद्धिः। अपेक्षाबुद्धिनाशस्य द्वित्वादिनाशकतया अपेक्षाबुद्धेर्विनाशक-प्रतियोगित्वमुपपद्यते।

अपेक्षाबुद्धिर्मुख्यतया द्विविधा-नित्या अनित्या च। ईश्वरीयापेक्षाबुद्धिर्नित्या। सा हि परमाणुषु द्वित्वोत्पादिका। तदुत्पाद्यस्य द्वित्वस्य नाशश्च तत्कारणीभूतस्य क्षणात्मककालस्य नाशाज्जायते। तज्जनकापेक्षाबुद्धेः तदाश्रयपरमाणूनां च नित्यतया प्रकारान्तरेण तन्नाशाऽसम्भवात्। अस्मादृशानाम्, एवं योगिनां अपेक्षाबुद्धिरनित्या। सा हि एकत्वज्ञानरूपनिमित्तम्, अनेकद्रव्यसन्निधानं च अपेक्ष्य समुत्पद्यते, तन्नाशश्च द्वित्वप्रत्यक्षात् सञ्जायते।

द्विविधाप्यपेक्षाबुद्धिः स्वविषयभूतयोर्द्रव्ययोर्द्वित्वजन्मनि निमित्तभावं बिभर्ति। द्वित्वस्य लौकिकप्रत्यक्षानुरोधेन प्राचीननैयायिकैस्तस्याः क्षणत्रयावस्थायित्वं चतुर्थक्षणोत्पत्तिकध्वंसप्रतियोगित्वपर्यवसायि मन्यते। यत्र धारावाहिन्या अपेक्षाबुद्धेर्द्वित्व-संख्यायाः सन्तानो जायते, तत्रापेक्षाबुद्धेः त्रिक्षणावस्थायित्वोपगमः निरर्थकः। प्रथमद्वित्वोत्पादिकायाः प्रथमापेक्षाबुद्धेः तृतीयक्षणे नाशेऽपि तत्क्षणे, उत्पन्नायाः द्वितीयापेक्षाबुद्धेर्बलेन प्रथमोत्पन्नद्वित्वप्रत्यक्षस्य सम्भवात्।

**द्वित्वादिसंख्यानामुत्पत्तिः** - द्वित्वादीनां सर्वासां जन्यसंख्यानामुत्पत्तिः अपेक्षाबुद्धितो जायत इत्युक्तम्। अत्रायं प्रश्नः यत् एकविधयैव अपेक्षाबुद्ध्या द्वित्वत्रित्वादीनां नानाविधसंख्यानामुत्पत्तिः कथं भवति। इयमपि जिज्ञासा जायते यत् त्रित्वस्य उत्पत्तिरेकत्वत्रयमवगाहिन्या 'अयमेकः, अयमेकः, अयमेकः" इत्यपेक्षाबुद्ध्या जायते। अथवा द्वयोरेकत्वद्वयविषयिण्या अपेक्षाबुद्ध्या द्वित्वोत्पत्तेरनन्तरं द्वयोर्द्वित्वं, तृतीये च एकत्वमवगाहमनायाः 'इमौ द्वौ', 'अयमेक' इति बुद्ध्या जायते इति। त्रित्वोत्पत्तिसम्बद्धयोः पक्षयोरनयोः कैश्चित् प्रथमपक्षः स्वीक्रियते। अन्यैश्च द्वितीयं पक्षमुपगम्य पूर्वपूर्वसंख्याया अपि उत्तरोत्तरसंख्याकारणत्वं मन्यते, किन्तु द्वितीयपक्षे अपेक्षाबुद्धेराकारस्य भिन्नतया तस्यास्तस्याः अनुगतं लक्षणं दुर्वचम्।

प्रथमपक्षस्य समीचीनत्वोपगमे अपेक्षाबुद्धितो द्वित्वोत्पत्तेः प्रक्रियाशास्त्रेषु सप्तक्षणसाध्यता वर्णिता। तथाहि-प्रथमक्षणे उत्पत्स्यमानस्य द्वित्वस्य आश्रयी-भविष्यद्भ्यां समानजातीयाभ्यां असमानजातीयाभ्यां वा द्रव्याभ्यां सह चक्षुषः संयोगसन्निकर्षो जायते। तत्क्षणे एव च तद्गताभ्यां एकत्वाभ्यां एकत्वत्वेन च सह चक्षुः-संयुक्तसमवायचक्षुःसंयुक्तसमवेतसमवायरूपौ चक्षुःसन्निकर्षौ समुत्पद्येते। द्वितीयक्षणे द्वयोर्द्रव्ययोः तयोरेकत्वयोः एकत्वत्वस्य च प्रत्यक्षं जायते। तृतीयक्षणे 'अयमेकः, अयमेकः' इत्याकारिका समूहालम्बनरूपा अपेक्षाबुद्धिर्जायते।

चतुर्थक्षणे द्वित्वस्य उत्पत्तिः, द्वितीयक्षणे जातस्य ज्ञानस्य नाशश्च भवति। पञ्चमक्षणे द्वित्व-द्वित्वत्वयोर्निर्विकल्पं प्रत्यक्षं जायते, षष्ठक्षणे द्वित्वस्य सविकल्पकं

प्रत्यक्षं, तृतीयक्षणे जातायाः अपेक्षाबुद्धेर्नाशश्च भवति। सप्तमक्षणे सन्निकृष्ट-द्रव्ययोर्द्वित्वस्य प्रत्यक्षं द्वित्वनाशश्च जायते। तदेवं सप्तसु क्षणेषु द्रव्ययोः द्वित्वज्ञानस्योत्पत्तिः सम्मता। चतुर्थक्षण उत्पद्यमानं द्वित्वं प्रति तदव्यवहितपूर्वक्षणोत्पन्ना अपेक्षाबुद्धिर्निमित्तकारणम्। द्रव्यद्वयञ्च समवायिकारणम्। द्रव्यद्वयगतमेकत्वञ्च असमवायिकारणं भवति।

**द्वित्वज्ञाननाशः**– षष्ठक्षणे अपेक्षाबुद्धिनाशे सति सप्तमक्षणे द्वित्वस्य नाशो भवतीत्युक्तम्। द्वित्वज्ञानस्य नाशः कदा कथं जायत इति वक्तव्यम्। तदर्थं उक्तायां सप्तपरम्परायां अपरमपि क्षणद्वयं अष्टमं नवमं च सन्निवेश्यम्।

तथा च अष्टमे क्षणे सप्तमक्षणोत्पन्नात् 'इमे द्वे द्रव्ये' इत्याकारकज्ञानात् तत्समानाकारः संस्कारः, षष्ठक्षणोत्पन्नस्य द्वित्वज्ञानस्य च नाशो जायते। नवमक्षणे अष्टमक्षणोत्पन्नात् संस्कारात् 'इमे द्वे द्रव्ये' इत्याकारकज्ञानस्य नाशो जायते। इत्थं द्रव्ययोः द्वित्वप्रत्यक्षानुगुणायाः प्रक्रियायाः प्रारम्भक्षणादारभ्य नवमक्षणे द्वित्वविशिष्ट-द्रव्यज्ञाननाशात् पूर्तिर्भवति। तदेवं चतुर्थक्षणे द्वित्वोत्पत्तिमारभ्य सप्तमे क्षणे द्वित्वस्य नाशं द्वित्वविशिष्टद्रव्यप्रत्यक्षं च यावद्द्वित्वसंबद्धानि चत्वारिमुख्यकार्याणि संपद्यन्ते। उक्तप्रक्रियायां उत्पत्तिमन्तः पदार्थाः यथाक्रमेण परान् पदार्थान् जनयन्ति, तथैव परपदार्थानां विनाशमप्युद्भावयन्ति। आश्रयनाशादपि क्वचित् द्वित्वनाशः भवति, यथा-यदा द्वित्वाश्रयद्रव्यस्य नाशप्रयोजककर्मणस्तदवयव उत्पत्तिकाल एव एकत्वसामान्यज्ञानं जायते, तदा आश्रयनाशाद् द्वित्वनाशो भवतीति ध्येयम्।

**अवलोकितग्रन्थसूची** –


१. वैशेषिकसूत्रम् (प्रशस्तपादभाष्यसहितम्)

२. न्यायभाष्यम्

३. कारिकावली (मुक्तावली-दिनकरीयसहिता)

४. सर्वदर्शनसङ्ग्रहः

५. न्यायकुसुमाञ्जलिः

६. तर्कसङ्ग्रहः (नवव्याख्यासहितः)

७. सप्तपदार्थी

८. न्यायकन्दली


✦✦✦

# धर्मितावच्छेदकप्रत्यासत्तिविचारः

जे. श्रीनिवासः
न्यायविद्वान्, चेन्नै

ज्ञानानां कार्यकारणभावे प्रतिबध्यप्रतिबन्धकभावादिषु च साधारणतया समवाय-रूपा कार्यताकारणताघटकप्रत्यासत्तिः व्यभिचारादिवारकतया प्रसिद्धा। तत्र भवद्भिः श्री हरिरामतर्कवागीशैः अनुमितिपरामर्शयोः विषयनिष्ठप्रत्यासत्त्या 'धर्मितावच्छेदकत्वस्य' प्रत्यासत्तित्वं अङ्गीकृत्य कार्यकारणभावादिः निरूप्यते स्वीये 'धर्मितावच्छेदकप्रत्यासत्ति-विचाराख्ये' ग्रन्थे। तत्र यथामति यथाग्रथं प्रकृतप्रबन्धे विचार्यते।

**आत्मनिष्ठप्रत्यासत्त्यपेक्षया विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावे लाघवोपदर्शनम्** -अनुमितिपरामर्शयोः कार्यकारणभावः आत्मान्तर्भावेणेत्थमङ्गीक्रियते समवायसम्बन्धेन अनुमितिं प्रति समवायसम्बन्धेन परामर्शः कारणमिति। अन्यथा चैत्रस्य परामर्शदशायां तादृशपरामर्शशून्यस्य मैत्रस्यापि अनुमित्यापत्तिः। तेन समवाय-सम्बन्धेन मैत्रात्मनि परामशस्याभावात् न मैत्रस्यानुमित्यापत्तिः।

नवीनाः पुनः -निरुक्तरीत्या समवायघटितकार्यकारणभावाङ्गीरे 'वह्निव्याप्य-धूमवान् पर्वतः' इति परामर्शात् 'द्रव्यं वह्निमत्' इति अनुमित्यापत्तिवारणाय समानधर्मिता-वच्छेदककयोरेव अनुमितिपरामर्शयोः कार्यकारणभावः अङ्गीकार्यः इति धर्मिता-वच्छेदकस्यापि कार्यतावच्छेदककारणतावच्छेदकघटकत्वं कल्पनीयम्। तेन यद्यपि पूर्वोक्तापत्तिः वार्यते, तथापि धर्मितावच्छेदकभेदेन कार्यकारणभेदः अङ्गीकार्यः। तथा सति धर्मितावच्छेदकानामानन्त्यात् कार्यकारणभावानन्त्यापत्तिः। अतः तदपेक्षया समानधर्मितावच्छेदकत्वं अनुमितिपरामर्शयोः प्रत्यासत्तिः। तथा सति धर्मिता-वच्छेदकतासम्बन्धेन अनुमितिं प्रति धर्मितावच्छेदकतासम्बन्धेन परामर्शस्य कारणत्वमिति पर्यवस्यति। एवञ्च न 'वह्निव्याप्यधूमवान् पर्वतः' इति परामर्शात् 'द्रव्यं वह्निमत्' इति अनुमित्यापत्तिः, धर्मितावच्छेदकतासम्बन्धेन निरुक्तपरामर्शः पर्वतत्वे विद्यते तत्र धर्मितावच्छेदकतासम्बन्धेन द्रव्यत्वधर्मितावच्छेदककानुमितिः न सम्भवति। एवमेव धर्मितावच्छेदकप्रत्यासत्त्या कार्यकारणभावाङ्गीकारे धर्मितावच्छेदकस्य कार्यता-वच्छेदककारणतावच्छेककोटौ अनिवेशेन न धर्मितावच्छेदकानन्त्यप्रयुक्तकार्यकारण-भावानन्त्यापत्तिः इति वदन्ति।

तथा च धर्मितावच्छेदकतासम्बन्धेन वह्निविधेयकानुमितित्वावच्छिन्नं प्रति धर्मितावच्छेदकतासम्बन्धेन वह्निव्याप्यधूमप्रकारकज्ञानत्वावच्छिन्नस्य कारणत्वमिति निष्कर्षः।

ननु निरुक्तरीत्या कार्यकारणभावस्वीकारे 'वह्निव्याप्यधूमवद्द्रव्यं पर्वतो घटवान्' इति परामर्शकाले 'पर्वतो वह्निमान्' इति अनुमित्यापत्तिः। निरुक्तसमूहालम्बनज्ञाने पर्वतत्वस्यापि धर्मितावच्छेदकत्वात्, धर्मितावच्छेदकतासम्बन्धेन तज्ज्ञानं पर्वतत्वे वर्तते इति तेन सम्बन्धेन पर्वतत्वे वह्निविधेयिकायाः 'पर्वतो वह्निमान्' इत्यनुमितेरापत्तिः इति चेत्,

न, धर्मितावच्छेदकतामात्रं न कार्यतावच्छेदककारणतावच्छेदकसम्बन्धः, अपि तु वह्निविधेयतानिरूपितविशेष्यतावच्छेदकतासम्बन्धः कार्यतावच्छेदकः सम्बन्धः एवं वह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धः कारणतावच्छेदकः। तथासति न पूर्वोक्तापत्तिः, निरुक्तस्थले वह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन निरुक्तसमूहालम्बनज्ञानं द्रव्यत्वे एव विद्यते न तु पर्वतत्त्वे इत्यतः।

ननु एतत्कल्पे चैत्रीयपरामर्शकाले मैत्रस्यानुमितिवारणाय 'तत्तत्पुरुषीयत्वस्य' कार्यकारणभावे निवेशनीयतया पूर्वकल्पेन साम्यापत्तिः। पूर्वस्मिन् कल्पे धर्मितावच्छेदकभेदेन कार्यकारणानन्त्यापत्तिश्चेत्, अस्मिन् कल्पे तत्तपुरुषीयत्वनिवेशप्रयुक्तकार्यकारणभावानन्त्यापत्तिः।

## केषाञ्चिन्मतानुसारेण तत्तपुरुषीयत्वमनिवेश्य निर्दुष्टत्वोपपादनम्

आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावे धर्मितावच्छेदकानां, धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या कार्यकारणभावे तत्तत्पुरुषीयत्वानां च निवेशः अनावश्यकः इत्यतः तदुभयं परित्यज्य समवायसम्बन्धेन वह्निविधेयकानुमितित्वावच्छिन्नं प्रति समवायसम्बन्धेन वह्निव्याप्यधूमप्रकारकपरामर्शत्वावच्छिन्नस्य, धर्मितावच्छेदकतासम्बन्धेन वह्निविधेयकानुमितित्वावच्छिन्नं प्रति धर्मितावच्छेदकतासम्बन्धेन वह्निव्याप्यधूमप्रकारकपरामर्शत्वावच्छिन्नस्य कारणत्वमिति एकधर्मावच्छिन्नयोरेव अनुमितिपरामर्शयोः सम्बन्धभेदेन कार्यकारणभावद्वयमङ्गीक्रियते। एवञ्च समवायेन कार्यकारणभावकल्पे कार्यतावच्छेदककारणतावच्छेदककोटौ धर्मितावच्छेदकानिवेशप्रयुक्तलाघवं रक्षितं भवति। धर्मितावच्छेदकानिवेशे यः दोषः एकधर्मितावच्छेदककपरामर्शात् अपरधर्मितावच्छेदककानुमित्यापत्तिरिति सः धर्मितावच्छेदकतासम्बन्धेन कार्यकारणभावस्वीकारात् परिहतो

भवति। एवं धर्मितावच्छेदकतासम्बन्धेन कार्यकारणभावस्वीकारे व्यभिचारस्तु समवायेन कार्यकारणभावस्वीकारेण वार्यते।

नन्वेवमपि यदा चैत्रस्य 'वह्निव्याप्यधूमवान् पर्वत:' इति परामर्श: मैत्रस्य 'वह्निव्याप्यधूमवद्द्रव्यं' इति परामर्श:, तदा चैत्रस्य 'द्रव्यं वह्निमत्' मैत्रस्य 'पर्वतो वह्निमान्' इत्यनुमित्यापत्ति:। यत: प्रकृतपक्षे यत् कार्यतावच्छेदकं वह्निविधेयकानुमितित्वं पर्वतत्वद्रव्यत्वधर्मितावच्छेदककानुमितिसाधारणं, एवमेव कारणतावच्छेदकञ्च वह्निव्याप्यधूमप्रकारपरामर्शत्वं तदपि पर्वतत्वद्रव्यत्वधर्मितावच्छेदककपरामर्शसाधारणम्। चैत्रमैत्रयोरुभयोरपि परामर्शयो: कारणतावच्छेदकाक्रान्तत्वात् परस्परं विपरीतानुमित्यापत्ति: इति चेत्,

न, यत्र एकधर्मावच्छिन्नयो: पदार्थयो: उभयविधप्रत्यासत्त्या कार्यकारणभाव: तत्र विलक्षणा एव सामग्रीव्याप्ति: अभ्युपगम्यते। प्रकृते सा व्याप्ति:– तद्धर्मावच्छिन्ननिष्ठयादृशसम्बन्धावच्छिन्नकार्यतानिरूपितस्वावच्छिन्नकारणताघटकप्रत्यासत्त्या यदधिकरणप्रत्यासन्नस्य कारणतावच्छेदकावच्छिन्नस्य तद्धर्मावच्छिन्ननिष्ठयादृशसम्बन्धावच्छिन्नकार्यत्वान्तरनिरूपितस्वावच्छिन्नकारणताघटकप्रत्यासत्त्या अधिकरणं यत्, तत् तादृशसम्बन्धेन तदधिकरणसम्बद्धतत्कार्यतावच्छेदकावच्छिन्नस्य तेन सम्बन्धेन अधिकरणमित्याकारा। तथाहि वह्निविधेयकानुमितित्वावच्छिन्नसमवायसम्बन्धावच्छिन्नकार्यतानिरूपितवह्निव्याप्यधूमप्रकारकपरामर्शत्वावच्छिन्नकारणताघटकसमवायप्रत्यासत्त्या तादृशानुमित्यधिकरणचैत्रात्मप्रत्यासन्नस्य वह्निव्याप्यधूमप्रकारक (पर्वतविशेष्यक) परामर्शत्वावच्छिन्नस्य वह्निविधेयकानुमितित्वावच्छिन्ननिष्ठधर्मितावच्छेदकतासम्बन्धावच्छिन्नकार्यत्वान्तरनिरूपितवह्निव्याप्यधूमप्रकारकपरामर्शत्वावच्छिन्नकारणताघटकधर्मितावच्छेदकताप्रत्यासत्त्या अधिकरणं यत् पर्वतत्वं, तत् तादृशधर्मितावच्छेदकता सम्बन्धेन निरुक्त परामर्शाधिकरणचैत्रात्म प्रत्यासन्नवह्निविधेयकानुमितित्वावच्छिन्नस्य धर्मितावच्छेदकतासम्बन्धेन तत् पर्वतत्वं अधिकरणमिति समन्वय:।

अस्या: व्याप्ते: अयमर्थ:– 'पर्वतो वह्निमान्' इत्यनुमिते: समवायसम्बन्धेन कारणीभूतस्य 'वह्निव्याप्यधूमवान् पर्वत:' परामर्शस्य चैत्रात्मसमवेतस्य धर्मितावच्छेदकतासम्बन्धेन अधिकरणं यत्पर्वतत्वं तदेव धर्मितावच्छेदकतासम्बन्धेन तादृशानुमितेरप्यधिकरणं भवेत्, सा चानुमिति: पर्वतत्वधर्मितावच्छेदिकैव भवति। तथा च न पूर्वोक्तदोष इति।

✦✦✦

# सिद्धान्तरत्नाकरकौमुदीमूलार्थविद्योतिनीदृष्ट्या हेतुकरणपदार्थविमर्शः

**श्रीओम् शर्मा**

व्याकरणाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्

श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः,उत्तराखण्डः

महर्षिपाणिनिना साधकतमं करणमिति सूत्रेण करणसञ्ज्ञा उक्ता, तथाग्रे तृतीयाविभक्तिप्रकरणे हेत्वर्थे तृतीयार्थं **'हेतौ'**[१] इति सूत्रं रचितम्। अनेन प्रतिभाति यद्धेतुकरणयोर्मध्येऽस्ति कश्चिद् भेदः। यद्यपि लोके करणहेत्वुभौ शब्दौ पर्यायत्वेन प्रयुज्येते। यथा नेत्राभ्यां पश्यति, हस्तेन खादति, परशुना छिनत्तीत्यादि वाक्येषु लोके करणत्वविवक्षायां हेतुत्वविवक्षायां वा तृतीया प्रयुज्यते। अत एव एतादृशं हेतुकरण-विषयकमभेदव्यवहारं वीक्ष्य भट्टोजिदीक्षितः सिद्धान्तकौमुद्यां कारकप्रकरणे हेतौ इति सूत्रे हेतुत्वकरणत्वयोर्भेदं प्रदर्शयति।

- **द्रव्यादिसाधारणं निर्व्यापारसाधारणञ्च हेतुत्वम्।**
- **करणत्वन्तु क्रियामात्रविषयं व्यापारनियतञ्च।।**

रामकृष्णभट्टोऽत्र व्याख्याति यत्–हेतुलक्षणे आदिपदेन गुणक्रिये ग्राह्ये, एतेन द्रव्यगुणक्रियानिरूपितं निर्व्यापारसाधारणं निर्व्यापारसव्यापारवृत्ति च यत्तदेव हेतुत्वम्। क्रियामात्रनिरूपितं व्यापारवद्वृत्ति च यत्तदेव करणत्वमित्वर्थः।

दीनबन्धुझामहोदयस्य मते तु–द्रव्यादिपदं द्रव्यादिजनकपरम्, तेन द्रव्यादीत्यस्य द्रव्यगुणक्रियाजनकेत्यर्थः साधारणपदार्थश्च सामान्यधर्म इति। तेन द्रव्यादिसाधारण-मित्यस्य द्रव्यगुणक्रियाजनकसामान्यधर्म इत्यर्थः। इत्थं हेतुत्वं हि द्रव्यगुणक्रियाजनकेषु त्रिष्वपि भवति, करणत्वन्तु क्रियाजनके एवेति वैषम्यम्। अपि च व्यापारवति व्यापारशून्ये चोभयत्रापि हेतुता, करणता तु व्यापारवत्येवेत्यपरो भेदः।

करणलक्षणे क्रियामात्रविषयमिति पदस्य क्रियामात्रं विषयः स्वनिरूपित-जन्यतावत्त्वेन सम्बन्धि यस्य स इति विग्रहात् क्रियाया एव स्वजनकवृत्तित्वेन सम्बन्धीत्यर्थः, क्रिया जनकमात्रे विद्यमानमिति यावत्। तथा च व्यापारनियतेति

पदस्य व्यापारव्याप्तमित्यर्थः। अत्र व्याप्यत्वन्नाम स्वाभाववदवृत्तित्वम्। तथा च व्यापारनियतमिति पदस्य व्यापाराभाववदवृत्तीति सरलार्थः, एतेन व्यापारवन्मात्रे वर्तमानमित्यागतम्, एवं रूपेण दीनबन्धुनापि हेतुकरणयोर्मध्ये कश्चिन्महान् भेदः प्रादर्शि।

यद्यपि लोके हेतुस्थाने करणस्थाने कारणशब्दमेव प्रयुज्यते, यथा '**सखा बचन सुनि हरषे कृपासिंधु बलसींव। कारन कवन बसहु बन मोहि कहहु सुग्रीव**'[२]। क्वचिद्धेतुरेव प्रयुज्यते, यथा-'**राम जनम के हेतु अनेका**'[३]। एवं महावैयाकरणभर्तृहरिणापि हेतुकरणविषयो केचन श्लोकाः प्रस्तुताः तेऽत्र प्रस्तूयन्ते-

**द्रव्यादिविषयो हेतुः कारकं नियतक्रियम्।**
**कर्त्ता कर्त्रन्तरापेक्षः क्रियायायां हेतुरिष्यते।।**[४]

**अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते।**
**आश्रितावधिभावं तु लक्षणे लक्षणं विदुः।।**[५]

अर्थात्- हेतुस्तु द्रव्यादिविषयकं भवति। कारकं–करणन्तु नियतक्रियं भवति। तथा च करणं सदा क्रियोत्पत्तेः पूर्वं तिष्ठति, किन्तु फलरूपहेतुस्तु क्रियाया अनन्तरमपि जायते। अत एव न्यूनदेशवृत्तित्वात् करणन्तु व्याप्यः तदपेक्षया अधिक-देशवृत्तित्वात् हेतुः व्यापको भवति। उपर्युक्तश्लोकस्य व्याख्यावसरे वाक्यपदीयस्य व्याख्यकृता हेलाराजेनापि- ''**स्वरूपभेदेन क्रियानिर्वर्तकं कारकम्, सामान्येन जनको हेतुः ज्ञापके लक्षणमिति**'' उक्तम्। एतेन स्पष्टं परिलक्षितं भवति यत्-द्वयोरप्याचाययोः मते हेतुपदार्थः पृथक् करणपदार्थश्च पृथग्वर्त्तते।

काशिकायामपि '**हेतौ**' इति सूत्रे हेतुविषये उक्तमस्ति यत्- 'फलसाधनयोग्यः पदार्थो लोके हेतुरुच्यते।'[६] यथा धनेन कुलम्, कन्यया शोकः, विद्यया यशः।

यद्यपि व्याकरणशास्त्रे हेतुशब्दः द्विधा प्रयुज्यते। १- शास्त्रीयहेतुः- यथा '**तत्प्रयोजको हेतुश्च**'[७], '**हेतुमति चे**'[८] त्यादिषु। २- लौकिकहेतुः - '**लक्षणहेत्वोः क्रियायाः**'[९], '**हेतौ**'[१०], '**हेतुहेतुमतोर्लिङ्**'[११] इत्यादि सूत्रेषु। तथापि '**हेतौ**' इति सूत्रे शास्त्रीयहेतोर्ग्रहणं न भवति। अत एव लिखति सिद्धान्तरत्नाकरकारः कृत्रिमस्य हेतोरिह न ग्रहणम्। किं कारणम् तत्प्रयोजको हेतुश्च इति सूत्रस्थचकारेण कर्तृसञ्ज्ञाविधानात्, कर्त्तृत्वादेव ततस्तृतीयासिद्धेः। अत एव प्रकृतसूत्रे लौकिकहेतुरेव गृह्यते इति सर्वसम्मतम्। शब्दकल्पद्रुमे तु-हिनोति व्याप्नोति कार्यमिति विग्रहे '**हि**' धातोः '**कमिमनिजनिगाभायाहिभ्यश्च**'[१२] इतिसूत्रेण '**तु**' प्रत्यये कृते हेतुशब्दः

भवतीति व्याकृतम्। तस्यार्थोऽस्तिकारणमिति। अमरकोशेऽपि हेतुर्ना कारणं बीजं निदानं **त्वादिकारणम्**[१३] इति पर्यायाः प्रदर्शिताः।

न्यायशास्त्रे तु हेतुशब्दः-लिङ्गप्रतिपादकपर[१४] एव गृह्यते। तत्र पञ्चावयववाक्येषु आदौ पर्वतो वह्निमान् इति प्रतिज्ञावाक्यम्। धूमवत्वादिति हेतुवाक्यम् अत्र धूमो लिङ्गत्वात् हेतुः। यो यो धूमवान् स सोऽग्निमान्, यथा-महानसम् इत्युदाहरणम्। तथा चायमित्युपनयः, 'तस्मात्तथा' इति निगमनवाक्यम्। अत् एव सुस्पष्टमेव प्रतिभाति यत् न्यायशास्त्रे हेतुशब्दः कारणपर्यायतया न गृह्यते।

कारणेषु मध्ये यत् कार्योत्पत्त्यनुकूलव्यापारजनकं यद् असाधारणं कारणं तदेव करणं भवति। मन्ये सर्वाण्यपि कारणानि कार्यसाधकानि भवन्ति किन्तु क्रियासिद्धौ यत्कारणं (असाधारणं) प्रकृष्टोपकारकं भवति तत् करणं (साधकतमम्) कथ्यते इत्येवं करणसन्दर्भे नैयायिकवैयाकरणयोः समानमेव तन्त्रम् इति विषयः तर्कसङ्ग्रहस्य पदकृत्ये श्रीनिवासमुखोल्लासिन्याञ्च प्राधान्येन वर्णितः। तथा च करणशब्देनान्यशास्त्रेषु यथा-ज्योतिषसांख्यमीमांसेत्यादिषु न्यायव्याकरणाभिमतादन्यद् गृह्यते इति तु सुप्रथितमेवास्ति।

व्याकरणस्य दार्शनिकग्रन्थे वाक्यपदीये तु हेतुकरणयोर्विषये महान् विचारः कृतः। तत्र आचार्यभर्त्तृहरिः हेतोः प्रकारद्वयं लिखति, '**आनुलोभ्योपलक्षितहेतुः**' यथा बीजेनाङ्कुरः इत्यादिषु। **प्रातिलोम्योपलक्षितहेतुः** यथा-दण्डेन घटः इत्यादिषु प्रयोगेषु। तथा च तत्रैवाचार्यहेलाराजः हेतोः सामान्यं लक्षणं लिखति, तद्यथा-व्यापारमनाश्रित्य विवक्षितार्थसिद्धौ योग्यतामात्रेण निमित्तत्वेनाश्रीयते यः स हेतुः।[१५]

अपि च तत्रैव ग्रन्थे करणस्यापि चातुर्विध्यमुक्तम्- १- साधनार्थे, यथा-साधकतमं करणम्, इति सूत्रे। २- आभ्यन्तरप्रयत्नः। ३- ध्वनि-उत्पादकाङ्गः। ४- शब्दप्रयोगः यथा- इतिकरणम्, वतकरणम्। आचार्य हेलाराजेनापि करणविषये उक्तं यत्- "सन्निपत्योपकारिषु सर्वेष्वपि साधनेषु यद् व्यापारानन्तरभाविनी क्रिया लक्ष्यते तदवाप्तावतिशयं साधकतमं करणम्। अर्थाद्-दूरे समीपे वा स्थिते यस्य वस्तुनः व्यापारानन्तरं क्रियानिष्पत्तिः दृश्यते तदेव करणम्।

अथ सूत्रोक्तान्युदाहरणानि क्रमशः वक्ष्ये। आद्ये द्रव्यविषये हेतुत्वमुदाहरति भट्टोजिदीक्षितः 'दण्डेन घटः' इति। अत्र घटः द्रव्यं दण्डः हेतुः, अत एवार्थो भवति दण्डहेतुको घट इति। अत्र सिद्धान्तरत्नाकरकारस्य कथनमस्ति यत्-दण्डे व्यापारोऽस्तु वा मा वा, किन्तु साक्षात्क्रियानन्वयित्वात्करणं नास्ति। अर्थात्-यदा कुम्भकारः दण्डेन घटस्य निर्माणं करोति तदा दण्डेन चक्रं भ्रामयित्वा दण्डं

स्थापयति, स्थितो दण्डः इदानीं व्यापाररहितोऽस्ति। अतः घटरूपकार्यस्य दण्डः हेतुर्वर्तते न तु करणम्। यतोहि करणन्तु व्यापारनियतं भवति। तथा च दण्डप्रयोगादनन्तरं घटनिर्माणमवश्यं भवति, इत्यपि नास्ति कश्चन नियमः। अत एव घटनिर्माणे दण्डः हेतुर्वत्तते न तु करणम्। अपि च 'दात्रेण लुनाति' 'असिना छिनत्ति' इत्यादि प्रयोगेषु दात्रासीत्यादीनां क्रियासमनन्तरमेव कर्त्तनहननादिक्रिया सम्पद्यते, अत एव दात्रमसीत्यादीनां करणसंज्ञा भवति न तु तत्र हेतौ तृतीया कल्प्यते।

कौमुदीमूलार्थविद्योतिनीकारस्त्वत्र सन्दर्भे कथयति यत् 'दण्डेन घटः' इत्यत्र दण्डस्य व्यापारवत्त्वेऽपि क्रियाजनकत्वाभावान्न करणत्वम्। अत्र क्रियाजनकत्वञ्च-क्रियान्वयित्वरूपम्, एवञ्च यदा '**दण्डहेतुको घटः**' इति घटे हेतुतया दण्डस्यान्वये तात्पर्यं तदा क्रियाजनकत्वभावात्करणत्वाभावेन हेतावेव तृतीया भवति। किन्तु यदा '**दण्डोत्पतिको घटः**' इति उत्पत्तावन्वयतात्पर्यं तदा करणतृतीयैव।

सिद्धान्तरत्नाकरेऽग्रे लिखितमस्ति यत्- गुणं प्रति हेतुत्वोदारणं यद्यपि दीक्षितेन मूलग्रन्थे न लिखितं तथापि 'पुण्येन गौरवर्णः' इत्याद्युदाहार्यम्। बालमनोरमाकारस्तु 'पुण्येन ब्रह्मवर्चसमि'ति–उज्जहार।

अथ क्रियाविषये तृतीयम् उदाहरणमाह- 'पुण्येन दृष्टो हरिरिति'। रत्नाकरकारमते पुण्यशब्देनेह परमापूर्वमुच्यते, तस्य परमापूर्वस्य हरिदर्शनरूपक्रियान्वयित्वसम्भवेऽपि व्यापारवत्वाभावान्न करणत्वं भवति। किन्तु यदा पुण्यशब्दोऽपूर्वस्य न वाचकः अपितु दानयागादिरेव पुण्यपदेन विवक्ष्यते, तदा तु दानयागादौ व्यापारत्वमस्त्येव। अत एव एतादृश्यां विवक्षायां 'कर्त्तृकरणयोस्तृतीया' इत्यनेनैव तृतीया सिद्ध्यति। अत्र सन्दर्भे केचन कथयन्ति यत्–द्रव्यगुणक्रियासाधारणं निर्व्यापार–सव्यापार–साधारणं हेतुर्भवति, तथा च क्रियामात्रविषयं व्यापारनियतं करणं भवति, अर्थात्–हेतुर्व्यापकः करणं व्याप्यम्। एतेन हेतुत्वादेव सर्वत्र तृतीया सिद्धा। यथा बाणेन हतः – बाणहेतुकं हननम्,एवं कृते सर्वेष्वपि करणविषयकप्रयोगेषु हेतुत्वादेव तृतीया सिद्धा। अत एव 'कर्त्तृकरणयोस्तृतीया' इति सूत्रे करणग्रहणं नावश्यकम्।

प्रकृतविषयसन्दर्भे तत्वबोधिनीकारस्य मतं स्तुत्यं वर्त्तते। तद्यथा-'**विवक्षातः कारकाणि भवन्ति**' इति तु कारकाणां सन्दर्भे प्रायः सर्वेऽपि जानन्त्येव, एतेन क्रियासाधकं यद्व्यापारवत्वेन विवक्षितं चेत् तदा करणं भवति। यदि व्यापारवत्वेन न विवक्षितं तदा हेतुर्भवति इति विशेषः। अत एव कौमुदीमूलार्थविद्योतिनीकृता यत्प्रतिपादितं तत् उचितमेव प्रतिभाति। अत एव तत्वबोधिनीकारोऽपि कथयति- 'रामेण बाणेन हतः' इत्यादौ हनने बाणादेः निमित्तत्वं यदा विवक्ष्यते तदा तु 'हेतौ'

इत्यनेनैव तृतीया भविष्यति। यदा तु-'**बाणव्यापारसाध्यप्राणवियोगाश्रयः**' इति विवक्षा तदा 'कर्तृकरणयोस्तृतीया' इति सूत्रेणैव तृतीया सिद्धा।

सिद्धान्तरत्नाकरकारस्त्वत्रैकं नूतनविषयं लिखति यत्-कोऽपि पूर्वपक्षं स्थापयति-धान्येन धनी इति वाक्यात् 'धान्याभिन्नधनवान्' इति बोधो जायते अत एवात्र अभेदे तृतीया वर्त्तते, इति मतं निराकुर्वन् लिखति सिद्धान्तरत्नाकरकारः अभेदे तृतीया विधायकं किमपि पाणिनेः सूत्रं नास्ति। अत एव तादृशानुशासनाभावात् अत्र "हेतौ" इति सूत्रेण हेत्वर्थे तृतीया। एवञ्च "ज्वालया पचति" इत्यादि प्रयोगेष्वपि करणत्वाभावात् हेतुत्वमेव तृतीयार्थ इत्याद्यूह्यम्।

## सन्दर्भाः

१. पाणिन्यष्टाध्यायी-२-२-२३
२. रामचरितमानस-किष्किन्धाकाण्ड,दोहा-०४,चौपाई-०५
३. रामचरितमानस- बालकाण्ड,दोहा-१२१,चौपाई-०२
४. वाक्यपदीयम्-साधनसमुद्देशः-२५
५. वाक्यपदीयम्-साधनसमुद्देशः-२४
६. काशिका-२-३-२३
७. पाणिन्यष्टाध्यायी-४-१-५५
८. पाणिन्यष्टाध्यायी -३-१-२६
९. पाणिन्यष्टाध्यायी - ३-२-१२६
१०. पाणिन्यष्टाध्यायी -२-३-२२
११. पाणिन्यष्टाध्यायी- ३-३-१५६
१२. उणादिसूत्रम् - १-४-२९
१३. अमरकोशः -२-१
१४. तर्कसंग्रहदीपिका
१५. वाक्यपदीयम्-साधनसमुद्देशः-२४

## उपयुक्तग्रन्थसूची

१. वाक्यपदीयम्, भर्तृहरिः, रामकिशोर त्रिपाठी, प्रथमम्-१९९७, भारतीयविद्या-संस्थानम्- वाराणसी।
२. लघुसिद्धान्तकौमुदी(३), वरदराजाचार्यः, भीमसेन शास्त्री, द्वितीयम् -२००६, भैमीप्रकाशनम्-दिल्ली।

३. अष्टाध्यायीसूत्रपाठः, पाणिनिः, पुष्पादीक्षितः, प्रथमम्-२०१०, संस्कृतभारती-नईदिल्ली।

४. सुभाषितत्रिशती, भर्तृहरिः, रामचन्द्रबुधेन्द्रः, चतुर्थम्,२००१, चौखम्बासंस्कृत-संस्थानम्-वाराणसी।

५. तर्कसङ्ग्रहः, अन्नम्भट्टः, केदारनाथत्रिपाठी, द्वितीयम्, १९८५, मोतीलाल-बनारसीदासः - दिल्ली।

६. वैयाकरणसिद्धान्तकौमुदी(१,२), भट्टोजिदीक्षितः, गिरिधरशर्मा, परमेश्वरा-नन्दशर्मा, एकादशतमम्-२००४, मोतीलालबनारसीदासः-दिल्ली।

७. सिद्धान्तरत्नाकरः, रामकृष्णभट्टः, आजादमिश्रः, प्रथमम्-१९९५, साहित्य शिल्पी-लखनऊ।

८. वैयाकरणसिद्धान्तकौमुदी(१), भट्टोजिदीक्षितः, गुरुप्रसादशास्त्री त्रयः, प्रथमम् -२०१२, चौखम्बा सुरभारती-वाराणसी।

९. समयोचितपद्यमालिका, गङ्गाधरकृष्णद्रविणः, त्रयोदशतमम्-१९८६, निर्णय-सागरः-मुम्बई।

१०. प्रौढमनोरमा, भट्टोजिदीक्षितः, बालकृष्णशास्त्री, द्वितीयम्-१९४०, वाणी-विलासः-वाराणसी।

११. परिभाषेन्दुशेखरः, नागेशभट्टः, सत्यनारायणमूर्त्तिः, प्रथमम्-२००४, राष्ट्रिय-संस्कृत-विद्यापीठम्-तिरुपतिः।

१२. व्याकरणमहाभाष्यम्(१,४), पतञ्जलिः, गुरुप्रसादशास्त्री, बालशास्त्री, द्वितीयम् - २००१, प्रतिभा-दिल्ली।

१३. प्रौढमनोरमा, भट्टोजिदीक्षितः, जयशङ्करलालत्रिपाठी, द्वितीयम्-२००२, कृष्णदास अकादमी-वाराणसी।

१४. वैयाकरणसिद्धान्तकौमुदी(२), भट्टोजिदीक्षितः, गोविन्दाचार्यः, लक्ष्मीशर्मा, प्रथमम्-२०१६, चौखम्बा सुरभारती-वाराणसी।

१५. काशिका(२) वामनजयादित्यौ, जयशङ्करलालत्रिपाठी, द्वितीयम्-२०१२, तारा बुक एजेन्सी-वाराणसी।

१६. अमरकोषः, अमरसिंहः, हरगोविन्दमिश्रः, प्रथमम्-१९३९, चौखम्बा संस्कृत सीरिज आफिस-वाराणसी।

१७. परमलघुमञ्जूषा, नागेशभट्टः, कालिकाप्रसादशुक्लः, प्रथमम्-१९६१, साधनाप्रेस-बड़ौदा।

१८. व्याकरणमहाभाष्यम्, पतञ्जलिः, भार्गवशास्त्री, कैयटः नागेशः वैद्यनाथ-पायगुण्डे च, द्वितीयम्-१९८७, चौखम्बासंस्कृतप्रतिष्ठानम्-देहली।

१९. श्रीरामचरितमानस, गोस्वामीतुलसीदास, शतोत्तरं षड्पञ्चाशततमः मुद्रणम्-सं २०६७,गीताप्रेस-गोरखपुरम्।

२०. कौमुदीमूलार्थविद्योतिनी, दीनबन्धुझा, शशिनाथझा, प्रथमम्-१९८६, कामेश्वर-सिंहदरभङ्गासंस्कृतविश्वविद्यालयः-दरभङ्गा।

२१. कारकप्रकरणम्, रमाकान्तत्रिपाठी, प्रथमम्-सं.-२०६३, विद्यार्थीप्रकाशनम्, जाप्लीनगंज बलिया।

**( सन्दर्भ-अन्तर्जालसूची )**

१. https: // sa.wikisource.org/wiki/वाचस्पत्यम्

२. https: // sa.wikisource.org/wiki/शब्दकल्पद्रुमः

३. https://sa.wikibooks.org/wiki/वाक्यपदीय॥तृतीय॥काण्ड

५. https: // hi.wikipedia.org/wiki/श्रीरामचरितमानस

✦✦✦

# न्यायोक्तकालोपाधीनां ज्योतिषशास्त्रीयविवेचनम्।

डॉ० सुरेशशर्मा
ज्योतिषाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः

कालयितुमाकलयितुं गणयितुं योग्यो वा यः पदार्थो भवति सः कालसंज्ञकः। कालात् प्रसूतोऽयं विश्वः कालादेव परिवर्तितः परिवर्धितः परिचालितश्च दृश्यते। कालं विहाय कोऽपि जगति क्षणमपि स्थातुं न शक्नोति। वेदवेदाङ्गेषु कालस्य महिमा प्राचर्येण वर्णिता दृश्यते। पुराणादिष्वपि **"कालः कलयताम्यहम्"** "त्वं भगनान् एव कालः" **कालः पचति भूतानि"** इत्यादिना कालस्य महत्वं वैशिष्ट्यं च दृश्यते। वेदाः अस्माकं ज्ञानमूलं कर्ममूलञ्च भवन्ति। **'यज्ञो वै श्रेष्ठतमं कर्म'** **'यागादिरेव धर्मः'** इति श्रुतिवाक्यैः यज्ञस्य सर्वश्रेष्ठकर्मत्वं सिद्ध्यति। वेदे प्रवृत्तिः यज्ञसम्पादनाय भवति।

यज्ञसम्पादनाय च कालज्ञानस्य महती आवश्यकता वर्तते। यतो हि यज्ञभागा बहुविधाः सन्ति। केचन यज्ञा एतादृशाः सन्ति, येषां सम्बन्धः सम्वत्सरेण सह भवति, केचन यज्ञाः ऋतुसम्बन्धिनो वर्तन्ते केचन च तिथि-मास-पक्ष-अनुष्ठेयाः वर्तन्ते। यथा-**'संवत्सरमेतद् व्रतं चरेत्।'** (तै-आ.१.३२.१) **'संवत्सरमुख्यं भूत्वा'** (तै-सं- ५.६.५.१) **'वसन्ते ब्राह्मणोग्निमादधीत ग्रीष्मे राजन्य आदधीत। शरदि वैश्य आदधीत'** (तै-ब्रा-१.१.२.६.७) **'मासि मासि पृष्ठान्युपयान्ति मासि मासि अतिग्राह्य गृह्यन्ते।'** (तै-सं-७.५.१५)**'यं कामयेत् वसीयान्स्यादिति तं पूर्वपक्षे याजयेत्'** (तै-सं-२.२.३.१) **'एकाष्टकायां दीक्षेरन् फाल्गुनीपूर्णमासे दीक्षेरन्'** (तै-सं-७.४.८.१) **'प्रातर्जुहोति सायं जुहोति'** (तै- ब्रा- २.१.२) 'कृतिकास्वग्निमादधीत्' (तै-ब्रा-१.१.२.१) इति।

यज्ञस्य साफल्यं न केवलानुष्ठाने परिसमाप्यते, प्रत्युत उचितकालेऽनुष्ठाने एव भवति। उचितकाले कृतमेव यज्ञादिकर्म साफल्यं भजते, अकालेऽनुष्ठितं कर्म वैफल्यं प्रयाति। अतः कालस्य महत्वं स्वरूपञ्च सर्वेष्वेव वेद-वेदाङ्गेषु रामायण-महाभारत- पुराण-दर्शन- साहित्यादिशास्त्रेषु उपलभ्यते। न्यायेक्तकालोपाधीनां

ज्योतिषशास्त्रदिशा विवेचनमत्र प्रस्तूयते।

न्यायदर्शनानुसारेण कालः नवद्रव्येष्वन्यतमोस्ति। तन्मते कालस्य स्वरूपमनेन प्रकारेण वर्ण्यते-"**अतीतादिव्यवहारहेतुः कालः स चैको विभुर्नित्यश्च**"। अर्थात् येन भूत-भविष्य-वर्तनामानानां व्यवहारः भवति स एव कालः। न्यायसिद्धान्तमुक्तावल्यां कालविषये प्रोक्तं-"**जन्यानां जनको कालः जगतामाश्रयो मतः**" अर्थात् कालः जन्यपदार्थानां निमित्तकारणमस्ति।

"परापरत्वबुद्धेरसाधारणं निमित्तं कालः। कालस्त्वेकोऽप्युपाधिभेदात्क्षणादि-व्यवहारविषयः।" इत्युक्त्या कालः एक एवास्ति। परमुपाधिभेदात् तस्य क्षणादिभेदाः सन्ति। क्षणादिसंज्ञको कालः व्यावहारिककालोऽस्ति।

भारतीयज्योतिष्शास्त्रं हि कालविधानशास्त्रम्। वेदप्रतिपादितयज्ञयागादीनां कालाश्रितत्वात् शास्त्रमिदं भगवतः वेदपुरुषस्य नेत्रत्वेन स्वीकृतं प्राचीनऋषिभिः। ज्योतिष्शास्त्रानुसारेण कालः द्विप्रकारको वर्तते। एकस्तु समस्तचराचरस्य संहारकः, अन्यः कालः गणनात्मकः (लोकैर्ज्ञातुं योग्यः)। स गणनात्मकः कालः स्थूलकाल-सूक्ष्मकालभेदात् द्विप्रकारक उच्यते। स्थूलकालः मूर्तः व्यावहारिकः (प्रतिदिने व्यवहारे ग्राह्यः) तथा सूक्ष्मकालोऽव्यवहारिकः। यथा-

**लोकानामन्तकृतो कालः कालोऽन्यः कलनात्मकः।**
**स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते।।**
**प्राणादिः कथितो मूर्तस्त्रुट्यादितोऽमूर्तसंज्ञकः।**

न्यायदर्शनानुसारेण कालस्योपाधिभेदात् निमेष-काष्ठा-कला-मुहूर्त-दिवस-पक्ष- मास-ऋतु-अयन-संवत्सर-युग-मन्वन्तर-ब्रह्मदिन-प्रलयादिभेदाः सन्ति। एतेषां विभागानां ज्योतिषशास्त्रोक्तस्वरूपमत्र प्रतिपाद्यते।

**निमेष-काष्ठा-कला-मुहूर्ताः**-जितेन्द्रियपुरुषस्य लोचनयोः क्ष्मपातः स निमेषसंज्ञको भवति। स यावता कालेन निष्पद्यते तावान् कालोऽपि निमेषशब्देनोच्यते। अष्टादशसंख्याकनिमेषैः एका काष्ठा जायते। त्रिंशत्काष्ठानामेककला, त्रिंशत्कलानामेका नाडी घटी वा, घटीद्वयात्मको कालः एकः क्षणः मुहूर्तो वा त्रिंशन्मुहूर्तानामेक दिवसो षष्टीघट्यात्मको भवति। यथा-

| | | |
|---|---|---|
| १ निमेषः | जितेन्द्रियपुरुषस्य क्ष्मपातसमयः = ४/९ विपलं (८/४५सेकेण्ड) | |
| १८ निमेषाः | १ काष्ठा | ८ विपलानि वा २ सेकेण्ड |
| ३० काष्ठा | १ कला | ४ पलं वा १ मिनट ३६ सेकेण्ड |

| | | |
|---|---|---|
| ३० कला | १ मुहूर्तः | २ घटी वा ४८ मिनट |
| ३० मुहूर्तः | १ अहोरात्रम् | ६० घटी वा २४ होराः |

सूर्यसिद्धान्तानुसारेण स्वस्थपुरुषस्यैकश्वासोच्छ्वासान्तरवर्तिकालः प्राणसंज्ञकः। षड्भिः प्राणैर्विनाडिका विघटिका वा पलमिति यावद् भवति। षष्टिर्विनाडीभिः एका नाडिका घटिका वा भवति। षष्टिघटिकाभिः नक्षत्रजनितमहोरात्रं कथितं तथा त्रिंशत् नाक्षत्राहोरात्रैः एको नाक्षत्रमासो भवति।

**दिवसस्वरूपम्**-कस्यापि ग्रहस्योदयात् तस्य पुनरुदयं यावत् तद्ग्रहसम्बन्धि दिनं भवति। परं लोकव्यहारे सौर-चान्द्र-सावन-नाक्षत्रेति चतुर्विधानि दिनानि सन्ति। सूर्यस्य ३६० अंशात्मके भ्रमणवृत्ते एकांशभोगकालः सौरदिनसंज्ञकः, सूर्यचन्द्रयोः द्वादशात्मकमन्तरं एका तिथिः चान्द्रदिनं वा, उदयादुदयं भानोः सावनदिनम् तथा नक्षत्रस्योदयात् द्वितीयनक्षत्रोदयं यावदेकनाक्षत्रदिनं भवति।

**पक्षः**-पक्षस्य सम्बन्धः चान्द्रमानेन सह वर्तते। एकस्मिन् चान्द्रमासे शुक्ल-कृष्णसंज्ञकौ द्वौ पक्षौ स्तः। त्रिंशत्तिथ्यात्मके चान्द्रमासे पञ्चदशतिथयः शुक्लपक्षे तथा पञ्चदशतिथयः कृष्णपक्षे भवन्ति।

**मासः**-मासाऽपि चतुर्विधाः सौरचान्द्रसावननाक्षत्रभेदात्। सूर्यस्य एकराशिभोगकालः सौरमासः, अमान्तादमान्तावधिश्चान्द्रमासः, त्रिंशत्सावनदिनानामेकसावनमासस्तथा त्रिंशन्ननाक्षत्राहोरात्राणामेकनाक्षत्रमासो भवति।

**ऋतुः**-३६० अंशात्मके सूर्यभ्रमणवृत्ते सूर्यस्य राशिभोगतः षड्ऋतवो भवन्ति। सूर्यः यदा मीनमेषयोः भवति तदा वसन्तः, वृषमिथुनयोर्ग्रीष्मः, कर्कसिंहयोः वर्षा, कन्यातुलयोः शरद्, वृश्चिकधन्विनोः हेमन्तः मकरकुम्भयोः च शिशिरः एवं क्रमेण षड्ऋतवो भवन्ति।

**अयनम्**-अयनं नाम चलनम्। कर्कादितः धन्वन्तं यावत् ग्रहस्य दक्षिणदिशि चलनत्वात् दक्षिणायनं तथा मकरादितः मिथुनान्तं यावत् ग्रहस्योत्तरदिशि चलनत्वादुत्तरायणं भवति।

**संवत्सरः**-ज्योतिष्शास्त्रानुसारेण बृहस्पतिः यावता कालेन स्वमध्यगत्या एकराशिभोगं करोति, तावन्मितकालः संवत्सरसंज्ञको भवति। संवत्सराः विजयादयः षष्टिसंख्यकाः भवन्ति।

**युगप्रमाणम्**-मनुष्यानां ३६० सौरदिनानि देवनामेकं दिनं दिव्यदिनसंज्ञकम्, ३६० दिव्यदिनैः देवानामेकं वर्षं जायते। ४८०० दिव्यवर्षाणि = १,७२,८०,०००

मानववर्षाणि कृतयुगस्य पूर्णमानम्, ३६०० दिव्यवर्षाणि =१,२९,६०००० मानववर्षाणि त्रेतायुगस्य, २४०० दिव्यवर्षाणि = ८,६४,००० मानववर्षाणि द्वापरयुगस्य तथा १२०० दिव्यवर्षाणि= ४,३२,००० मानववर्षाणि कलियुगस्य पूर्णमानमस्ति। एवं १२००० दिव्यवर्षाणामेकं महायुगं भवति।

**मन्वन्तरम्**-मनुसम्बधि मानं मनुमानं कथ्यते। तत्रैकसप्ततिमहायुगानामेको मनुर्भवति। देवासुराणां वर्षप्रमाणेन द्वादशसहस्रवर्षैः महायुगमेकं भवति। अर्थात् मनुष्याणामेकसौरवर्षं देवासुराणामेकदिनतुल्यं भवति तथा मनुष्यानां ३६० सौरवर्षाणां देवानामेकवर्षं भवति। एवं द्वादशसहस्रदिव्यवर्षैः एकं महायुगं भवति तथैकसप्ततिमहायुगात्मको कालः मनुसंज्ञको। ससन्धिश्चतुर्दशमनूनां कल्पसंज्ञको कालः भवति। यथा-

| | |
|---|---|
| मनुष्यानां ३६० सौरदिनानि | = देवनामेकं दिनं दिव्यदिनं वा। |
| ३६० दिव्यदिनानि | = देवानामेकं वर्षम्। |
| १२००० दिव्यवर्षाणि | =१ महायुगम्। |
| अथवा-१२०००×३६० | = ४३,२०,००० दिव्यदिनानि। |

७१ महायुगानि=एकः मनुः। १४ मनुः = एकं कल्पम्

**ब्रह्मणः दिवसप्रमाणम्**-सहस्रमहायुगात्मको कल्पः ब्रह्मणः दिनमुच्यते तथा तावत्प्रमाणा रात्रिरपि भवति। तत्रेकस्मिन् मन्वन्तरे ७१ महायुगानि भवन्ति अतः ७१×१४=९९४ महायुगानि जायन्ते। प्रतिमन्वादौ मन्वन्ते च ४८०० दिव्यवर्षात्मकसन्धिर्भवति। एवं चतुर्दशमनूनां पञ्चदशसन्धयः भवन्ति। अतः ४८००×१५= ७२००० दिव्यवर्षात्मकसन्ध्योः भवन्ति। ७२०० दिव्यवर्षैः षड्महायुगानि भवन्ति (यतो हि १२००० दिव्यवर्षाणामेकं महायुगं भवत्यतः ७२०००%१२०००= ६। एवं ९९४ महायुगेषु सन्धियोजनेन ९९४६=१००० महायुगाानि भवन्ति, तथा सहस्रमहायुगानां कल्पसंज्ञकः ब्रह्मणः दिनं भवति, एतावतेव तस्य रात्रिरपि भवति। अनेन प्रकारेण कल्पद्वयं ब्रह्मणोऽहोरात्रं भवति। अनयाहोरात्रसंख्यया तस्यायुः शतवर्षमितं भवति। एवं ज्योतिषृशास्त्रे सृष्ट्यदितः प्रलयान्तं यावत् कालस्य गणना कृताऽस्ति।

✦✦✦

# न्यायदर्शने संशयपदार्थविचारः

डॉ. तुलसीकुमारजोशी
सहायकाचार्यः
चिन्मयविश्वविद्यापीठम्
एर्णाकुलम्, केरलम्

न्यायशास्त्रेऽयथार्थानुभवभेदेषु अन्यतमो भेदः संशयात्मको भेदो वर्तते। अस्य संशयस्य किं स्वरूपं किं वा लक्षणमिति निरूपणात्प्राक् संशयनिरूपणप्रयोजनविषये किञ्चिद्विचार्यते। तत्र तावत् प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इत्याभाणकम् अस्माकं सर्वासामपि प्रवृत्तीनां यत्किञ्चित्फलोद्देश्यकत्वमेव बोधयति। यदि च मन्दानामेव न निष्प्रयोजनिका प्रवृत्तिर्दृश्यते तर्हि कथं नु खलु तेषां तेषां महतामाचार्याणां पदार्थतत्वनिर्णयार्थं विचारे स्वाभाविकी प्रवृत्तिर्निष्फला स्यात्। पदार्थतत्वोपपादने प्रवृत्तैस्तत्वबुभुत्सुभिः स्वाभिमतार्थसिद्धौ प्रमाणोपन्यासः पराभिप्रेतार्थविषयकज्ञाने मध्यस्थस्याप्रामाण्यज्ञानसंपादनं चेति कर्तव्यद्वयं कथामाश्रित्य करणीयमिति तत्र तत्राचार्याणां वचनप्रामाण्यादवगम्यते, तद्यथा अद्वैतसिद्धौ आचार्यैः -"उपपादनञ्च स्वपक्षसाधनपरपक्षनिराकरणाभ्यां सम्भवतीति तदुभयं वादजल्पवितण्डा- नामन्यतमां कथामाश्रित्य सम्पादनीयम्" इत्युक्तम्, व्याप्तिपञ्चकगदाधर्याञ्चाचार्यैः "परीक्षा च परमतनिराकरणपूर्वकस्वमतस्थापनम्" इत्युक्तम्।

सेयं कथायां परार्थानुमानात्मके विचारे प्रवृत्तिराचार्याणां किं फलमुद्दिश्य भवतीत्याकाङ्क्षायामुच्यते संशयस्य दुःखहेतुत्वात् संशयनिवृत्तिमुद्दिश्यैव विचाररूप-साधने प्रवृत्तिदर्शनात् विचारस्य संशयनिवृत्तिरेव फलं वक्तव्यम्। यद्यपि विचारेण साक्षात् संशयनिवृत्तिरूपफलं न जन्यते तथापि तत्वनिर्णयजननद्वारा संशयनिवृत्तिसाधनत्वं विचारस्यास्त्येव। एवञ्च विचाररूपसाधने प्रवृत्त्यर्थं संशयनिवृत्तिरूपं यद्विचारफलं तस्य ज्ञानमपेक्षितं, फलेच्छायाः साधनेच्छाजननद्वारा साधने प्रवृत्तिजनकत्वात्। संशयनिवृत्तिरूपफलज्ञानं च तत्प्रतियोगिसंशयज्ञानं विना नैव सम्भवति। अतः संशयनिवृत्तिरूपफलज्ञानार्थं संशयज्ञानम् आवश्यकं भवति, प्रतियोगिविशेषिताभावबुद्धौ विशेषणज्ञानविधया संशयज्ञानस्य कारणत्वात्, तथा च संशयज्ञानं विना विचारे

प्रवृत्त्यनुदयात् विचारेषु प्रवृत्त्यर्थं संशयज्ञानम् आवश्यकमेवेति संशयपदार्थोऽवश्यं निरूपणीयः।

अत एव यतिश्रेष्ठैराचार्यैः मधुसूदनसरस्वतीचरणैः अद्वैतसिद्धावादावेव विप्रतिपत्तिवाक्यप्रयोजननिरूपणावसरे उक्तं– "तथापि विप्रतिपत्तिवाक्यजन्यसंशयस्य व्युदसनीयतया विचाराङ्गत्वमस्त्येव " व्याख्यातं च गौडब्रह्मानन्दां "व्युदसनीयतया विचारसाध्याभावप्रतियोगितया"इति।

भामत्यामपि सर्वतन्त्रस्वतन्त्रैराचार्यवाचस्पतिमिश्रचरणैः जिज्ञासाविषयतायां संदेहविषयताव्याप्यत्वमभिलषद्भिः व्यापकविरुद्धोपलब्धिरित्याख्यो दोषः प्रदर्शितः – तथाहि–''अथ यदसन्दिग्धमप्रयोजनञ्च न तत् प्रेक्षावत्प्रतिपित्सागोचरः ....... इत्यारभ्य......व्यापकविरुद्धोपलब्धिः'' इत्येतत्पर्यन्तम्।

न्यायसूत्रेऽपि प्रमेयलक्षणनिरूपणानन्तरं प्रमाणेन प्रमेयं कथं बोध्यमित्याकाङ्क्षायां न्यायस्य प्रथमं निरूपणार्हत्वेऽपि न्यायस्याङ्गनिरूप्यतया संशयादित्रिकमादौ सूत्रकृता निरूपितम्। संशयस्य न्यायपूर्वाङ्गता च "तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते, किं तर्हि? संशायितेऽर्थे। यथोक्तं विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः।" इत्यादिन्यायभाष्यवचनेषु विमृश्येति ल्यबन्तप्रयोगदर्शनादपि ध्वन्यते। यद्यपि संशय-प्रयोजनदृष्टान्तानां त्रयाणामपि न्यायनिष्पादकप्रथमज्ञानगोचरत्वरूपं न्यायपूर्वाङ्गत्वं वर्तते तथापि सन्दिग्धे प्रयोजनादिचिन्ता प्रवर्तते न तु प्रयोजनस्य पूर्वमनुसन्धानं भवति इति कृत्वा त्रिष्वपि संशयस्य प्राधान्यात् तत्रैवादौ निरूपणविषयताऽवलोक्यते।

इत्थं तत्वनिर्णयसाधनीभूते न्याये प्रवृत्यर्थं संशयनिरूपणस्यावश्यकतया न्यायशास्त्रे उक्तानि संशयलक्षणानि आश्रित्य यथामति अत्र किञ्चिद्विचार्यते।तत्र तावत् भगवता गौतमेन न्यायसूत्रे संशयमुद्दिश्य सूत्रमिदं प्रणिनायि–

**समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः**

अत्र सूत्रे विमर्शः इति यौगिकपदाल्लभ्योऽर्थः संशयसामान्यस्य लक्षणम्। विमर्श इति पदाच्च विरुद्धो मर्शः ज्ञानं यस्मिन्निति व्युत्पत्या एकस्मिन्धर्मिणि विरुद्धनानाधर्मप्रकारकं ज्ञानं संशय इत्यर्थो लभ्यते। अत्र लक्षणे समानानेकधर्मोपपत्तेः इत्यादिना संशयस्य त्रीणि लक्षणान्युक्तानि। सर्वत्रापि लक्षणे उपलब्ध्यनुपलब्ध्य-व्यवस्थातश्चेत्येतत्सम्बध्यते। विमर्शः संशय इति पदद्वयमपि लक्ष्यसमर्पकम्। तथा च समानधर्मोपलब्धेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशयः,

अनेकधर्मोपलब्धेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशयः एवं विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशय इति लक्षणत्रयं अस्मात्सूत्राल्लभ्यते। अत्र एतेषां लक्षणानां क्रमेण विवरणं प्रस्तूयते।

तथाहि-समानधर्मो नाम स्थाणुपुरुषसाधारणं दैर्घ्यविस्तारादिकं, तादृशं समानं धर्मं पश्यन् तयोर्विशेषं बुभुत्समानस्य पुरुषस्य जायमानं यदनवधारणात्मकं ज्ञानम् अयं स्थाणुर्वा पुरुषो वेत्याकारकं तत्संशयः। अत्र उपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेत्यनुच्यमाने पुरुषोऽयं वृक्षवद् दीर्घः इत्याकारकनिश्चयेऽतिव्याप्तिः स्यात्। वृक्षपुरुषसाधारणस्य दीर्घत्त्वादिधर्मस्योपलब्धेः तत्र हेतुत्वात्। उपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेत्युच्यमाने तु न दोषः, यतो हि उपलब्ध्यनुपलब्ध्यव्यवस्थात इत्यस्य एकतरधर्मप्रकारकनिश्चयहेत्वभावे सति धर्मान्तराभावप्रकारकनिश्चयहेत्वभावे च सतीत्यर्थः, तथा च प्रकृतस्थले पुरुषत्वप्रकारकनिश्चयहेतोः वृक्षत्वाभावप्रकारकनिश्चयहेतोश्चाभावौऽप्यपेक्षितौ। तौ चात्र नस्तः इति नोक्तलक्षणस्य तन्निश्चयेऽतिव्याप्तिः। यदि च केवलं उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इत्येवोच्येत तर्हि अनुगतधर्मज्ञानाभावेऽपि विशेषनिश्चयहेत्वभावमात्रेण संशयापत्तिः स्यादतः समानधर्मोपपत्तेरित्यपि वक्तव्यम्। अत्र विशेषापेक्ष इत्यस्य विशेषं बुभुत्समानस्य इत्यर्थः।

तदनुपादाने समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विमर्शः संशय इति लक्षणं स्यात् तथा च नौकयां गच्छता वृक्षगजोभयगतदैर्घ्यादिरूपसाधारणधर्मवत्पदार्थे दृष्टे वृक्षत्वप्रकारकनिश्चयहेतोरभावात् गजत्वाभावप्रकारकनिश्चयहेतोरप्यभावाच्च अनुपादित्सिते अजिहासिते चोदासीने वस्तुन्यसन्दिग्धे बुभुत्साविषयताविरहेऽपि संशयविषयता स्यात् ,तच्च नेष्टम्, अतो विशेषापेक्ष इत्यप्युपादेयम्। अतो बुभुत्साभावेऽपि संशयो यथा न स्यात् तदर्थं विशेषापेक्ष इति पदमुपात्तम्। एवमेवान्यलक्षणद्वयेऽपि उपलब्ध्यनुपलब्ध्यव्यवस्थातः विशेषापेक्ष इति पदद्वयस्य प्रयोजनं ज्ञेयम्।

द्वितीयं लक्षणं तावत् अनेकधर्मोपलब्धेरुपपत्त्यनुपपत्त्यव्यवस्थातो विशेषापेक्षो विमर्शः संशय इति वर्तते। अत्र अनेकस्माद् सजातीयविजातीयाद् व्यावर्त्यव्यावर्तकसम्बन्धेन विशेषको धर्मोऽनेकधर्म इति व्युत्पत्या अनेकधर्मपदस्य असाधारणधर्म इत्यर्थः। तस्य चानेकधर्मस्य ज्ञानं संशयकारणं भवति। यथा शब्दगतमसाधारणं विभागजत्वं ज्ञात्वा तत्र शब्दे द्रव्यत्वादिप्रकारकनिश्चयहेत्वभावस्य सत्वात् शब्दो द्रव्यं गुणः कर्म वेति संशयो जायते। न च सामान्यविशेषादिप्रकारकसंशयः कुतो न

जायत इति चेत् शब्दे सत्तासम्बन्धस्य सत्वात् तस्य सामान्यादितो भेदस्य सिद्धत्वेन तदभावप्रकारकनिश्चयहेत्वभावस्याभावादनुपलब्धिरूपकारणस्याभावेन न सामान्यादि-प्रकारकसंशयस्तत्र जायते। न च विभागजत्वरूपस्य द्रव्यव्यावृत्तस्य धर्मस्यापि शब्दे सत्वात् तत्र द्रव्यत्वप्रकारकसंशयोऽपि न स्यात् इति चेत् सत्तासम्बन्धेन द्रव्यगुणकर्म-स्वेवान्तर्भावस्य वक्तव्यतया द्रव्यत्वाभावप्रकारकनिश्चयहेतोरभावेन विभागजत्वस्य च द्रव्येऽसत्वात् द्रव्यत्वप्रकारकनिश्चयहेतोश्चाभावात् द्रव्यत्वप्रकारकसंशयसम्भवात्। ननु विभागजत्वस्य विभागेऽपि दृष्टत्वेन द्रव्यकर्मणोश्चादृष्टत्वेन गुणत्वप्रकारक-निश्चयहेतोस्सत्वान्न द्रव्यत्वादिप्रकारकसंशयः सम्भवतीति चेत् उच्यते विभागज-विभागाऽङ्गीकारे तथा सम्भवेऽपि तदनङ्गीकारेण गुणत्वनिश्चायकहेतोरप्यभावेन संशयसम्भवात्। विभागजविभागाङ्गीकारे तु विभागजविभागासमवायिकारणकत्वस्य शब्दगतस्यासाधारणधर्मस्य संशायकत्वसम्भवात्। उपलब्ध्यनुपलब्ध्यव्यवस्थेत्यादिपदानां पूर्ववदेव व्यावृत्तिर्बोध्या।

विप्रतिपत्तेरपि संशयो भवति, विप्रतिपत्तिर्नाम विरोधः तदुक्तं भाष्यकारेण "विप्रतिपत्तेरिति व्याहतमेकार्थदर्शनं विप्रतिपत्तिर्व्याघातो विरोधोऽसहभाव'' इति। अथवा समाने धर्मिणि परस्परविरुद्धार्थबोधकवाक्यं वा विप्रतिपत्तिः। यथा आत्मा अस्ति न वा इति वाक्यात्संशयः भवति। अत्र हि सत्वासत्वयोः परस्परविरुद्धत्वेनैकस्मिन् सहावस्थानासंभवाद्धि विरोधः स्फुट एव। विप्रतिपत्तिवाक्येन जायमानः संशयो वक्तृनिष्ठ एव न तु अन्यनिष्ठः, कथायां स्वस्वपक्षनिश्चयवतोर्वादिनोर्विप्रतिपत्तिवाक्येन संशयासम्भवात् संशयकारणत्वेन ज्ञातं विप्रतिपत्तिवाक्यं श्रुत्वा संशयस्मरणं तु तेषामपि भवतीति तु अन्यदेतत्।

इत्थं साधारणधर्मज्ञानमसाधारणधर्मज्ञानं विप्रतिपत्तिश्चेति त्रिविधं संशयकारणं सूत्रकारैः प्रदर्शितम्। भाष्यकारैस्तु उपलब्ध्यव्यवस्थातोऽनुपलब्ध्यव्यवस्थातश्चेति द्विविधं पृथक्संशयकारणमुक्तं तच्च वार्तिककृतां नेष्टम्, अतस्तेषां त्रिष्वपि लक्षणेषु प्रवेशः करणीयः, अकरणे तु पूर्वोक्तो दोषः स्यात्। अत्र संशयलक्षणेषु पूर्वोक्तलक्षणद्वयं ज्ञातृगतस्य संशयस्य लक्षणं बोध्यं तृतीयं तु लक्षणं वक्तृगतस्य संशयस्य बोध्यम्।

✦✦✦

# लवण व शर्करा के अतिसेवन से हानियाँ

प्रो. विजयपालशास्त्री,
(आचार्य, साहित्यविभाग)
राष्ट्रियसंस्कृतसंस्थानम्,
वेदव्यास-परिसर,
बलाहर, कांगड़ा (हि.प्र.)

**लवण व शर्करा के अतिसेवन से बचें-**

भोजन में सभी व्यञ्जनों का प्रयोग करते हैं। व्यञ्जनों के प्रसंग में कुछ तथ्य भी ध्यान में रखने योग्य हैं। प्रायः सभी व्यञ्जनों में लवण का प्रयोग होता है। आयुर्वेद में जहाँ लवण का निर्देश होता है, वहाँ सैन्धव लवण ही लिया जाता है। यह सभी लवणों में श्रेष्ठ, हितकर व भोजन में रुचिवर्द्धक तथा पाचक होता है।

इस प्रकार लवण षड्रस में महत्त्वपूर्ण स्थान रखता है। उचित मात्रा में प्रयुक्त लवण भोजन का आवश्यक अङ्ग माना जाता है। परन्तु लवण की मात्रा के विषय में विशेष सावधान रहना चाहिए। क्योंकि अन्य रसों की अपेक्षा इसका अतियोग अधिक घातक होता है। चरक-संहिता में षड्रस-विवेचन के प्रसङ्ग में पहले इसके गुणों व उपयोगिता का वर्णन किया है, तदनन्तर इसके अतिसेवन को बहुत ही हानिकर रूप में चित्रित किया है।

**लवण के गुण-**

**लवणो रसः पाचनः क्लेदनो दीपनश्च्यावनश्छेदनो भेदनस्तीक्ष्णः सरो विकास्यधस्रंस्यवकाशकरो वातहरः स्तम्भबन्धसंघातविधमनः सर्वरस-प्रत्यनीकभूतः, आस्यमास्रावयति, कफं विष्यन्दयति, मार्गान् विशोधयति, सर्वशरीरावयवान् मृदूकरोति, रोचयत्याहारम्, आहारयोगी, नात्यर्थं गुरु स्निग्ध उष्णश्च।** (च.सं., विमानस्थान-१.१८)

लवण रस पाचन (आहार को पचाने वाला) क्लेदन (आहार आदि में गीलापन लाने वाला), दीपन (जठराग्नि को दीप्त करने वाला), च्यावन (कफ व मल आदि को नीचे गिराने वाला), छेदन-भेदन (मलों का छेदन-भेदन करने वाला), सर (मलप्रवर्त्तक), विकासी, अधःस्रंसी, अवकाशकर, वातहर, स्तम्भ, बन्ध व संघात को नष्ट करने वाला सब रसों का विरोधी होता है। यह मुख में लालास्राव-कारक होता है। लवण कफ को पिघलाता है, शरीर के स्रोतों को शुद्ध करता है। शरीर के अवयवों को कोमल बनाता है। आहार में रुचि पैदा करता है, यह आहारयोगी (भोजन के साथ मिश्रित किया जाने वाला) द्रव्य है। लवण बहुत गुरु नहीं होता है। यह स्निग्ध व उष्ण होता है।

**लवण के अतिसेवन से हानियाँ-**

**स एवं गुणोऽप्येक एवात्यर्थमुपयुज्यमानः पित्तं कोपयति, रक्तं वर्धयति, तर्षयति, मूर्च्छयति, तापयति, दारयति, कुष्णाति मांसानि, प्रगालयति कुष्ठानि, विषं वर्धयति, शोफान् स्फोटयति, दन्तांश्च्यावयति, पुंस्त्वमुपहन्ति, इन्द्रियाण्युपरुणद्धि, वलिपलितखालित्यमापादयति, अपि च लोहितपित्ताम्लपित्तवीसर्पवातरक्तविचर्चिकेन्द्रलुप्तप्रभृतीन् विकारानुपजनयति।** (च.सं., विमानस्थान-१. १८)

इस प्रकार के गुणों से युक्त होने पर भी लवण रस का ही अकेले रूप में और अधिक मात्रा में प्रयोग करने पर पित्त को कुपित करता है। रक्त में गर्मी बढ़ाता है, प्यास लगाता है, मूर्च्छा लाता है, शरीर में सन्ताप बढ़ाता है, धातुओं का भेदन करता है। मांस को ढीला करता है। कुष्ठ को बढ़ाता है। विष के असर को भी बढ़ा देता है। फोड़ों को पकाकर फोड़ता है। दाँतों को ढीला कर गिराता है। पौरुष शक्ति (शुक्र) को नष्ट करता है। इन्द्रियों का उपरोध करता है। झुर्रियाँ, बालों का पकना व गंजापन पैदा करता है। इसके अति सेवन से रक्तपित्त, अम्लपित्त, विसर्प, वातरक्त, विचर्चिका (पामा/खुजली), इन्द्रलुप्त (गंजापन) आदि रोग हो जाते हैं। अतः इसके अतिसेवन से विशेष सावधानी-पूर्वक बचना चाहिए।

चरकसंहिता विमानस्थान के प्रथम अध्याय में भी अतिमात्र लवण की हानि बताते हुए कहा है-

**लवणं पुनरौष्ण्यतैक्ष्ण्योपपन्नम्, अनतिगुरु, तदत्यर्थमुपयुज्यमानं ग्लानि-शैथिल्य-दौर्बल्याभिनिर्वृत्तिकरं शरीरस्य भवति। ये ह्येनद् ग्राम-नगर-निगम-जनपदाः सततमुपयुञ्जते, ते भूयिष्ठं ग्लास्नवः शिथिलमांसशोणिता अपरिक्लेशसहाश्च भवन्ति। तद्यथा बाह्लीक-सौराष्ट्रिक-सैन्धव-सौवीरकाः॥ ते हि पयसाऽपि सह लवणमश्नन्ति।** (च.सं., विमानस्थान-१.१८)

लवण, उष्णता व तीक्ष्णता से युक्त होता है। यह अतिगुरु नहीं होता है। लवण का अतिमात्रा में प्रयोग करने से शरीर में ग्लानि (म्लानता), शैथिल्य (शिथिलता- मांस व अङ्गों में ढीलापन) व दुर्बलता आती है। जिन ग्राम, नगर, निगम व जनपदों में लवण का अधिक उपयोग किया जाता है, वहाँ के लोग ग्लानियुक्त, शिथिल मांस वाले, क्लेश या श्रम को सहने में असमर्थ होते हैं। जैसे कि बाह्लीक (बलख निवासी), सौराष्ट्रिक (काठियावाड़ी), सैन्धव (सिन्धी), सौवीरक (सिन्ध तथा मद्र के मध्यवर्ती क्षेत्र के निवासी)। ये लोग दूध के साथ भी लवण खाते हैं।

**येऽपीह भूमेरत्यूषरा देशास्तेष्वोषधिवीरुद्वनस्पति-वानस्पत्या न जायन्ते लवणोपहतत्वात्। तस्माल्लवणं नात्युपयुञ्जीत। ये ह्यतिलवणसात्म्याः पुरुषास्तेषामपि खालित्यपालित्यानि वलयश्चाकाले भवन्ति।।** (च.सं., विमानस्थान-१.१८)

भूमि पर जो ऊषर (नमकीन मिट्टी वाले) स्थान हैं, उनमें ओषधि, (यव, गोधूम, सौंफ, अजवायन आदि) वीरुत् (झाड़ियाँ, लताएं), वनस्पति (बिना फूल के सीधे फल देने वाले बड़ , पीपल, गूलर आदि वृक्ष) व वानस्पत्य (फूल तथा फल वाले वृक्ष- आम, नीम आदि) लवण के प्रभाव से पैदा ही नहीं हो पाते हैं। इसलिए लवण का अधिक उपयोग नहीं करना चाहिए। जो व्यक्ति लवणसात्म्य (अधिक लवण खाने की आदत वाले) होते हैं। उन्हें गंजापन, बाल पकना व झुर्रियाँ पड़ना समय से पहले ही हो जाता है। यह सब अतिलवण-सेवन का ही दुष्प्रभाव है, अतः इससे बचना चाहिए।

आज समाज में दो बड़े कष्टदायक रोग प्रचलित हैं। पहला उच्च रक्त चाप (हाई ब्लडप्रैशर) व दूसरा मधुमेह (शुगर)। पहला लवण के अतिसेवन से होता है तथा दूसरा शर्करा के अतिसेवन से। इसके पीछे जिह्वा की रसासक्ति ही मुख्य कारण है। भोजन-विषयक विवेक न रखने वाले व जिह्वा के दास बने नासमझ लोग ही इनके शिकार होते हैं।

शर्करा का अतिसेवन भी बहुत ही हानिकारक है। यह नाना रोगों व मोटापे का कारण है। आयुर्वेद में चेतावनी देते हुए स्पष्ट कहा है कि-

**अतिमधुरमनलशमनं भुक्तमसात्म्यं न पुष्टये वपुषः।**
**अति लवणमचक्षुष्यं तीक्ष्णात्यम्लं जरा साक्षात्।।**

(आयुर्वेदमहोदधि, वस्त्रवर्ग- १०)

अति मधुर भोजन जठराग्नि को शान्त कर देता है। यह शरीर के लिए सात्म्य व पुष्टिकारक नहीं होता है। अधिक लवणयुक्त भोजन नेत्रों के लिए अहितकर होता है। तीक्ष्ण (अतिमात्रा में तेज लाल मिर्च, हरी मिर्च व अन्य अति चटपटे पदार्थ) व अति अम्ल (इमली आदि अति खट्टे पदार्थ) साक्षात् जरा हैं- अर्थात् असमय में बुढ़ापा लाने के लिए मुख्य कारण हैं। अतः अधिक नमक, अधिक तीखे व खट्टे पदार्थों से सावधानी-पूर्वक बचना चाहिए। कहा भी है-

**आयुर्घृते गुडे रोगो मृत्युर्लीनो विदाहिषु।**
**आरोग्यं कटुतिक्तेषु बलं मांसे पयस्सु च।।**

(कैयदेव-निघण्टु, विहारवर्ग- ३१०)

अर्थात् घी में आयु छिपी हुई है। गुड़ में रोग, विदाही अर्थात् जलन करने वाले चटपटे, तीक्ष्ण एवं अति खट्टे पदार्थों में मृत्यु छिपी रहती है। कटु, (अदरक, सोंठ, कालीमिर्च जैसे पाचन करने वाले) तथा तिक्त (गिलोय, करेला आदि कड़वे पदार्थों में) आरोग्य छिपा रहता है। दूध व मांस अर्थात् गुद्देदार फल एवं मेवे आदि में बल छिपा रहता है।

व्यायामशील/श्रमशील रहते हुए घी का सेवन विशेष रूप से दीर्घायुष्य-कारक, जठराग्नि-दीपन व नेत्रज्योति-वर्द्धक होता है। ध्यान रहे घृतयुक्त भोजन के ऊपर शीतल जल कदापि नहीं पीना चाहिए। आयुर्वेद में घृत वाले भोज्य के अनन्तर उष्ण जल पीने का ही विधान है। अन्यथा घृत का पाचन नहीं होता है। गुड़ में रोग छिपा हुआ है- इस कथन का भाव यह है कि नया गुड़ मन्दाग्नि-कारक, कृमिजनक व ज्वर आदि रोगों का कारण बनता है। आयुर्वेद में १ वर्ष से २ वर्ष पुराने गुड़ को ही समुचित मात्रा में लेना लाभकर बताया है। नया गुड़ पूर्वोक्त रूप से हानिकर होने के कारण त्याज्य ही है। विदाही अर्थात् विपाक (पचने के समय) अम्लताजनक (एसिड पैदा करने वाले) अति तीक्ष्ण व अति खट्टे एवं तले हुए पदार्थ साक्षात् रोगकारक होते हैं। ऐसे पदार्थ गीता में राजसिक आहार के रूप में माने हैं तथा दुःख, शोक व रोगों के उत्पादक कहे गये हैं-

**कट्वम्ललवणात्युष्ण-तीक्ष्ण-रूक्ष-विदाहिनः।**
**आहारा राजसस्येष्टा दुःखशोकामयप्रदाः।।** (गीता-१७.९)

अर्थात् अति चरपरे, अति नमकीन, अति उष्ण, अति तीक्ष्ण (तीखे), अति रूक्ष तथा विदाही (जलन-कारक) आहार रजोगुणी लोगों को प्रिय होते हैं। ये आहार दुःख, शोक व रोगों के कारण होते हैं।

✦✦✦



स्वारसिकशास्त्रचर्चाया: एकं दृश्यम्



सम्पूर्त्तिसत्रे छात्रैः सांस्कृतिकप्रतिभाप्रदर्शनम्



सङ्गोष्ठीसम्पूर्तौ मुख्यातिथीनां सम्माननम्



आयुर्वेदे न्यायतन्त्रप्रभावं बोधयन्तः प्रो. विजयपालशास्त्रिणः




सङ्गोष्ठ्यां विचारोपस्थापकाः विद्वांसः



सङ्गोष्ठ्यामुपस्थिताः छात्राः प्रेक्षकाश्च

न्यायविभागः, राष्ट्रिय-संस्कृत-संस्थानम्
श्री रघुनाथकीर्तिपरिसरः, देवप्रयागः





अलकनन्दाभागीरथ्योः संयोगेन अतिपवित्रजाह्नव्याः गङ्गेति प्रथिताख्याप्राप्तिस्थानम्
देवप्रयागः